आर्हतमतप्रभाकरस्य

षष्ठो मयूखः

श्रीहेमचन्द्राचार्यविरचितं

प्राकृतव्याकरणम्

[सिद्धहेमचन्द्रस्याष्टमोऽध्यायः]

वैद्यवंशोद्भवेन श्रीपरशुरामशर्मणा

टिप्पनीशब्दकोशधातुकोशादिभिः परिष्कृतम्

पुण्यपत्तनस्थश्रेष्ठिमोतीलालेन प्रकाशितम्

Printed at his "HANUMAN PRESS" *by* L. B. Kokate,
300 Sadashiv Peth, Poona City
and
Published by Motilal Ladhaji, *196 Bhavani Peth,*
Poona City.

PREFACE

This new edition of Hemacandra's Prakrit Grammar is designed to meet the requirements of University Students in Prakrit languages and was undertaken by me at the suggestion and support of Shet Motilal Ladhaji of Poona. There have been two excellent editions of this Grammar, one by Dr. R. Pischel in two volumes with the text, a word-index and notes in German (Halle, Germany, 1877 & 1880), and the other by S. P. Pandit as an appendix to his edition of the कुमारपालचरित in the Bombay Sanskrit Series (Bombay 1900). The first of these is in Roman letters with notes in German, and as such, cannot be used by an average student; the second has no helps by way of notes; and both of them are long out of print. I therefore thought of bringing out a new edition of the Grammar in the interest of students in Indian universities who are now taking more and more to the study of Prakrit languages in their relation to modern Indian vernaculars, and Shet Motilal Ladhaji readily undertook to publish it.

Eminent philogists like Sir George Grierson have divided Prakrit grammarians into two schools called Western and Eastern. The Western School is represented by वाल्मीकि, his sutras having been commented upon by त्रिविक्रम लक्ष्मीधर and सिंहराज. Hemacandra belongs to this school and in his Siddhahemacandra VIII gives exhaustive treatment of the Prakrit dialects. The Eastern School is headed by Vararuci whose sutras have been commented upon by भामह. Other representatives of this School are रामशर्मतर्कवागीश, the author of प्राकृतकल्पतरु, and मार्कण्डेयकवीन्द्र, the author of प्राकृतसर्वस्व. There seems to be another old work of the School called प्राकृतकामधेनु of लङ्केश्वर which is mentioned by रामशर्मतर्कवागीश as his source.

Hemacandra in his grammar treats of six Prakrit dialects, viz., माहाराष्ट्री, शौरसनी, मागधी, पैशाची, चूलिकापैशाची and अपभ्रंश. By Prakrit he understands माहाराष्ट्री which he considers as the base for all other dialects. He also refers to आर्ष Prakrit which is another name for Ardhamagadhi. He devotes the first three padas and major part of the fourth to the treatment of the principal Prakrit and the rest to other dialects.

The notes given here are not exhaustive, but I feel, are sufficient to guide an intelligent student with fair knowledge of the Sanskrit language. In the section on dialects other than the principal Prakrit they are more numerous, and the tabulation of the principal characteristics of the different dialects which the student is recommended to study more carefully, and my full and word for-word rendering in Sanskrit with an English translation of the Apabhramsa verses, would go a long way to help the student to master the subject systematically. I have however reserved fuller treatment of Apabhramsa and its dialects for another work : A Manual of the Apabhramsa Dialects with illustrative texts – which I have in preparation. I hope that this work would be out next winter.

I must make grateful acknowledgements to the soul of Dr. R. Pischel for the liberal use that I have made of his edition, the critical apparatus, the word-index and notes as also of his " Materialien zur Kenntnis des Apabhramsa." I should like also to acknowledge the help that I received from two of my pupils, Mr. A. N. Upadhye, B. A. (Hons) and Mr. R. G. Marathe of the Willingdon College in the preparation of this edition. I regret that the scholastic character of the book is considerably impaired on account of the want of accented English and Sanskrit type in the Press and that a few mistakes of printing have slipped in on account of the distance between the Editor and the Press. The student is therefore earnestly requested to make the necessary corrections in the text from the Errata before he begins to use the book.

Willingdon College, Sangli.
23rd October 1928.

P. L. VAIDYA.

ॐ अर्हम् ।

कलिकालसर्वज्ञश्रीहेमचन्द्राचार्यविरचितं

प्राकृतव्याकरणम् ।

अथ प्राकृतम् ॥ ८ । १ । १ ॥

अथशब्द आनन्तर्यार्थोऽधिकारार्थश्च ॥ प्रकृतिः संस्कृतम् । तत्र भवं तत आगतं वा प्राकृतम् । संस्कृतानन्तरं प्राकृतमधिक्रियते ॥ संस्कृतानन्तरं च प्राकृतस्यानुशासनं सिद्धसाध्यमानभेदसंस्कृतयोनेरेव तस्य लक्षणं न देश्यस्य इति ज्ञापनार्थम् । संस्कृतसमं तु संस्कृतलक्षणेनैव गतार्थम् । प्राकृते च प्रकृतिप्रत्ययलिङ्गकारकसमाससंज्ञादयः संस्कृतवद्वेदितव्याः ॥ लोकाद् इति च वर्तते । तेन ऋ–ॠ–ऌ–ॡ–ऐ–औ–ङ–ञ–श–ष–विसर्जनीय–प्लुतवर्जो वर्णसमाम्नायो लोकादवगन्तव्यः । ङ्ञौ स्ववर्ग्य-संयुक्तौ भवत एव । ऐदौतौ च केषांचित् । कैतवम् । कैअवं । सौन्दर्यम् । सौंअरिअं ॥ कौरवाः । कौरवा ॥ तथा अस्वरं व्यञ्जनं द्विवचनं चतुर्थीबहुवचनं च न भवति ॥ १ ॥

बहुलम् ॥ ८ । १ । २ ॥

बहुलम् इत्यधिकृतं वेदितव्यम् आ शास्त्रपरिसमाप्तेः ॥ ततश्च । क्वचित् प्रवृत्तिः क्वचिदप्रवृत्तिः क्वचिद् विभाषा क्वचिद् अन्यदेव भवति । तच्च यथास्थानं दर्शयिष्यामः ॥ २ ॥

आर्षम् ॥ ८ । १ । ३ ॥

ऋषीणाम् इदम् आर्षम् । आर्षं प्राकृतं बहुलं भवति । तदपि यथास्थानं दर्शयिष्यामः । आर्षे हि सर्वे विधयो विकल्प्यन्ते ॥ ३ ॥

दीर्घ–ह्रस्वौ मिथो वृत्तौ ॥ ८ । १ । ४ ॥

वृत्तौ समासे स्वराणां दीर्घह्रस्वौ बहुलं भवतः । मिथः परस्परम् ॥ तत्र ह्रस्वस्य दीर्घः । अन्तर्वेदिः । अन्ता-वेई ॥ सप्तविंशतिः । सत्तावीसा ॥ क्वचिन्न भवति । जुवइ-अणो ॥ क्वचिद् विकल्पः । वारी-मई । वारि-मई ॥ भुजयन्त्रम् । भुआ–यन्तं भुअ-यन्तं ॥ पतिगृहम् । पई-हरं पइ-हरं ॥ वेलू-वणं वेलुवणं ॥ दीर्घस्य ह्रस्वः । निअम्ब-सिल-खलिअ-वीइ-मालस्स ॥ क्वचिद् विकल्पः । जँउण-यडं जँउणा-यडं । नइ-सोत्तं नई-सोत्तं । गोरि-हरं गोरी-हरं । वहु-मुहं वहू-मुहं ॥ ४ ॥

पदयोः संधिर्वा ॥ ८ । १ । ५ ॥

संस्कृतोक्तः संधिः सर्वः प्राकृते पदयोर्व्यवस्थितविभाषया भवति ॥ वासेसी वासइसी । विसमायवो विसम-आयवो । दहिईसरो दहीसरो । साऊअयं साउ-उअयं ॥ पदयोरिति किम् । पाओ । पई । वत्थाओ । मुद्धाइ । मुद्धाए । महइ । महए ॥ बहुलाधिकारात् क्वचिद् एकपदेऽपि । काहिइ काही । बिइओ बीओ ॥ ५ ॥

न युवर्णस्यास्वे ॥ ८ । १ । ६ ॥

इवर्णस्य उवर्णस्य च अस्वे वर्णे परे संधिर्न भवति ॥ न वेरि-वग्गे वि अवयासो । वन्दामि अज्ज–वइरं ।

दणुइन्द–ग्रहिर–लित्तो सहइ उइन्दो नहप्पहावलि–अरुणो ।
संझा-वहु-अवऊढो णव-ग्गारिहरो व्व विज्जुलापाडिभिन्नो ॥

युवर्णस्येति किम् ।

गूढोअर-त्तामरसाणुसारिणी भमर-पन्ति व्व ॥

अस्व इति किम् । पुहवीसो ॥ ६ ॥

एदोतोः स्वरे ॥८।१।७॥

एकारओकारयोः स्वरे परे संधिर्न भवति ॥

वहुआइ नहुल्लिहणे आबन्धन्तीए कञ्चुअं अज्ज ।

मयरद्धय-सर–धोरणि–धारा–छेअ व्व दीसन्ति ॥
उवमासु अपज्जत्तेभ–कळभ–दन्तावहासमूरुजुअं ।
तं चेव मलिअ–बिस–दण्ड–विरसमालक्खिमो एण्हिं ॥
अहो अच्छरिअं ॥ एदोतोरिति किम् ।
अत्थालोअण–तरला इयर–कईणं भमन्ति बुद्धीओ ।
अत्थ च्चेअ निरारम्भमेन्ति हिअयं कइन्दाणं ॥ ७ ॥

स्वरस्योद्वृत्ते ॥८।१।८॥

व्यञ्जनसंपृक्तः स्वरो व्यञ्जने लुप्ते योऽवशिष्यते स उद्वृत्त इहोच्यते । स्वरस्य उद्वृत्ते स्वरे परे संधिर्न भवति ॥

विससिज्जन्त–महा–पसु–दंसण–संभम–परोप्परारूढा ।

गयणे च्चिय गन्धउडिं कुणन्ति तुह कउल–णारीओ ॥ निसा–अरो । निसि–अरो रयणी–अरो । मणुअत्तं ॥ बहुलाधिकारात् क्वचिद् विकल्पः । कुम्भ–आरो कुम्भारो । सु–उरिसो सूरिसो ॥ क्वचित् संधिरेव । सालाहणो । चक्काओ ॥ अत एव प्रतिषेधात् समासेऽपि स्वरस्य संधौ भिन्नपदत्वम् ॥८॥

त्यादेः ॥८।१।९॥

तिबादीनां स्वरस्य स्वरे परे सन्धिर्न भवति ॥ भवति इह । होइ इह ॥ ९ ॥

लुक् ॥८।१।१०॥

स्वरस्य स्वरे परे बहुलं लुग् भवति ॥ त्रिदशेशः । तिअसीसो ॥ निःश्वासोच्छ्वासौ । नीसासूसासा ॥ १० ॥

अन्त्यव्यञ्जनस्य ॥८।१।११॥

शब्दानां यद् अन्त्यव्यञ्जनं तस्य लुग् भवति ॥ जाव । ताव । जसो । तमो । जम्मो ॥ समासे तु वाक्यविभक्त्यपेक्षायाम् अन्त्यत्वम् अनन्त्यत्वं च । तेनोभयमपि भवति । सद्भिक्षुः । सभिक्खू । सज्जनः । सज्जणो ॥ एतद्गुणाः । एअ–गुणा ॥ तद्गुणाः । तग्गुणा ॥ ११ ॥

न श्रद्दुदोः ॥ ८।१।१२॥

श्रद् उद् इत्येतयोरन्त्यव्यञ्जनस्य लुग् न भवति ॥ सद्दहिअं । सद्धा । उग्गयं । उन्नयं ॥ १२ ॥

निर्दुरोर्वा ॥ ८।१।१२ ॥

निर् दुर् इत्येतयोरन्त्यव्यञ्जनस्य वा लुग् न भवति ॥ निस्सहं नीसहं दुस्सहो दूसहो । दुक्खिओ दुहिओ ॥ १३ ॥

स्वरेन्तरश्च ॥ ८ । १ । १४ ॥

अन्तरो निर्दुरोश्चान्त्यव्यञ्जनस्य स्वरे परे लुग् न भवति ॥ अन्तरप्पा ॥ निरन्तरं । निरवसेसं ॥ दुरुत्तरं । दुरवगाहं ॥ क्वचिद् भवत्यपि । अन्तोवरि ॥ १४ ॥

स्त्रियामादविद्युतः ॥ ८ । १ । १५ ॥

स्त्रियां वर्तमानस्य शब्दस्यान्त्यव्यञ्जनस्य आत्वं भवति विद्युच्छब्दं वर्जयित्वा । लुगपवादः ॥ सरित् । सरिआ ॥ प्रतिपद् । पाडिवआ ॥ संपत् । संपआ ॥ बहुलाधिकाराद् ईषत्स्पृष्टतरयश्रुतिरपि । सरिया । पाडिवया । संपया ॥ अविद्युत इति किम् । विज्जू ॥ १५ ॥

रो रा ॥ ८ । १ । १६ ॥

स्त्रिया वर्तमानस्यान्तस्य रेफस्य रा इत्यादेशो भवति । आत्त्वापवादः ॥ गिरा । धुरा । पुरा ॥ १६ ॥

क्षुधो हा ॥ ८ । १ । १७ ॥

क्षुध्शब्दस्यान्त्यव्यञ्जनस्य हादेशो भवति ॥ छुहा ॥ १७ ॥

शरदादेरत् ॥ ८ । १ । १८ ॥

शरदादेरन्त्यव्यञ्जनस्य अत् भवति ॥ शरद् । सरओ ॥ भिषक् । भिसओ ॥ १८ ॥

दिक्–प्रावृषोः सः ॥ ८ । १ । १९ ॥

एतयोरन्त्यव्यञ्जनस्य सो भवति ॥ दिसा । पाउसो ॥ १९ ॥

आयुरप्सरसोर्वा ॥ ८ । १ । २० ॥

एतयोरन्त्यव्यञ्जनस्य सो वा भवति ॥ दीहाउसो दीहाऊ । अच्छरसा अच्छरा ॥ २० ॥

ककुभो हः ॥ ८ । १ । २१ ॥

ककुभ्शब्दस्यान्त्यव्यञ्जनस्य हो भवति ॥ कउहा ॥ २१ ॥

धनुषो वा ॥ ८ । १ । २२ ॥

धनुःशब्दस्यान्त्यव्यञ्जनस्य हो वा भवति ॥ धणुहं धणू ॥ २२ ॥

मोनुस्वारः ॥ ८ । १ । २३ ॥

अन्त्यमकारस्यानुस्वारो भवति ॥ जलं फलं वच्छं गिरिं पेच्छ ॥ क्वचिद् अनन्त्यस्यापि । वणम्मि । वणंमि ॥ २३ ॥

वा स्वरे मश्च ॥ ८ । १ । २४ ॥

अन्त्यमकारस्य स्वरे परेऽनुस्वारो वा भवति । पक्षे लुगपवादो मस्य मकारश्च भवति ॥ वन्दे उसभं अजिअं । उसभमजिअं च वन्दे ॥ बहुलाधिकाराद् अन्यस्यापि व्यञ्जनस्य मकारः । साक्षात् । सक्खं ॥ यत् । जं ॥ तत् । तं ॥ विष्वक् । वीसुं ॥ पृथक् ॥ पिहं ॥ सम्यक् । सम्मं ॥ इहं । इहयं । आलेड्डुअं इत्यादि ॥ २४ ॥

ङ–ञ–ण–नो व्यञ्जने ॥८ । १ । २५ ॥

ङ ञ ण न इत्येतेषां स्थाने व्यञ्जने परे अनुस्वारो भवति ॥ ङ । पङ्क्तिः । पंती ॥ पराङ्मुखः । परंमुहो ॥ ञ । कञ्चुकः । कंचुओ ॥ लाञ्छनम् । लंछणं ॥ ण । षण्मुखः । छंमुहो ॥ उत्कण्ठा । उक्कंठा ॥ न । सन्ध्या । संझा ॥ विन्ध्यः । विंझो ॥ २५ ॥

वक्रादावन्तः ॥ ८ । १ । २६ ॥

वक्रादिषु यथादर्शनं प्रथमादेः स्वरस्य अन्त आगमरूपोऽनुस्वारो भवति ॥ वंकं । तंसं । अंसुं । मंस । पुंछं । गुंछं । मुंढा । पंसूं । बुंधं । कंकोडो । कुंपलं । दंसणं । विंछिओ । गिंठी । मंजारो । एप्वाद्यस्य ॥ वयंसो ।

मणंसी । मणंसिणी । मणंसिला । पडंसुआ । एषु द्वितीयस्य ॥ अवरिं । अणिउंतयं । अइमुंतयं । अनयोस्तृतीयस्य ॥ वक्र । व्यस्र । अश्र । श्मश्रु । पुच्छ । गुच्छ । मूर्द्धन् । पर्शु । बुध्न । कर्कोट । कुट्मल । दर्शन । वृश्चिक । गृष्टि । मार्जार । वयस्य । मनस्विन् । मनस्विनी । मनःशिला । प्रतिश्रुत् । उपरि । अतिमुक्तक । इत्यादि ॥ क्वचिच्छन्दःपूरणेऽपि । देवं–नाग—सुवण्ण ॥ क्वचिन्न भवति । गिट्ठी । मज्जारो । मणसिला । मणासिला ॥ आर्षे मणोसिला । अइमुत्तयं ॥ २६ ॥

क्त्वा–स्यादेर्ण–स्त्वोर्वा ॥ ८।१।२७ ॥

क्त्वायाः स्यादीनां च यौ णसू तयोरनुस्वारोन्तो वा भवति ॥ क्त्वा । काऊणं । काऊण । काउआणं काउआण ॥ स्यादि । वच्छेणं वच्छेण । वच्छेसुं वच्छेसु ॥ णस्त्वोरिति किम् । करिअ । अग्गिणो ॥ २७ ॥

विंशत्यादेर्लुक् ॥ ८।१।२८ ॥

विंशत्यादीनाम् अनुस्वारस्य लुग् भवति । विंशतिः । वीसा ॥ त्रिंशत् । तीसा ॥ संस्कृतम् । सक्कयं ॥ संस्कारः । सक्कारो इत्यादि ॥ २८ ॥

मांसादेर्वा ॥ ८।१।२९ ॥

मांसादीनामनुस्वारस्य लुग् वा भवति मासं मंसं । मासलं मंसलं । कासं । कंसं । पासू पंसू । कह कहं । एव एवं । नूण नूणं । इआणि इआणिं । दाणि दाणिं । कि करेमि किं करेमि । समुहं संमुहं । केसुअं किसुअं । सीहो सिंघो । मांस । मांसल । कांस्य । पांसु । कथम् । एवम् । नूनम् । इदानीम् । किम् । संमुख । किंशुक । सिंह इत्यादि ॥ २९ ॥

वर्गेन्त्यो वा ॥ ८।१।३० ॥

अनुस्वारस्य वर्गे परे प्रत्यासत्तेस्तस्यैव वर्गस्यान्त्यो वा भवति ॥ पङ्को पंको । सङ्खो संखो । अङ्गणं अंगणं । लङ्घणं लंघणं । कञ्चुओ कंचुओ । लञ्छणं लंछणं । अञ्जिअं अंजिअं । सञ्झा संझा । कण्टओ कंटओ । उक्कण्ठा उक्कंठा । कण्डं कंडं । सण्ढो संढो । अन्तरं अंतरं । पन्थो पंथो ।

चन्दो चंदो । बन्धवो बंधवो । कम्पइ कंपइ । वम्फइ वंफइ । कलम्बो कलंबो । आरम्भो आरंभो ॥ वर्ग इति किम् । संसओ । संहरइ । नित्यमिच्छन्त्यन्ये ॥ ३० ॥

प्रावृट्–शरत्तरणयः पुंसि ॥८।१।३१॥

प्रावृष् शरत् तरणि इत्येते शब्दाः पुंसि पुल्लिङ्गे प्रयोक्तव्याः ॥ पाउसो । सरओ । एस तरणी ॥ तराणिशब्दस्य पुंस्त्रीलिङ्गत्वेन नियमार्थमुपादानम्॥३

स्नमदाम–शिरो–नभः ॥ ८।१।३२ ॥

दामन्शिरस्नभस्वर्जितं सकारान्तं नकारान्तं च शब्दरूपं पुंसि प्रयोक्तव्यम् ॥ सान्तम् । जसो । पओ । तमो । तेओ । उरो ॥ नान्तम् । जम्मो । नम्मो । मम्मो ॥ अदामाशिरोनभ इति किम् । दामं । सिरं । नहं । यच्च सेयं वयं सुमणं सम्मं चम्ममिति दृश्यते तद् बहुलाधिकारात् ॥३२॥

वाक्ष्यर्थ–वचनाद्याः ॥८।१।३३॥

अक्षिपर्याया वचनादयश्च शब्दाः पुंसि वा प्रयोक्तव्याः ॥ अक्ष्यर्थाः । अज्जवि सा सवइ ते अच्छी । नच्चावियाइं तेणम्ह अच्छीइं ॥ अञ्जल्यादिपाठादक्षिशब्दः स्त्रीलिङ्गेपि । एसा अच्छी । चक्खू चक्खूइं । नयणा नयणाइं । लोअणा लोअणाइं ॥ वचनादि । वयणा वयणाइं ॥ विज्जुणा विज्जूए । कुलो कुलं । छन्दो छन्दं । माहप्पो माहप्पं । दुक्खा दुक्खाइं ॥ भायणा भायणाइं । इत्यादि । इति वचनादयः ॥ नेत्ता नेत्ताइं । कमला कमलाइं इत्यादि तु संस्कृतवदेव सिद्धम् ॥ ३३ ॥

गुणाद्याः क्लीबे वा ॥ ८।१।३४ ॥

गुणादयः क्लीबे वा प्रयोक्तव्याः ॥ गुणाइं गुणा । विहवेहिँ गुणाइँ मग्गन्ति । देवाणि देवा । बिन्दूइं बिन्दुणो । खग्गं खग्गो । मण्डलग्गं मण्डलग्गो । कररुहं कररुहो । रुक्खाइं रुक्खा । इत्यादि । इति गुणादयः ॥ ३४ ॥

वेमाञ्जल्याद्याः स्त्रियाम् ॥ ८।१।३५ ॥

इमान्ता अञ्जल्यादयश्च शब्दाः स्त्रियां वा प्रयोक्तव्याः ॥ एसा गरिमा एस गरिमा । एसा महिमा एस महिमा । एसा निल्लज्जिमा एस निल्लज्जिमा । एसा धुत्तिमा एस धुत्तिमा । अञ्जल्यादि । एसा अञ्जली एस अञ्जली । पिट्ठी पिट्ठं । पृष्ठमित्वे कृते स्त्रियामेवेत्यन्ये । अच्छी अच्छिं । पण्हा पण्हो । चोरिआ चोरिअं । एवं कुच्छी । बली । निही विही । रस्सी । गण्ठी । इत्यञ्जल्यादयः ॥ गड्डा गड्डो इति तु संस्कृतवदेव सिद्धम् । इमेति तन्त्रेण त्वादेशस्य डिमा इत्यस्य पृथ्वादीन्नश्च संग्रहः । त्वादेशस्य स्त्रीत्वमेवेच्छन्त्येके ॥ ३५ ॥

बाहोरात् ॥ ८।१।३६॥

बाहुशब्दस्य स्त्रियामाकारोन्तादेशो भवति ॥ बाहाए जेण धरिओ एक्काए ॥ स्त्रियामित्येव । वामेअरो बाहू ॥ ३६ ॥

अतो डो विसर्गस्य ॥ ८ । १ । ३७ ॥

संस्कृतलक्षणोत्पन्नस्यातः परस्य विसर्गस्य स्थाने डो इत्यादेशो भवति ॥ सर्वतः । सव्वओ । पुरतः । पुरओ ॥ अग्रतः । अग्गओ ॥ मार्गतः । मग्गओ ॥ एवं सिद्धावस्थापेक्षया । भवतः । भवओ ॥ भवन्तः । भवन्तो । सन्तः । सन्तो ॥ कुतः । कुदो ॥ ३७ ॥

निष्प्रती ओत्परी माल्य–स्थोर्वा ॥ ८ । १ । ३८ ॥

निर् प्रति इत्येतौ माल्यशब्दे स्थाधातौ च परे यथासंख्यं ओत् परि इत्येवंरूपौ वा भवतः । अभेदनिर्देशः सर्वादेशार्थः ॥ ओमालं । निम्मलं । ओमालयं वहइ । परिट्ठा पइट्ठा । परिट्ठिअं । पइट्ठिअं ॥ ३८ ॥

आदेः ॥ ८ । १ । ३९ ॥

आदेरित्यधिकारः ' **कगचज०** ' [८–१–१७७] इत्यादिसूत्रात् प्रागविशेषे वेदितव्यः ॥ ३९ ॥

त्यदाद्यव्ययात् तत्स्वरस्य लुक् ॥ ८ । १ । ४० ॥

त्यदादेरव्ययाच्च परस्य तयोरेव त्यदाद्यव्ययययोरादेः स्वरस्य बहुलं लुग्

भवति ॥ अम्हेत्थ अम्हे एत्थ । जइमा जइ इमा । जइहं जइ अहं ॥४०॥

पदादपेर्वा ॥८।१।४१॥

पदात् परस्य अपेरव्ययस्यादेर्लुग् वा भवति ॥ तं पि तमवि । किं पि किमवि । केण वि केणावि । कहं पि कहमवि ॥ ४१ ॥

इतेः स्वरात् तश्च द्विः ॥ ८ । १ । ४२ ॥

पदात् परस्य इतेरादेर्लुग् भवति स्वरात् परश्च तकारो द्विर्भवति ॥ किं ति । जं ति । दिट्ठं ति । न जुत्तं ति ॥ स्वरात् । तह त्ति । झत्ति । पिओ त्ति । पुरिसो त्ति ॥ पदादित्येव । इअ विज्ञ-गुहा-निलयाए ॥ ४२ ॥

लुप्त-य-र-व-श-ष-सां श-ष-सां दीर्घः ॥ ८ । १ । ४३ ॥

प्राकृतलक्षणवशाल्लुप्ता या उपर्यधो वा येषां शकारषकारसकाराणां तेषामादेः स्वरस्य दीर्घो भवति ॥ शस्य यलोपे । पश्यति । पासइ ॥ कश्यपः । कासवो ॥ आवश्यकं । आवासयं ॥ रलोपे । विश्राम्यति । वीसमइ ॥ विश्रामः । वीसामो ॥ मिश्रम् । मीसं ॥ संस्पर्शः । संफासो ॥ वलोपे । अश्वः । आसो ॥ विश्वसिति । वीससइ ॥ विश्वासः । वीसासो ॥ शलोपे । दुश्शासनः । दूसासणो ॥ मनःशिला । मणासिला ॥ षस्य यलोपे । शिष्यः । सीसो ॥ पुष्यः । पूसो ॥ मनुष्यः । मणूसो ॥ रलोपे । कर्षकः । कासओ ॥ वर्षाः । वासा ॥ वर्षः । वासो ॥ वलोपे । विष्वाणः । वीसाणो ॥ विष्वक् । वीसुं ॥ षलोपे । निष्पक्तः । नीसत्तो ॥ सस्य यलोपे । सस्यम् । सासं ॥ कस्यचित् । कासइ ॥ रलोपे । उस्रः । ऊसो ॥ विस्रम्भः । वीसम्भो ॥ वलोपे । विकस्वरः । विकासरो ॥ निःस्वः । नीसो ॥ सलोपे । निस्सहः । नीसहो ॥ **' न दीर्घानुस्वारात् '** (८-२-९२) इति प्रतिषेधात् सर्वत्र **'अनादौ शेषादेशयोर्द्वित्वम्'** (८-२-८९) इति द्वित्वाभावः ॥४३॥

अतः समृद्ध्यादौ वा ॥ ८।१।४४ ॥

वा भवति ॥ सामिद्धी समिद्धी । पासिद्धी पसिद्धी । पायडं पयडं । पाडिवआ पडिवआ । पासुत्तो पसुत्तो । पाडिसिद्धी पडिसिद्धी । सारिच्छो सरिच्छो ।

माणंसी मणंसी । माणंसिणी मणंसिणी । आहिआई अहिआई । पारोहो परोहो । पावासू पवासू । पाडिप्फद्धी पडिप्फद्धी ॥ समृद्धि । प्रसिद्धि । प्रकट । प्रतिपत् । प्रसुत । प्रतिसिद्धि । सदृक्ष । मनस्विन् मनस्विनी । अभियाति । प्ररोह । प्रवासिन् । प्रतिस्पर्द्धिन् ॥ आकृतिगणोऽयम् । तेन । अस्पर्शः । आफंसो ॥ परकीयम् । पारकेरं । पारक्कं ॥ प्रवचनम् । पावयणं ॥ चतुरन्तम् । चाउरन्तम् । इत्याद्यपि भवति ॥ ४४ ॥

दक्षिणे हे ॥ ८।१।४५ ॥

दक्षिणशब्दे आदेरतो हे परे दीर्घो भवति ॥ दाहिणो ॥ ह इति किम् । दक्खिणो ॥ ४५ ॥

इः स्वप्नादौ ॥ ८।१।४६ ॥

स्वप्न इत्येवमादिषु आदेरस्य इत्वं भवति ॥ सिविणो । सिमिणो ॥ आर्षे उकारोपि । सुमिणो । ईसि । वेडिसो । विलिअं । विअणं । मुइङ्गो । किविणो । उत्तिमो । मिरिअं । दिण्णं ॥ बहुलाधिकाराण्णत्वाभावे न भवति । दत्तं । देवदत्तो ॥ स्वप्न । ईषत् । वेतस । व्यलीक । व्यजन । मृदङ्ग । कृपण । उत्तम । मरिच । दत्त । इत्यादि ॥ ४६ ॥

पक्काङ्गार–ललाटे वा ॥ ८।१।४७ ॥

एष्वादेरत इत्वं वा भवति ॥ पिक्कं पक्कं । इङ्गालो अङ्गारो । णिडालं णडालं ॥ ४७ ॥

मध्यम–कतमे द्वितीयस्य ॥ ८।१।४८ ॥

मध्यमशब्दे कतमशब्दे च द्वितीयस्यात इत्वं भवति ॥ मज्झिमो । कइमो ॥ ४८ ॥

सप्तपर्णे वा ॥ ८।१।४९ ॥

सप्तपर्णे द्वितीयस्यात इत्वं वा भवति ॥ छत्तिवण्णो छत्तवण्णो ॥ ४९ ॥

मयट्यूर्वा ॥ ८।१।५० ॥

मयट्प्रत्यये आदेरतः स्थाने अइ इत्यादेशो भवति वा ॥ विषमयः । विसमइओ विसमओ ॥ ५० ॥

ईर्हरे वा ॥ ८।१।५१ ॥

हरशब्दे आदेरत ईर्वा भवति ॥ हीरो हरो ॥ ५१ ॥

ध्वनि––विश्वचोरुः ॥ ८।१।५२ ॥

अनयोरादेरस्य उत्वं भवति ॥ झुणी । वीसुं ॥ कथं सुणओ । शुनक इति प्रकृत्यन्तरस्य ॥ श्वन्शब्दस्य तु सा साणो इति प्रयोगौ भवतः ॥५२॥

वन्द्र–खण्डिते णा वा ॥ ८।१।५३ ॥

अनयोरादेरस्य णकारेण सहितस्य उत्वं वा भवति ॥ वुद्दं वन्द्दं । खुडिओ खण्डिओ ॥ ५३ ॥

गवये वः ॥ ८।१।५४ ॥

गवयशब्दे वकाराकारस्य उत्वं भवति ॥ गउओ । गउआ ॥ ५४ ॥

प्रथमे प–थोर्वा ॥ ८ । १ । ५५ ॥

प्रथमशब्दे पकारथकारयोरकारस्य युगपत् क्रमेण च उकारो वा भवति॥ पुढुमं पुढमं पढुमं पढमं ॥ ५५ ॥

ज्ञो णत्वेभिज्ञादौ ॥ ८ । १ । ५६ ॥

अभिज्ञ एवंप्रकारेषु ज्ञस्य णत्वे कृते ज्ञस्यैव अत उत्वं भवति ॥ अहिण्णू । सव्वण्णू । कयण्णू । आगमण्णू ॥ णत्व इति किम् । अहिज्जो । सव्वज्जो ॥ अभिज्ञादाविति किम् । प्राज्ञः । पण्णो ॥ येषां ज्ञस्य णत्वे उत्वं दृश्यते ते अभिज्ञादयः ॥ ५६ ॥

एच्छय्यादौ ॥ ८ । १ । ५७ ॥

शय्यादिषु आदेरस्य एत्वं भवति ॥ सेज्जा । सुन्देरं । गेन्दुअं । एत्थ ॥ शय्या । सौन्दर्य । कन्दुक । अत्र ॥ आर्षे पुरेकम्मं ॥ ५७ ॥

वल्ल्युत्कर–पर्यन्ताश्चर्ये वा ॥ ८ । १ । ५८ ॥

एषु आदेरस्य एत्वं वा भवति ॥ वेल्ली वल्ली । उक्केरो उक्करो । पेरन्तो पज्जन्तो । अच्छेरं अच्छारिअं अच्छअरं अच्छरिज्जं अच्छरिज्जं अच्छरीअं ॥ ५८ ॥

ब्रह्मचय चः ॥ ८ । १ । ५९ ॥

ब्रह्मचर्यशब्दे चस्य अत एत्वं भवति ॥ बह्मचेरं ॥ ५९ ॥

तोन्तरि ॥ ८ । १ । ६० ॥

अन्तरशब्दे तस्य अत एत्वं भवति ॥ अन्तःपुरम् । अन्तेउरं ॥ अन्तश्चारी । अन्तेआरी ॥ क्वचिन्न भवति । अन्तग्गयं । अन्तो-वीसम्भ-निवेसिआणं ॥ ६० ॥

ओत्पद्मे ॥ ८ । १ । ६१ ॥

पद्मशब्दे आदेरत ओत्वं भवति ॥ पोम्मं ॥ **'पद्मलब्ध०'** [८-२-२१२] इति विश्लेषे न भवति । पउमं ॥ ६१ ॥

नमस्कार–परस्परे द्वितीयस्य ॥ ८ । १ । ६२ ॥

अनयोर्द्वितीयस्य अत ओत्वं भवति ॥ नमोक्कारो । परोप्परं ॥ ६२ ॥

वार्पौ ॥ ८ । १ । ६३ ॥

अर्पयतौ धातौ आदेरस्य ओत्वं वा भवति ॥ ओप्पेइ अप्पेइ । ओप्पिअं अप्पिअं ॥ ६३ ॥

स्वपावुच्च ॥ ८ । १ । ६४ ॥

स्वपितौ धातौ आदेरस्य ओत् उत् च भवति ॥ सोवइ । सुवइ ॥ ६४ ॥

नात्पुनर्यादाइ वा ॥ ८ । १ । ६५ ॥

नञः परे पुनःशब्दे आदेरस्य आ आइ इत्यादेशौ वा भवतः ॥ न उण न उणाइ । पक्षे । न उण । न उणो । केवलस्यापि दृश्यते । पुणाइ ॥ ६५ ॥

वालाब्वरण्ये लुक् ॥ ८ । १ । ६६ ॥

अलाब्वरण्यशब्दयोरादेरस्य लुग् वा भवति । लाउं अलाउं । लाऊ अलाऊ । रण्णं अरण्णं । अत इत्येव । आरण्ण–कुञ्जरो व्व वेल्लंतो ॥६६॥

वाव्ययोत्खातादावदातः ॥ ८ । १ । ६७ ॥

अव्ययेषु उत्खातादिषु च शब्देषु आदेराकारस्य अद् वा भवति ॥

अव्यय । जह जहा । तह तहा । अहव अहवा । व वा ॥ ह हा । इत्यादि । उत्खातादि । उक्खयं उक्खायं । चमरो चामरो । कलओ कालओ । ठविओ ठाविओ । परिट्ठविओ परिट्ठाविओ । संठविओ संठाविओ । पययं पाययं । तलवेण्टं तालवेण्टं । तलवोण्टं तालवोण्टं । हलिओ हालिओ । नराओ । नाराओ । वलया वलाया । कुमरो कुमारो । खइरं खाइरं ॥ उत्खात । चामर । कालक । स्थापित । प्राकृत । तालवृन्त । हालिक । नाराच । बलाका । कुमार । खादिर इत्यादि ॥ केचिद् ब्राह्मणपूर्वाह्ण्योरपीच्छन्ति । ब्रह्मणो ब्राह्मणो । पुव्वण्हो पुव्वाण्हो ॥ दवग्गी । दावग्गी । चडू चाडू । इति शब्दभेदात् सिद्धम् ॥ ६७ ॥

घञ्वृद्धेर्वा ॥ ८ । १ । ६८ ।

घञ्निमित्तो यो वृद्धिरूप आकारस्तस्यादिभूतस्य अद् वा भवति ॥ पवहो पवाहो । पहरो पहारो । पयरो पयारो । प्रकारः प्रचारो वा । पत्थवो पत्थावो ॥ क्वचिन्न भवति । रागः । राओ ॥ ६८ ॥

महाराष्ट्रे ॥ ८ । १ । ६९ ॥

महाराष्ट्रशब्दे आदेराकारस्य अद् भवति ॥ मरहट्ठं । मरहट्ठो ॥ ६९ ॥

मांसादिष्वनुस्वारे ॥ ८ । १ । ७० ॥

मांसप्रकारेषु अनुस्वारे सति आदेरातः अद् भवति ॥ मंसं । पंसू । पंसणो । कंसं । कंसिओ । वंसिओ पंडवो संसिद्धिओ । संजत्तिओ ॥ अनुस्वार इति किम् । मासं । पासू ॥ मांस । पांसु । पांसन । कांस्य । कांसिक । वांशिक । पाण्डव । सांसिद्धिक । सांयात्रिक । इत्यादि ॥७०॥

श्यामाके मः ॥ ८।१।७१ ॥

श्यामाके मस्य आतः अद् भवति ॥ सामओ ॥ ७१ ॥

इः सदादौ वा ॥८।१।७२ ॥

सदादिषु शब्देषु आत इत्वं वा भवति ॥ सइ सया । निसि-अरो निसा अरो । कुप्पिसो कुप्पासो ॥ ७२ ॥

आचार्ये चेच ॥ ८।१।७३ ॥

आचार्यशब्दे चस्य आत इत्वम् अत्वं च भवति ॥ आइरिओ । आयरिओ ॥ ७३ ॥

ईः स्त्यान-खल्वाटे ॥ ८।१।७४ ॥

स्त्यानखल्वाटयोरादेरात ईर्भवति ॥ ठीणं । थीणं । थिण्णं । खल्लीडो ॥ संखायम् इति तु **'समः स्त्यः खा'** (८-४-१५) इति खादेशे सिद्धम् ॥७४॥

उः सास्ना-स्तावके ॥ ८।१।७५ ॥

अनयोरादेरात उत्वं भवति ॥ सुण्हा । थुवओ ॥ ७५ ॥

ऊद्वासारे ॥ ८।१।७६ ॥

आसारशब्दे आदेरात ऊद् वा भवति ॥ ऊसारो । आसारो ॥ ७६ ॥

आर्यायां र्यः श्वश्वाम् ॥७।१।७७॥

आर्याशब्दे श्वश्वां वाच्यायां र्यस्यात ऊर्भवति ॥ अज्जू ॥ श्वश्वामिति किम् । अज्जा ॥ ७७ ॥

एद् ग्राह्ये ॥८।१।७८॥

ग्राह्यशब्दे आदेरात एद् भवति ॥ गेज्झं ॥ ७८ ॥

द्वारे वा ॥ ८।१।७९ ॥

द्वारशब्दे आत एद् वा भवति ॥ देरं । पक्षे । दुआरं दारं बारं ॥ कथं नेरइओ नारइओ । नैरयिकनारकिकशब्दयोर्भविष्यति ॥ आर्षे अन्यत्रापि । पच्छेकम्मं । असहेज्ज देवासुरा ॥ ७९ ॥

पारापते रो वा ॥८।१।८०॥

पारापतशब्दे रस्थस्यात एद् वा भवति ॥ पारेवओ पारावओ ॥८० ॥

मात्रटि वा ॥८।१।८१॥

मात्रट्प्रत्यये आत एद् वा भवति ॥ एत्तिअमेत्तं । एत्तिअमत्तं ॥ बहुलाधिकारात् क्वचिन्मात्रशब्देपि । भोअण-मेत्तं ॥८१॥

उदोद्वार्द्रे ॥ ८।१।८२॥

आर्द्रशब्दे आदेरात उद् ओच्च वा भवतः ॥ उल्लं । ओल्लं । पक्षे । अल्लं । अद्दं । बाह-सलिल-पवहेण उल्लेइ ॥ ८२ ॥

ओदाल्यां पङ्क्तौ ॥८।१।८३॥

आलीशब्दे पङ्क्तिवाचिनि आत ओत्वं भवति ॥ ओली । पङ्क्ताविति किम् । आली सखी ॥ ८३ ॥

ह्रस्वः संयोगे ॥८।१।८४॥

दीर्घस्य यथादर्शनं संयोगे परे ह्रस्वो भवति ॥ आत् । आम्रम् । अम्बं । ताम्रम् । तम्बं ॥ विरहाग्निः । विरहग्गी ॥ आस्यम् । अस्सं ॥ ईत् । मुनीन्द्रः । मुणिन्दो ॥ तीर्थम् । तित्थं ॥ ऊत् । गुरूल्लापाः । गुरुल्लावा ॥ चूर्णः । चुण्णो ॥ एत् । नरेन्द्रः । नरिन्दो ॥ म्लेच्छः । मिलिच्छो ॥ दिट्ठिक्कथण-वट्टं ॥ ओत् । अधरोष्ठः । अहरुट्ठं ॥ नीलोत्पलम् । नीलुप्पलं ॥ संयोग इति किम् । आयासं । ईसरो । ऊसवो ॥ ८४ ॥

इत एद्वा ॥८।१।८५॥

संयोग इति वर्तते । आदेरिकारस्य संयोगे परे एकारो वा भवति ॥ पेण्डं पिण्डं । धम्मेल्लं धम्मिल्लं । सेन्दूरं सिन्दूरं । वेण्हू विण्हू । पेट्ठं पिट्ठं । बेल्लं बिल्लं ॥ क्वचिन्न भवति । चिन्ता ॥ ८५ ॥

किंशुके वा ॥८।१।८६॥

किंशुकशब्दे आदेरित एकारो वा भवति ॥ केसुअं किंसुअं ॥ ८६ ॥

मिरायाम् ॥८।१।८७॥

मिराशब्दे इत एकारो भवति ॥ मेरा ॥ ८७ ॥

पृथ्वि–पृथिवि–प्रतिश्रुन्मूषिक–हरिद्रा–बिभीतकेष्वेत् ॥८।१।८८॥

एषु आदेरितोकारो भवति ॥ पहो । पुहई । पुढवी । पडंसुआ । मूसओ । हलद्दी । हलद्दा । बहेडओ ॥ पन्थं किर देसित्तेति तु पथिशब्दसमानार्थस्य पन्थशब्दस्य भविष्यति ॥ हरिद्रायां विकल्प इत्यन्ये । हलिद्दी हलिद्दा॥८८॥

शिथिलेङ्गुदे वा ॥८।१।८९॥

अनयोरादेरितोद् वा भवति ॥ सढिलं । पसढिलं । सिढिलं । पासिढिलं अङ्गुअं । इङ्गुअं ॥ निर्मितशब्दे तु वा आत्वं न विधेयम् । निर्मातनिर्मितशब्दाभ्यामेव सिद्धेः ॥ ८९ ॥

तित्तिरौ रः ॥८।१।९०॥

तित्तिरिशब्दे रस्येतोद् भवति ॥ तित्तिरो ॥ ९० ॥

इतौ तो वाक्यादौ ॥८।१।९१॥

वाक्यादिभूते इतिशब्दे यस्तस्तत्संबन्धिन इकारस्य अकारो भवति ॥ इअ जम्पिआवसाणे । इअ विअसिअ-कुसुम-सरो ॥ वाक्यादाविति किम् । पिओ त्ति । पुरिसो त्ति ॥ ९१ ॥

ईर्जिह्वा–सिंह–त्रिंशद्विंशतौ त्या ॥८।१।९२॥

जिह्वादिषु इकारस्य तिशब्देन सह ईर्भवति ॥ जीहा । सीहो । तीसा । वीसा ॥ बहुलाधिकारात् क्वचिन्न भवति । सिंह-दत्तो । सिंह-राओ ॥९२॥

लुकि निरः ॥८ । १ । ९३ ॥

निर उपसर्गस्य रेफलोपे सति इत ईकारो भवति ॥ नीसरइ । नीसासो ॥ लुकीति किम् । निण्णओ । निस्सहाइं अङ्गाइं ॥ ९३ ॥

द्विन्योरुत् ॥८ । १ । ९४ ॥

द्विशब्दे नावुपसर्गे च इत उद् भवति ॥ दुवि । दु-मत्तो । दु-आई । दु-विहो । दु-रेहो । दु-वयणं । बहुलाधिकारात् क्वचिद् विकल्पः । दु-उणो । बि-उणो । दुइओ बिइओ ॥ क्वचिन्न भवति । द्विजः । दिओ ॥ द्विरदः । दिरओ ॥ क्वचिद् ओत्वमपि । दो-वयणं ॥ नि । णुमज्जइ । णुमन्नो ॥ क्वचिन्न भवति । निवडइ ॥ ९४ ॥

प्रवासीक्षौ ॥ ८ । १ । ९५ ॥

अनयोरादेरित उत्वं भवति ॥ पावासुओ । उच्छू ॥ ९५ ॥

युधिष्ठिरे वा ॥ ८। १ । ९६ ॥

युधिष्ठिरशब्दे आदेरित उत्वं वा भवति ॥ जहुट्ठिलो । जहिट्ठिलो॥९६॥

ओच्च द्विधाकृगः ॥८।१।९७॥

द्विधाशब्दे कृग्धातोः प्रयोगे इत ओत्वं चकारादुत्वं च भवति ॥ दोहा-किज्जइ । दुहा-किज्जइ ॥ दोहा-इअं । दुहा-इअं ॥ कृग इति किम् । दिहा-गयं ॥ क्वचित् केवलस्यापि । दुहावि सो सुर-वहू-सत्थो ॥ ९७ ॥

वा निर्झरे ना ॥८।१।९८॥

निर्झरशब्दे नकारेण सह इत ओकारो वा भवति ॥ ओज्झरो निज्झरो॥९८॥

हरीतक्यामीतोत् ॥८।१।९९॥

हरीतकीशब्दे आदेरीकारस्य अद् भवति ॥ हरडई ॥ ९९ ॥

आत्कश्मीरे ॥८।१।१००॥

कश्मीरशब्दे ईत आद् भवति ॥ कम्हारा ॥ १०० ॥

पानीयादिष्वित्॥८।१।१०१॥

पानीयादिषु शब्देषु ईत इद् भवति ॥ पाणिअं । अलिअं । जिअइ । जिअउ । बिलिअं । करिसो । सिरिसो । दुइअं । तइअं । गहिरं । उवणिअं । आणिअं । पलिविअं । ओसिअन्तं । पसिअ । गहिअं । वम्मिओ तत्राणिं ॥ पानीय । अलीक ॥ जीवति । जीवतु । व्रीडित । करीष । शिरीष । द्वितीय । तृतीय । गभीर । उपनीत । आनीत । प्रदीपित । अवसीदत् । प्रसीद । गृहीत । वल्मीक । तदानीम् । इति पानीयादयः ॥ बहुलाधिकारादेषु क्वचिन्नित्यं क्वचिद् विकल्पः । तेन । पाणीअं । अलीअं । जीअइ । करीसो । उवणीओ । इत्यादि सिद्धम् ॥ १०१ ॥

उज्जीर्णे ॥ ८।१।१०२ ॥

जीर्णशब्दे ईत उद् भवति ॥ जुण्ण-सुरा ॥ क्वचिन्न भवति । जिण्णे भोअणमत्ते ॥ १०२ ॥

ऊहीन–विहीने वा ॥ ८।१।१०३ ॥

अनयोरीत ऊत्वं वा भवति ॥ हूणो हीणो । विहूणो विहीणो ॥ विहीन इति किम् । पहिण-जर मरण ॥ १०३ ॥

तीर्थे हे ॥ ८।१।१०४ ॥

तीर्थशब्दे हे सति ईत ऊत्वं भवति ॥ तूहं ॥ ह इति किम् । तित्थं ॥ १०४ ॥

एत्पीयूषापीड-विभीतक-कीदृशेदृशे ॥ ८।१।१०५ ॥

एषु ईत एत्वं भवति ॥ पेऊसं । आमेलो । बहेडओ । केरिसो । एरिसो ॥ १०५ ॥

नीड-पीठे वा ॥ ८।१।१०६ ॥

अनयोरीत एत्वं वा भवति ॥ नेडं नीडं । पेढं पीढं ॥ १०६ ॥

उतो मुकुलादिष्वत् ॥ ८।१।१०७ ॥

मुकुल इत्येवमादिषु शब्देषु आदेरुतोत्वं भवति ॥ मउलं । मउलो । मउरं । मउडं । अगरुं । गरुई । जहुट्ठिलो । जहिट्ठिलो । सोअमल्लं । गलोई ॥ मुकुल । मुकुर । मुकुट । अगुरु । गुर्वी । युधिष्ठिर । सौकुमार्य । गुडूची । इति मुकुलादयः ॥ क्वचिदाकारोपि । विदुतः । विद्दाओ ॥१०७॥

वोपरौ ॥ ८।१।१०८ ॥

उपरावुतोद् वा भवति ॥ अवरिं । उवरिं ॥ १०८ ॥

गुरौ के वा ॥ ८।१।१०९ ॥

गुरौ स्वार्थे के सति आदेरुतोद् वा भवति ॥ गरुओ गुरुओ ॥ क इति किम् । गुरू ॥ १०९ ॥

इर्भ्रुकुटौ ॥ ८।१।११० ॥

भ्रुकुटावादेरुत इर्भवति ॥ भिउडी ॥ ११० ॥

पुरुषे रोः ॥ ८।१।१११ ॥

पुरुषशब्दे रोरुत इर्भवति ॥ पुरिसो । पउरिसं ॥ १११ ॥

ईः क्षुते ॥ ८।१।११२ ॥

क्षुतशब्दे आदेरुत ईत्वं भवति ॥ छीअं ॥ ११२ ॥

उत्सुभग-मुसले वा ॥ ८।१।११३ ॥

अनयोरादेरुत ऊद् वा भवति ॥ सूहवो सुहओ । मूसलं मुसलं ॥११३॥

अनुत्साहोत्सन्ने त्सच्छे ॥ ८।१।११४ ॥

उत्साहोत्सन्नवर्जिते शब्दे यौ त्सच्छौ तयोः परयोरादेरुत ऊद् भवति ॥ त्स । ऊसुओ । ऊसवो । ऊसित्तो । ऊसरइ ॥ छ । उद्गताः शुका यस्मात् सः ऊसुओ । ऊससइ ॥ अनुत्साहोत्सन्न इति किम् । उच्छाहो । उच्छन्नो ॥ ११४ ॥

र्लुकि दुरो वा ॥ ८।१।११५ ॥

दुर्उपसर्गस्य रेफस्य लोपे सति उत ऊत्वं वा भवति ॥ दूसहो दुसहो । दूहवो दुहवो ॥ र्लुकीति किम् । दुस्सहो विरहो ॥ ११५ ॥

ओत्संयोगे ॥ ८।१।११६ ॥

संयोगे परे आदेरुत ओत्वं भवति ॥ तोण्डं । मोण्डं । पोक्खरं । कोट्टिमं । पोत्थओ । लोद्धओ । मोत्था । मोग्गरो । पोग्गलं । कोण्डो । कान्तो । वोक्कन्तं ॥ ११६ ॥

कुतूहले वा ऱ्हस्वश्च ॥ ८।१।११७ ॥

कुतूहलशब्दे उत ओद् वा भवति तत्संनियोगे ऱ्हस्वश्च वा ॥ कोऊहलं कुऊहलं कोउहल्लं ॥ ११७ ॥

अद्भूतः सूक्ष्मे वा ॥ ८।१।११८ ॥

सूक्ष्मशब्दे ऊतोद् वा भवति ॥ सण्हं सुण्हं ॥ आर्षे । सुहुमं ॥११८॥

दुकूले वा लश्च द्विः ॥ ८।१।११९ ॥

दुकूलशब्दे ऊकारस्य अत्वं वा भवति तत्संनियोगे च लकारो द्विर्भवति ॥ दुअल्लं दुऊलं ॥ आर्षे दुगुल्लं ॥ ११९ ॥

ईर्ऊद्ध्वचूढे ॥ ८।१।१२० ॥

उद्ध्वूढशब्दे ऊत ईत्वं वा भवति ॥ उव्वीढं । उव्वूढं ॥ १२० ॥

उर्भ्रू-हनूमत्कण्डूय-ज्ञातूले ॥ ८।१।१२१ ॥

एषु ऊत उत्वं भवति ॥ भुमया । हणुमन्तो । कण्डुअइ । वाउलो ॥१२१॥

मधूके वा ॥ ८।१।१२२ ॥

मधूकशब्दे ऊत उद् वा भवति ॥ महुअं महूअं ॥ १२२ ॥

इदेतौ नूपुरे वा ॥ ८।१।१२३ ॥

नूपुरशब्दे ऊत इत् एत् इत्येतौ वा भवतः ॥ निउरं नेउरं । पक्षे नूउरं ॥ १२३ ॥

ओत्कूष्माण्डी-तूणीर-कूर्पर-स्थूल-ताम्बूल-गुडूची-मूल्ये ॥८।१।१२४॥

एषु ऊत ओद् भवति ॥ कोहण्डी कोहली । तोणीरं । कोप्परं । थोरं । तम्बोलं । गलोई । मोलं ॥ १२४ ॥

स्थूणा–तूणे वा ॥ ८।१।१२५ ॥

अनयोरूत ओत्वं वा भवति ॥ थोणा थूणा । तोणं तूणं ॥ १२५ ॥

ऋतोत् ॥ ८।१।१२६ ॥

आदेर्ऋकारस्य अत्वं भवति ॥ घृतम् । घयं । तृणम् ॥ तणं ॥ कृतम् । कयं ॥ वृषभः । वसहो ॥ मृगः । मओ ॥ घृष्टः । घट्ठो ॥ दुहाइअमिति कृपादिपाठात् ॥ १२६ ॥

आत्कृशा-मृदुक-मृदुत्वे वा ॥ ८।१।१२७ ॥

एषु आदेर्ऋत आद् वा भवति ॥ कासा किसा । माउक्कं मउअं । माउक्कं मउत्तणं ॥ १२७ ॥

इत्कृपादौ ॥ ८।१।१२८ ॥

कृपा इत्यादिषु शब्देषु आदेर्ऋत इत्वं भवति ॥ किवा । हिययं । मिट्ठं रसे एव । अन्यत्र मट्ठं । दिट्ठं । दिट्ठी । सिट्ठं । सिट्ठी । गिण्ठी । पिच्छी । भिऊ । भिङ्गो । भिङ्गारो । सिङ्गारो । सिआलो । घिणा । घुसिणं । विद्धकई । समिद्धी । इद्धी । गिद्धी । निसो । किसाणू । किसरा । किच्छं । तिप्पं । किसिओ । निवो । किच्चा । किई । धिई । किवो । किविणो । किवाणं । विच्चुओ । वित्तं । वित्ती । हिअं । वाहित्तं । बिंहिओ । विसी । इसी । विइण्हो । छिहा । सइ । उक्किट्ठं । निसंसो ॥ क्वचिन्न भवति । रिद्धी ॥ कृपा । हृदय । मृष्ट । दृष्ट । दृष्टि । सृष्ट । सृष्टि । गृष्टि । पृथ्वी । भृगु । भृङ्ग । भृङ्गार । शृङ्गार । शृगाल । घृणा । घुसृण । वृद्धकवि । समृद्धि । ऋद्धि । गृद्धि । कृश । कृशानु ।

कृसरा । कृच्छ्र । तृत । कृषित । नृप । कृत्या । कृति । धृति । कृप । कृपण । कृपाण । वृश्चिक । वृत्त । वृत्ति । हृत । व्याहृत । बृंहित । वृसी । ऋषि । वितृष्ण । स्पृहा । सकृत् । उत्कृष्ट । नृशंस ॥ १२८ ॥

पृष्ठे वानुत्तरपदे ॥ ८।१।१२९ ॥

पृष्ठशब्देनुत्तरपदे ऋत इद् भवति वा ॥ पिट्ठी पट्ठी । पिट्ठि-गरिट्ठविअं ॥ अनुत्तरपद इति किम् । महि-वट्टं ॥ १२९ ॥

मसृण-मृगाङ्क-मृत्यु-शृङ्ग-शृष्टे वा ॥ ८।१।१३०॥

एषु ऋत इद् वा भवति ॥ मसिणं मसणं । मिअङ्को मयङ्को । मिच्चू मच्चू । सिङ्गं सङ्गं । धिट्ठो धट्ठो ॥ १३० ॥

उदृत्वादौ ॥ ८।१।१३१ ॥

ऋतु इत्यादिषु शब्देषु आदेर्ऋत उद् भवति ॥ उऊ । परामुट्ठो । पुट्ठो । पुहई । पउत्ती । पाउसो । पाउओ । भुई । पहुडि । पाहुडं । परहुओ । निहुअं । निउअं । विउअं । संवुअं । वुत्तन्तो । निव्वुअं निव्वुई । वुन्दं । वुन्दावणो । वुड्ढो । वुड्ढी । उसहो । मुणालं । उज्जू । जामाउओ । माउओ । माउआ । भाउओ । पिउओ । पुहुवी ॥ ऋतु । परामृष्ट । स्पृष्ट । प्रवृष्ट । पृथिवी । प्रवृत्ति । प्रावृष् । प्रावृत । भृति । प्रभृति । प्राभृत । परभृत । निभृत । निवृत । विवृत । संवृत । वृत्तान्त । निर्वृत । निर्वृति । वृन्द । वृन्दावन । वृद्ध । वृद्धि । ऋषभ । मृणाल । ऋजु । जामातृक । मातृक । मातृका । भ्रातृक । पितृक । पृथ्वी । इत्यादि ॥ १३१ ॥

निवृत्त–वृन्दारके वा ॥ ८।१।१३२ ॥

अनयोर्ऋत उद् वा भवति ॥ निवुत्तं निअत्तं । वुन्द । रया वन्दारया ॥ १३२ ॥

वृषभे वा वा ॥ ८।१।१३३ ॥

वृषभे ऋतो वेन सह उद् वा भवति ॥ उसहो वसहो ॥ १३३ ॥

गौणान्त्यस्य ॥ ८।१।१३४ ॥

गौणशब्दस्य योन्त्य ऋत् तस्य उद् भवति ॥ माउ-मण्डलं । माउ-

हरं । पिउ-हरं । माउ-सिआ । पिउ-सिआ । पिउ-वणं । पिउ-वई ॥१३४॥

मातुरिद्वा ॥ ८।१।१३५ ॥

मातृशब्दस्य गौणस्य ऋत इद् वा भवति ॥ माइ-हरं । माउ-हरं ॥ क्वचिदगौणस्यापि । माईणं ॥ १३५ ॥

उदूदोन्मृषि ॥ ८।१।१३६ ॥

मृषाशब्दे ऋत उत् ऊत् ओच्च भवति ॥ मुसा । मूसा । मोसा । मुसा-वाओ । मूसा-वाओ । मोसा-वाओ ॥ १३६ ॥

इदुतौ वृष्ट-वृष्टि-पृथङ्-मृदङ्ग-नप्तृके ॥ ८।१।१३७ ॥

एषु ऋत इकारोकारौ भवतः ॥ विट्ठो वुट्ठो । विट्ठी वुट्ठी । पिहं पुहं । मिइङ्गो मुइङ्गो । नत्तिओ नत्तुओ ॥ १३७ ॥

वा बृहस्पतौ ॥ ८।१।१३८ ॥

बृहस्पतिशब्दे ऋत इदुतौ वा भवतः ॥ विहप्फई बुहप्फई । पक्षे । बहप्फई ॥ १३८ ॥

इदेदोद्वृन्ते ॥ ८।१।१३९ ॥

वृन्तशब्दे ऋत इत् एत् ओच्च भवन्ति ॥ विण्टं वेण्टं वोण्टं ॥१३९॥

रिः केवलस्य ॥८।१।१४० ॥

केवलस्य व्यञ्जनेनासंपृक्तस्य ऋतो रिरादेशो भवति ॥ रिद्धी रिच्छो ॥ ॥ १४० ॥

ऋणर्जृषभर्तृषौ वा ८।१॥१४१ ॥

ऋणऋजुऋषभऋतुऋषिषु ऋतो रिर्वा भवति ॥ रिणं अणं । रिज्जू उज्जू । रिसहो उसहो । रिऊ उऊ । रिसी इसी ॥ १४१ ॥

दृशः क्विप्-टक्सकः ॥ ८।१।१४२ ॥

क्विप् टक् सक् इत्येतदन्तस्य दृशेर्धातोर्ऋतो रिरादेशो भवति ॥ सदृक् । सरि-वण्णो । सरि-रूवो । सरि-बन्दीणं ॥ सदृशः । सरिसो ॥ सदृक्षः । सरिच्छो ॥ एवम् एआरिसो । भवारिसो । जारिसो । तारिसो । केरिसो । एरिसो । अन्नारिसो । अम्हारिसो । तुम्हारिसो । टक्सक्साहच-

र्यात् 'त्यदाद्यन्या'दि (हे० ५–१-१५२.) सूत्रविहितः किंविह गृह्यते ॥ १४२ ॥

आदृते ढिः ॥ ८।१।१४३ ॥

आदृतशब्दे ऋतो ढिरादेशो भवति ॥ आढिओ ॥ १४३ ॥

अदृष्टे ॥ ८।१।१४४ ॥

दृष्टशब्दे ऋतोरिरादेशो भवति ॥ दरिओ । दरिअ-सीहेण ॥ १४४ ॥

लृत इलिः क्लृप्त-क्लृन्ने ॥ ८।१।१४५ ॥

अनयोर्लृत इलिरादेशो भवति ॥ किलित्त-कुसुमोवयारेसु ॥ धारा-किलिन्न-वत्तं ॥ १४५॥

एत इद्वा वेदना-चपेटा-देवर-केसरे ॥ ८।१।१४६ ॥

वेदनादिषु एत इत्त्वं वा भवति॥ विअणा वेअणा । चविडा । विअड-चवेडा-विणोआ । दिअरो देवरो ॥ महमहिअ-दसण-किसरं । केसरं ॥ महिला महेला इति तु महिलामहेलाभ्यां शब्दाभ्यां सिद्धम् ॥ १४६ ॥

ऊः स्तेने वा ॥ ८।१।१४७ ॥

स्तेने एत उद् वा भवति ॥ थूणो थेणो ॥ १४७ ॥

ऐत एत् ॥ ८।१।१४८ ॥

ऐकारस्यादौ वर्तमानस्य एत्त्वं भवति ॥ सेला । तेलुक्कं । एरावणो ॥ केलासो । वेज्जो । केढवो । वेहव्वं ॥ १४८ ॥

इत्सैन्धव–शनैश्चरे ॥ ८।१।१४९ ॥

एतयोरैत इत्त्वं भवति ॥ सिन्धवं । सणिच्छरो ॥ १४९ ॥

सैन्ये वा ॥८।१।१५० ॥

सैन्यशब्दे ऐत इद् वा भवति ॥ सिन्नं सेन्नं ॥ १५० ॥

अइर्दैत्यादौ च ॥८।१।१५१॥

सैन्यशब्दे दैत्य इत्येवमादिषु च ऐतो अइ इत्यादेशो भवति । एत्वा-पवादः ॥ सइन्नं । दइच्चो । दइन्नं । अइसरिअं । भइरवो । वइजवणो । दइवअं । वइआलीअं । वइएसो । वइएहो । वइदब्भो । वइस्साणरो ।

कइअवं । वइसाहो । वइसालो । सइरं । चइत्तं ॥ दैत्य । दैन्य । ऐश्वर्य । भैरव । वैजवन । दैवत । वैतालीय । वैदेश । वैदेह । वैदर्भ । वैश्वानर । कैतव । वैशाख । वैशाल । स्वैर । चैत्य । इत्यादि ॥ विश्लेषे न भवति । चैत्यम् । चेइअं ॥ आर्षे । चैत्यवन्दनम् । ची-वन्दणं ॥ १५१ ॥

वैरादौ वा ॥ ८।१।१५२ ॥

वैरादिषु ऐतः अइरादेशो वा भवति । वइरं वेरं । कइलासो केलासो । कइरवं केरवं । वइसवणो वेसवणो । वइसम्पायणो । वेसम्पायणो । वइआलिओ वेआलिओ । वइसिअं वेसिअं । चइत्तो चेत्तो ॥ वैर । कैलास । कैरव । वैश्रवण । वैशम्पायन । वैतालिक । वैशिक । चैत्र ॥ इत्यादि॥१५२॥

एच्च दैवे ॥८।१।१५३॥

दैवशब्दे ऐत एत् अइश्चादेशो भवति । देव्वं दइव्वं दइवं ॥ १५३ ॥

उच्चैर्नीचैस्यअः ॥८।१।१५४॥

अनयोरैतः अअ इत्यादेशो भवति ॥ उच्चअं । नीचअं । उच्चनीचाभ्यां के सिद्धम् । उच्चैर्नीचैसोस्तु रूपान्तरनिवृत्त्यर्थं वचनम् ॥ १५४ ॥

ईर्द्धैर्ये ॥ ८।१।१५५ ॥

धैर्यशब्दे ऐत ईद् भवति ॥ धीरं हरइ विसाओ ॥ १५५ ॥

ओतोद्वान्योन्य-प्रकोष्ठातोद्य-शिरोवेदना-मनोहर-सरोरुहे क्तोश्च वः ॥८।१।१५६॥

एषु ओतोत्त्वं वा भवति तत्संनियोगे च यथासंभवं ककारतकारयोर्वादेशः ॥ अन्नन्नं अन्नुन्नं । पवट्ठो पउट्ठो । आवज्जं आउज्जं । सिर-विअणा सिरो-विअणा । मणहरं मणोहरं । सररुहं सरोरुहं ॥ १५६ ॥

ऊत्सोच्छ्वासे ॥८।१।१५७ ॥

सोच्छ्वासशब्दे ओत ऊद् भवति ॥ सोच्छ्वास । सूसासो ॥ १५७ ॥

गव्यउ-आअः ॥ ८।१।१५८ ॥

गोशब्दे ओतः अउ आअ इत्यादेशौ भवतः ॥ गउओ । गउआ । गाओ । हरस्स एसा गाई ॥ १५८ ॥

औत ओत् ॥८।१।१५९॥

औकारस्यादेरोद् भवति ॥ कौमुदी । कोमुई ॥ यौवनम् । जोव्वणं । कौस्तुभः । कोत्थुहो ॥ कौशाम्बी । कोसम्बी ॥ क्रौञ्चः कोञ्चो ॥ कौशिकः । कोसिओ ॥ १५९ ॥

उत्सौन्दर्यादौ ॥ ८।१।१६० ॥

सौन्दर्यादिषु शब्देषु औत उद् भवति ॥ सुन्देरं सुन्दरिअं । मुञ्जायणो सुण्डो । सुद्धोअणी । दुवारिओ । सुगन्धत्तणं । पुलोमी । सुवण्णिओ ॥ सौन्दर्य । मौञ्जायन । शौण्ड । शौद्धोदनि । दौवारिक । सौगन्ध्य । पौलोमी । सौवर्णिकः ॥ १६० ॥

कौक्षेयके वा ॥ ८।१।१६१ ॥

कौक्षेयकशब्दे औत उद् वा भवति ॥ कुच्छेअयं । कोच्छेअयं ॥१६१॥

अउः पौरादौ च ॥ ८।१।१६२ ॥

कौक्षेयके पौरादिषु च औत अउरादेशो भवति ॥ कउच्छेअयं ॥ पौरः । पउरो । पउर-जणो ॥ कौरवः । कउरवो ॥ कौशलम् । कउसलं ॥ पौरुषम् । पउरिसं ॥ सौधम् । सउहं ॥ गौडः । गउडो ॥ मौलिः । मउली ॥ मौनम् । मउणं ॥ सौराः । सउरा ॥ कौलाः । कउला ॥ १६२ ॥

आच्च गौरवे ॥ ८।१।१६३ ॥

गौरवशब्दे औत आत्वम् अउश्च भवति ॥ गारवं । गउरवं ॥ १६३॥

नाव्यावः ॥ ८।१।१६४ ॥

नौशब्दे औत आवादेशो भवति ॥ नावा ॥ १६४ ॥

एत्त्रयोदशादौ स्वरस्य सस्वरव्यञ्जनेन ॥ ८।१।१६५ ॥

त्रयोदश इत्येवंप्रकारेषु संख्याशब्देषु आदेः स्वरस्य परेण सस्वरेण व्यञ्जनेन सह एद् भवति ॥ तेरह । तेवीसा । तेतीसा ॥ १६५ ॥

स्थविर-विचकिलायस्कारे ॥ ८।१।१६६ ॥

एषु आदेः स्वरस्य परेण सस्वरव्यञ्जनेन सह एद् भवति ॥ थेरो । वेइल्लं । मुद्ध-विअइल्ल-पसूणपुञ्जा इत्यपि दृश्यते । एक्कारो ॥ १६६ ॥

वा कदले ॥ ८।१।१६७ ॥

कदलशब्दे आदेः स्वरस्य परेण सस्वरव्यञ्जनेन सह एद् वा भवति ॥ केलं कयलं । केली कयली ॥ १६७ ॥

वेतः कर्णिकारे ॥ ८।१।१६८ ॥

कर्णिकारे इतः सस्वरव्यञ्जनेन सह एद् वा भवति ॥ कण्णेरो कण्णिआरो ॥ १६८ ॥

अयौ वैत् ॥ ८।१।१६९ ॥

अयिशब्दे आदेः स्वरस्य परेण सस्वरव्यञ्जनेन सह ऐद् वा भवति ॥ ऐ बीहेमि । अइ उम्मत्तिए । वचनादैकारस्यापि प्राकृते प्रयोगः ॥१६९॥

ओत्पूतर-बदर-नवमालिका-नवफलिका-पूगफले ॥ ८।१।१७० ॥

पूतरादिषु आदेः स्वरस्य परेण सस्वरव्यञ्जनेन सह ओद् भवति ॥ पोरो । बोरं । बोरी । नोमालिआ । नोहलिआ पोप्फलं । पोप्फली ॥ १७० ॥

न वा मयूख-लवण-चतुर्गुण-चतुर्थ-चतुर्दश-चतुर्वार-सुकुमार-कुतूहलोदूखलोलूखले ॥ ८।१।१७१ ॥

मयूखादिषु आदेः स्वरस्य परेण सस्वरव्यञ्जनेन सह ओद् वा भवति ॥ मोहो मऊहो । लोणं । इअ लवणुग्गमा । चोग्गुणो चउग्गुणो । चोत्थो चउत्थो । चोत्थी चउत्थी । चोद्दह । चउद्दह । चोद्दसी चउद्दसी । चोव्वारो चउव्वारो । सोमालो सुकुमालो । कोहलं कोउहलं । तइ मन्ने कोहलिए । ओहलो उऊहलो । ओक्खलं । उलूहलं । मोरो मऊरो इति तु मोर-मयूरशब्दाभ्यां सिद्धम् ॥ १७१ ॥

अवापोते ॥ ८।१।१७२ ॥

अवापयोरुपसर्गयोरुत इति विकल्पार्थनिपाते च आदेः स्वरस्य परेण सस्वरव्यञ्जनेन सह ओद् वा भवति ॥ अव । ओअरइ अवयरइ । ओआसो अवयासो ॥ अप । ओसरइ । अवसरइ । ओसारिअं अवसारिअं ॥ उत । ओवणं । ओघणो । उअ वणं । उअ घणो ॥ क्वचिन्न भवति । अवगयं । अवसद्दो । उअ रवी ॥ १७२ ॥

उच्चोपे ॥ ८।१।१७३ ॥ ४

उपशब्दे आदेः स्वरस्य परेण सस्वरव्यञ्जनेन सह ऊत् ओच्चादेशौ वा भवतः ॥ ऊहसिअं ओहसिअं उवहसिअं । ऊज्झाओ ओज्झाओ उवज्झाओ । ऊआसो ओआसो उववासो ॥ १७३ ॥

उमो निषण्णे ॥ ८।१।१७४ ॥

निषण्णशब्दे आदेः स्वरस्य परेण सस्वरव्यञ्जनेन सह उम आदेशो वा भवति ॥ णुमण्णो । णिसण्णो ॥ १७४ ॥

प्रावरणे अङ्गवाऊ ॥ ८।१।१७५ ॥

प्रावरणशब्दे आदेः स्वरस्य परेण सस्वरव्यञ्जनेन सह अङ्ग आउ इत्येतावादेशौ वा भवतः ॥ पङ्गुरणं पाउरणं पावरणं ॥ १७५ ॥

स्वराद्असंयुक्तस्यानादेः ॥ ८।१।१७६ ॥

अधिकारोयम् । यदित ऊर्ध्वमनुक्रमिष्यामस्तत्स्वरात्परस्यासंयुक्तस्यानादेर्भवतीति वेदितव्यम् ॥ १७६ ॥

क-ग-च-ज-त-द-प-य-वां प्रायो लुक् ॥ ८।१।१७७ ॥

स्वरात्परेषामनादिभूतानामसंयुक्तानां कगचजतदपयवानां प्रायो लुग् भवति ॥ क । तित्थयरो । लोओ । सयढं ॥ ग । नओ । नयरं । मयङ्को ॥ च । सई । कय-गहो ॥ ज । रययं । पयावई । गओ ॥ त । विआणं । रसा-यलं । जई ॥ द । गया । मयणो ॥ प । रिऊ । सुउरिसो ॥ य । दयालू । नयणं । विओओ ॥ व । लायण्णं । विउहो । वलयाणलो ॥ प्रायोग्रहणात्कचिन्न भवति । सुकुसुमं । पयागजलं । सुगओ । अगरू । सचावं । विजणं । सुतारं । विदुरो । सपावं । समवाओ । देवो । दाणवो ॥ स्वरादित्येव । संकरो । संगमो । नक्कंचरो । धणंजओ । विसंतवो । पुरंदरो । संवुडो । संवरो ॥ असंयुक्तस्येत्येव । अक्को । वग्गो । अच्चो । वज्जं । धुत्तो । उद्दामो । विप्पो । कज्जं । सव्वं ॥ क्वचित्संयुक्तस्यापि । नक्तंचरः नक्कंचरो ॥ अनादेरित्येव । कालो । गन्धो । चोरो । जारो । तरू । दवो । पावं । वण्णो । यकारस्य तु जत्वम् आदौ वक्ष्यते । समासे

तु वाक्यविभक्त्यपेक्षया भिन्नपदत्वमपि विवक्ष्यते । तेन तत्र यथादर्शनमुभयमपि भवति । सुहकरो सुहयरो । आगमिओ आयमिओ । जलचरो जलयरो । बहुतरो बहुअरो । सुहृदो । सुहओ । इत्यादि ॥ क्वचिदादेरपि । स पुनः । स उण ॥ स च । सो अ । चिह्नं । इन्धं ॥ क्वचित्तस्य जः । पिशाची । पिसाजी ॥ एकत्वम् । एगत्तं ॥ एकः । एगो ॥ अमुकः । अमुगो ॥ असुकः । असुगो ॥ श्रावकः । सावगो । आकारः । आगारो ॥ तीर्थिकरः तित्थगरो ॥ आकर्षः । आगरिसो ॥ लोगस्सुज्जोअगरा । इत्यादिषु तु **'व्यत्ययश्च'** (८-४-४४७) इत्येव कस्य गत्वम् ॥ आर्षे अन्यदपि दृश्यते । आकुञ्चनं । आउण्टणं । अत्र चस्य टत्वम् ॥ १७७ ॥

यमुना-चामुण्डा-कामुकातिमुक्तके मोनुनासिकश्च ॥ ८।१।१७८ ॥

एषु मस्य लुग् भवति लुकि च सति मस्य स्थाने अनुनासिको भवति॥ जँउणा । चाँउण्डा । काँउओ । अणिउँतयं ॥ क्वचिन्न भवति । अइमुन्तयं । अइमुत्तयं ॥ १७८ ॥

नावर्णात्पः ॥ ८।१।१७९ ॥

अवर्णात्परस्यानादेः पस्य लुग् न भवति ॥ सवहो । सावो ॥ अनादेरित्येव । परउट्ठो ॥ १७९ ॥

अवर्णो यश्रुतिः ॥ ८।१।१८० ॥

कगचजेत्यादिना लुकि सति शेषः अवर्णः अवर्णात्परो लघुप्रयत्नतरयकारश्रुतिर्भवति ॥ तित्थयरो । सयढं । नयरं । मयङ्को । कयग्गहो । काय-मणी । रययं । पयावई । रसायलं । पायालं । मयणो । गया । नयणं । दयालू । लायण्णं ॥ अवर्ण इति किम् । सउणो । पउणो । पउरं । राईवं । निहओ । निनओ । वाऊ । कई । अवर्णादित्येव ॥ लोअस्स । देअरो ॥ क्वचिद् भवति । पियइ ॥ १८० ॥

कुब्ज-कर्पर-कीले कः खोपुष्पे ॥ ८ । १ । १८१ ॥

एषु कस्य खो भवति पुष्पं चेत् कुब्जाभिधेयं न भवति ॥ खुज्जो ।

खप्परं । खीलओ ॥ अपुप्प इति किम् । बंधेउं कुज्जय-पसूणं । आर्षेन्यत्रापि । कासितं । खासिअं । कसितं । खसिअं ॥ १८१ ॥

मरकत-मदकले गः कन्दुके त्वादेः ॥ ८।१।१८२ ॥

अनयोः कस्य गो भवति कन्दुके त्वाद्यस्य कस्य ॥ मरगयं । मयगलो । गेन्दुअं ॥ १८२ ॥

किराते चः ॥ ८।१।१८३ ॥

किराते कस्य चो भवति ॥ चिलाओ ॥ पुलिन्द एवायं विधिः । कामरूपिणि तु नेष्यते । नमिमो हर-किरायं ॥ १८३ ॥

शीकरे भ-हौ वा ॥ ८।१।१८४ ॥

शीकरे कस्य भहौ वा भवतः ॥ सीभरो सीहरो । पक्षे । सीअरो ॥ ॥ १८४ ॥

चन्द्रिकायां मः ॥ ८।१।१८५ ॥

चन्द्रिकाशब्दे कस्य मो भवति ॥ चन्दिमा ॥ १८५ ॥

निकष-स्फटिक-चिकुरे हः ॥ ८।१।१८६ ॥

एषु कस्य हो भवति ॥ निहसो । फलिहो । चिहुरो । चिहुरशब्दः संस्कृतेपि इति दुर्गः ॥ १८६ ॥

ख-घ-थ-ध-भाम् ॥ ८।१।१८७ ॥

स्वरात्परेषामसंयुक्तानामनादिभूतानां ख घ थ ध भ इत्येतेषां वर्णानां प्रायो हो भवति ॥ ख । साहा । मुहं मेहला । लिहइ ॥ घ । मेहो । जहणं । माहो । लाहइ ॥ थ । नाहो । आवसहो । मिहुणं । कहइ ॥ ध । साहू । वाहो । बहिरो । बाहइ । इन्द-उणू ॥ भ । सहा । सहावो । नहं । थणहरो । सोहइ ॥ स्वरादित्येव । संखो । संघो । कंथा । बंधो । खंभो ॥ असंयुक्तस्येत्येव । अक्खइ । अग्घइ । कत्थइ । सिद्धओ । बन्धइ । लब्भइ ॥ अनादेरित्येव । गज्जन्ते खे मेहा ॥ गच्छइ घणो ॥ प्राय इत्येव । सरिसवखलो । पलद्द-घणो । अथिरो । जिण-धम्मो । पगट्ट-भओ ॥ नभं ॥ १८७ ॥

पृथकि धो वा ॥ ८।१।१८८ ॥

पृथक्शब्दे थस्य धो वा भवति ॥ पिधं पुधं । पिहं पुहं ॥ १८८ ॥

शृङ्खले खः कः ॥ ८।१।१८९ ॥

शृङ्खले खस्य को भवति ॥ सङ्कलं ॥ १८९ ॥

पुन्नाग-भागिन्योर्गो मः ॥ ८।१।१९० ॥

अनयोर्गस्य मो भवति ॥ पुन्नामाइं वसन्ते । भामिणी ॥ १९० ॥

छागे लः ॥ ८।१।१९१ ॥

छागे गस्य लो भवति ॥ छालो । छाली ॥ १९१ ॥

ऊत्वे दुर्भग-सुभगे वः ॥ ८।१।१९२ ॥

अनयोरूत्वे गस्य वो भवति ॥ दूहवो । सूहवो ॥ ऊत्व इति किम् । दुहओ । सुहओ ॥ १९२ ॥

खचित-पिशाचयोश्चः स-ल्लौ वा ॥ ८।१।१९३ ॥

अनयोश्चस्य यथासंख्यं स ल इत्यादेशौ वा भवतः ॥ खसिओ खइओ । पिसल्लो पिसाओ ॥ १९३ ॥

जटिले जो झो वा ॥ ८।१।१९४॥

जटिले जस्य झो वा भवति ॥ झडिलो जडिलो ॥ १९४ ॥

टो डः ॥ ८।१।१९५ ॥

स्वरात्परस्यासंयुक्तादेष्टस्य डो भवति ॥ नडो । भडो घडो ॥ घडइ ॥ स्वरादित्येव । घंटा ॥ असंयुक्तस्येत्येव । खट्टा । अनादेरित्येव । टक्को ॥ क्वचिन्न भवति । अटति । अटइ ॥ १९५ ॥

सटा-शकट-कैटभे ढः ॥ ८ । १ । १९६ ॥

एषु टस्य ढो भवति ॥ सढा । सयढो । केढवो ॥ १९६ ॥

स्फटिके लः ॥ ८ । १ । १९७ ॥

स्फटिके टस्य लो भवति ॥ फलिहो ॥ १९७ ॥

चपेटा-पाटौ वा ॥ ८ । १ । १९८ ॥

चपेटाशब्दे प्यन्ते च पटिधातौ टस्य लो वा भवति ॥ चविला चविडा । फालेइ फाडेइ ॥ १९८ ॥

ठो ढः ॥ ८ । १ । १९९ ॥

स्वरात्परस्यासंयुक्तस्यानादेष्ठस्य ढो भवति ॥ मढो । सढो । कमढो । कुढारो । पढइ ॥ स्वरादित्येव । वेकुंठो ॥ असंयुक्तस्येत्येव । चिट्ठइ ॥ अनादेरित्येव । हिअए ठाइ ॥ १९९ ॥

अङ्कोठे ल्लः ॥ ८ । १ । २०० ॥

अङ्कोठे ठस्य द्विरुक्तो लो भवति ॥ अङ्कोल्लतेल-तुप्पं ॥ २०० ॥

पिठरे हो वा रश्च डः ॥ ८ । १ । २०१ ॥

पिठरे ठस्य हो वा भवति तत्सन्नियोगे च रस्य डो भवति ॥ पिहडो पिढरो ॥ २०१ ॥

डो लः ॥ ८ । १ । २०२ ॥

स्वरात्परस्यासंयुक्तस्यानादेर्डस्य प्रायो लो भवति ॥ वडवामुखम् । वलया-मुहं ॥ गरुलो । तलायं । कीलइ ॥ स्वरादित्येव । मोंडं । कोंडं ॥ असंयुक्तस्येत्येव । खग्गो ॥ अनादेरित्येव । रमइ डिम्भो ॥ प्रायोग्रहणात् क्वचिद् विकल्पः । वलिसं वडिसं । दालिमं दाडिमं । गुलो गुडो । णाली णाडी । णलं णडं । आमेलो आवेडो ॥ क्वचिन्न भवत्येव । निबिडं । गाउडो । पीडिअं । नीडं । उडू । तडी ॥ २०२ ॥

वेणौ णो वा ॥ ८ । १ । २०३ ॥

वेणौ णस्य लो वा भवति ॥ वेलू वेणू ॥ २०३ ॥

तुच्छे तश्च-छौ वा ॥ ८ । १ । २०४ ॥

तुच्छशब्दे तस्य च छ इत्यादेशौ वा भवतः ॥ चुच्छं छुच्छं । तुच्छं ॥ २०४ ॥

तगर-त्रसर-तूबरे टः ॥ ८ । १ । २०५ ॥

एषु तस्य टो भवति ॥ टगरो । टसरो । टूवरो ॥ २०५ ॥

प्रत्यादौ डः ॥ ८ । १ । २०६ ॥

प्रत्यादिषु तस्य डो भवति ॥ पडिवन्नं । पडिहासो । पडिहारो । पाडि-प्फद्धी । पडिसारो । पडिनिअत्तं । पडिमा । पडिवया । पडंसुआ । पडि-

करइ । पहुडि । पाहुडं । वावडो । पडाया । बहेडओ । हरडई । मडयं ॥ आर्षे । दुप्कृतम् । दुक्कडं ॥ सुकृतम् । सुकडं ॥ आहृतम् । आहडं ॥ अवहृतम् । अवहडं । इत्यादि ॥ प्राय इत्येव । प्रतिसमयम् । पइसमयं । प्रतीपम् । पईवं ॥ संप्रति । संपइ ॥ प्रतिष्ठानम् । पइट्ठाणं ॥ प्रतिष्ठा । पइट्ठा ॥ प्रतिज्ञा । पइण्णा ॥ प्रति । प्रभृति । प्राभृत । व्याप्तृत । पताका । बिभीतक । हरीतकी । मृतक । इत्यादि ॥ २०६ ॥

इत्वे वेतसे ॥ ८ । १ । २०७ ॥

वेतसे तस्य डो भवति इत्वे सति ॥ वेडिसो ॥ इत्व इति किम् । वेअसो ॥ **'इः स्वप्नादौ'** (८–१–४६) इति इकारो न भवति इत्व इति व्यावृत्तिबलात् ॥ २०७ ॥

गर्भितातिमुक्तके णः ॥ ८ । १ । २०८ ॥

अनयोस्तस्य णो भवति ॥ गब्भिणो । अणिउँतयं ॥ क्वचिन्न भवत्यपि । अइमुत्तयं ॥ कथम् एरावणो । ऐरावणशब्दस्य । एरावओ इति तु ऐरावतस्य ॥ २०८ ॥

रुदिते दिना ण्णः ॥ ८ । १ । २०९ ॥

रुदिते दिना सह तस्य द्विरुक्तो णो भवति ॥ रुण्णं ॥ अत्र केचिद् ऋत्वादिषु द इत्यारब्धवन्तः स तु शौरसेनीमागधीविषय एव दृश्यते इति नोच्यते । प्राकृते हि । ऋतुः । रिऊ । उऊ ॥ रजतम् । रययं ॥ एतद् । एअं ॥ गतः । गओ ॥ आगतः । आगओ ॥ सांप्रतम् । संपयं ॥ यतः । जओ ॥ ततः । तओ ॥ कृतम् । कयं ॥ हतम् । हयं ॥ हताशः । हयासो ॥ श्रुतः । सुओ ॥ आकृतिः । आकिई ॥ निर्वृतः । निव्वुओ ॥ तातः । ताओ ॥ कतरः । कयरो । द्वितीयः । दुइओ । इत्यादयः प्रयोगा भवन्ति । न पुनः उदू रयदमित्यादि ॥ क्वचित् भावेपि **'व्यत्ययश्च'** (८-४-४४७) इत्वे सिद्धम् ॥ दिही इत्येतदर्थं तु **'धृतेर्दिहिः'** (२–१३१) इति वक्ष्यामः ॥ २०९ ॥

सप्ततौ रः ॥ ८ । १ । २१० ॥

सप्ततौ तस्य रो भवति ॥ सत्तरी ॥ २१० ॥

अतसी-सातवाहने लः ॥ ८ । १ । २११ ॥

अनयोस्तस्य लो भवति ॥ अलसी । सालाहणो । सालवाहणो । सालाहणी भासा ॥ २११ ॥

पलिते वा ॥ ८ । १ । २१२ ॥

पलिते तस्य लो वा भवति ॥ पलिलं । पलिअं ॥ २१२ ॥

पीते वो ले वा ॥ ८ ।१। २१३ ॥

पीते तस्य वो वा भवति स्वार्थलकारे परे ॥ पीवलं । पीअलं ॥ ल इति किम् । पीअं ॥ २१३ ॥

वितस्ति–वसति–भरत–कातर–मातुलिङ्गे हः ॥ ८।१।२१४ ॥

एषु तस्य हो भवति ॥ विहत्थी । वसही ॥ बहुलाधिकारात् क्वचिन्न भवति । वसई । भरहो । काहलो । माहुलिङ्गं । मातुलुङ्गशब्दस्य तु माउलुङ्गं ॥ २१४ ॥

मेथि–शिथिर–शिथिल–प्रथमे थस्य ढः ॥८।१।२१५ ॥

एषु थस्य ढो भवति । हापवादः ॥ मेढी । सिढिलो । सिढिलो । पढमो ॥ २१५ ॥

निशीथ–पृथिव्योर्वा ॥८।१।२१६ ॥

अनयोस्थस्य ढो वा भवति ॥ निसीढो । निसीहो । पुढवी । पुहवी ॥ २१६ ॥

दशन–दष्ट–दग्ध–दोला–दण्ड–दर–दाह–दम्भ–दर्भ–कदन–दोहदे दो वा डः ॥ ८।१।२१७ ॥

एषु दस्य डो वा भवति ॥ डसणं दसणं । डट्ठो दट्ठो । डड्ढो दड्ढो । डोला दोला । डण्डो दण्डो । डरो दरो । डाहो दाहो । डम्भो दम्भो । डब्भो दब्भो । कडणं कयणं । डोहलो दोहलो ॥ दरशब्दस्य च भयार्थ-वृत्तेरेव भवति । अन्यत्र दर–दलिअ ॥ २१७ ॥

दंश-दहोः ८।१।२१८ ॥

अनयोर्धात्वोर्दस्य डो भवति ॥ डसइ । डहइ ॥ २१८ ॥

संख्या-गद्गदे रः ॥ ८।१।२१९ ॥

संख्यावाचिनि गद्गदशब्दे च दस्य रो भवति ॥ एआरह । बारह । तेरह । गग्गरं ॥ अनादेरित्येव । ते दस ॥ असंयुक्तस्येत्येव ॥ चउद्दह ॥ २१९ ॥

कदल्यामद्रुमे ॥ ८।१।२२० ॥

कदलीशब्दे अद्रुमवाचिनि दस्य रो भवति ॥ करली ॥ अद्रुम इति किम् । कयली । केली ॥ २२० ॥

प्रदीपि-दोहदे लः ॥ ८।१।२२१ ॥

प्रपूर्वे दीप्यतौ धातौ दोहदशब्दे च दस्य लो भवति ॥ पलीवेइ । पलित्तं । दोहलो ॥ २२१ ॥

कदम्बे वा ॥ ८।१।२२२ ॥

कदम्बशब्दे दस्य लो वा भवति ॥ कलम्बो कयम्बो ॥ २२२ ॥

दीपौ धो वा ॥ ८।१।२२३ ॥

दीप्यतौ दस्य धो वा भवति ॥ धिप्पइ । दिप्पइ ॥ २२३ ॥

कदर्थिते वः ॥ ८।१।२२४ ॥

कदर्थिते दस्य वो भवति ॥ कवट्टिओ ॥ २२४ ॥

ककुदे हः ॥ ८।१।२२५ ॥

ककुदे दस्य हो भवति ॥ कउहं ॥ २२५ ॥

निषधे धो ढः ॥ ८।१।२२६ ॥

निषधे धस्य ढो भवति ॥ निसढो ॥ २२६ ॥

वौषधे ॥ ८ । १ । २२७ ॥

औषधे धस्य ढो वा भवति । ओसढं । ओसहं ॥ २२७ ॥

नो णः ॥ ८।१।२२८ ॥

स्वरात्परस्यासंयुक्तस्यानादेर्नस्य णो भवति ॥ कणयं । मयणो । वयणं ।

नयणं । माणइ । आर्षे । आरनालं । अनिलो । अनलो । इत्यादयपि ॥ २२८ ॥

वादौ ॥ ८ । १ । २२९ ॥

असंयुक्तस्यादौ वर्तमानस्य नस्य णो वा भवति ॥ णरो नरो । णई नई । णेइ नेइ ॥ असंयुक्तस्येत्येव ॥ न्यायः । न्नाओ ॥ २२९ ॥

निम्ब-नापिते ल-ण्हं वा ॥ ८ । १ । २३० ॥

अनयोर्नस्य ल ण्ह इत्येतौ वा भवतः ॥ लिम्बो निम्बो । ण्हाविओ नाविओ ॥ २३० ॥

पो वः ॥ ८ । १ । २३१ ॥

स्वरात्परस्यासंयुक्तस्यानादेः पस्य प्रायो वो भवति ॥ सवहो । सावो । उवसग्गो । पईवो । कासवो । पावं । उवमा । कविलं । कुणवं । कलावो । कवालं । महि-वालो । गो-वइ । तवइ ॥ स्वरादित्येव । कम्पइ ॥ असंयुक्तस्येत्येव । अप्पमत्तो ॥ अनादेरित्येव । सुहेण पढइ ॥ प्राय इत्येव । कई । रिऊ ॥ एतेन पकारस्य प्राप्तयोर्लोपवकारयोर्यस्मिन् कृते श्रुतिसुखमुत्पद्यते स तत्र कार्यः ॥ २३१ ॥

पाटि-परुष-परिघ-परिखा-पनस-पारिभद्रे फः ॥ ८।१।२३२ ॥

ण्यन्ते पटिधातौ परुषादिषु च पस्य फो भवति ॥ फालेइ फाडेइ । फरुसो । फलिहो । फलिहा । फणसो । फालिहद्दो ॥ २३२ ॥

प्रभूते वः ॥ ८।१।२३३ ॥

प्रभूते पस्य वो भवति ॥ वहुत्तं ॥ २३३ ॥

नीपापीडे मो वा ॥ ८।१।२३४ ॥

अनयोः पस्य मो वा भवति ॥ नीमो नीवो । आमेलो आवेडो ॥२३४॥

पापर्द्धौ रः ॥ ८।१।२३५ ॥

पापर्द्धावपदादौ पकारस्य रो भवति ॥ पारद्धी ॥ २३५ ॥

फो भ-हौ ॥ ८।१।२३६ ॥

स्वरात्परस्यासंयुक्तस्यानादेः फस्य भहौ भवतः। क्वचिद् भः । रेफः । रेभो ॥

शिफा । सिभा ॥ क्वचित्तु हः । मुत्ताहलं ॥ क्वचिदुभावपि । सभलं सहलं । सेभालिआ सेहालिआ । सभरी सहरी । गुभइ गुहइ ॥ स्वरादित्येव । गुंफइ ॥ असंयुक्तस्येत्येव । पुप्फं ॥ अनादेरित्येव । चिट्ठइ फणी ॥ प्राय इत्येव । कसण–फणी ॥ २३६ ॥

बो वः ॥ ८ । १ । २३७ ॥

स्वरात्परस्यासंयुक्तस्यानादेर्बस्य वो भवति ॥ अलाबू । अलावू । अलाऊ ॥ शबलः । सवलो ॥ २३७ ॥

बिसिन्यां भः ॥ ८।१।२३८ ॥

बिसिन्यां बस्य भो भवति ॥ भिसिणी ॥ स्त्रीलिङ्गनिर्देशादिह न भवति । बिस–तन्तु–मेलवाणं ॥ २३८ ॥

कबन्धे म–यौ ॥ ८ । १ । २३९ ॥

कबन्धे बस्य मयौ भवतः ॥ कमन्धो कयन्धो ॥ २३९ ॥

कैटभे भो वः ॥ ८ । १ । २४० ॥

कैटभे भस्य वो भवति ॥ केढवो ॥ २४० ॥

विषमे मो ढो वा ॥८। १ । २४१ ॥

विषमे मस्य ढो वा भवति ॥ विसढो । विसमो ॥ २४१ ॥

मन्मथे वः ॥ ८ । १ । २४२ ॥

मन्मथे मस्य वो भवति ॥ वम्महो ॥ २४२ ॥

वाभिमन्यौ ॥ ८ । १ । २४३ ॥

अभिमन्युशब्दे मो वो वा भवति ॥ अहिवन्नू अहिमन्नू ॥ २४३ ॥

भ्रमरे सो वा ॥ ८ । १ । २४४ ॥

भ्रमरे मस्य सो वा भवति ॥ भसलो भमरो ॥ २४४ ॥

आदेर्यो जः ॥ ८ । १ । २४५ ॥

पदादेर्यस्य जो भवति ॥ जसो । जमो । जाइ ॥ आदेरिति किम् । अवयवो । विणओ ॥ बहुलाधिकारात् सोपसर्गस्यानादेरपि । संजमो ।

संजोगो । अवजसो ॥ क्वचिन्न भवति । पओओ ॥ आर्षे लोपोऽपि । यथाख्यातम् । अहक्खायं ॥ यथाजातम् । अहाजायं ॥ २४५ ॥

युष्मद्यर्थपरे तः ॥ ८ । १ । २४६ ॥

युष्मच्छब्देर्थपरे यस्य तो भवति ॥ तुम्हारिसो । तुम्हकेरो ॥ अर्थपर इति किम् । जुम्हदम्ह–पयरणं ॥ २४६ ॥

यष्ट्यां लः ॥ ८ । १ । २४७ ॥

यष्ट्यां यस्य लो भवति ॥ लट्ठी । वेणु–लट्ठी । उच्छु–लट्ठी । महु–लट्ठी ॥ २४७ ॥

वोत्तरीयानीय–तीय–कृद्ये ज्जः ॥ ८ । १ । २४८ ॥

उत्तरीयशब्दे अनीयतीयकृद्यप्रत्ययेषु च यस्य द्विरुक्तो जो वा भवति ॥ उत्तरिज्जं उत्तरीअं ॥ अनीय । करणिज्जं करणीअं । विम्हयणिज्जं विम्हयणीअं । जवाणिज्जं जवणीअं ॥ तीय । बिइज्जो बीओ ॥ कृद्य । पेज्जा पेआ ॥ २४८ ॥

छायायां होकान्तौ वा ॥ ८ । १ । २४९ ॥

अकान्तौ वर्तमाने छायाशब्दे यस्य हो वा भवति ॥ वच्छस्स छाही वच्छस्स छाया । आतपाभावः । सच्छाहं सच्छायं ॥ अकान्ताविति किम् ॥ मुह–छाया । कान्तिरित्यर्थः ॥ २४९ ॥

डाह–वौ कतिपये ॥ ८ । १ । २५० ॥

कतिपये यस्य डाह व इत्येतौ पर्यायेण भवतः ॥ कइवाहं । कइअवं ॥ २५० ॥

किरि–भेरे रो डः ॥ ८ । १ । २५१ ॥

अनयो रस्य डो भवति ॥ किडी । भेडो ॥ २५१ ॥

पर्याणे डा वा ॥ ८ । १ । २५२ ॥

पर्याणे रस्य डा इत्यादेशो वा भवति ॥ पडायाणं पल्लाणं ॥ २५२ ॥

करवीरे णः ॥ ८ । १ । २५३ ॥

करवीरे प्रथमस्य रस्य णो भवति ॥ कणवीरो ॥ २५३ ॥

हरिद्रादौ लः ॥ ८।२।२५४ ॥

हरिद्रादिषु शब्देषु असंयुक्तस्य रस्य लो भवति ॥ हलिद्दी । दलिद्दाइ । दलिद्दो । दालिद्दं । हलिद्दो । जहुट्ठिलो । सिढिलो । मुहलो । चलणो । वलुणो । कलुणो । इङ्गालो । सक्कालो । सोमालो । चिलाओ । फलिहा । फलिहो । फालिहद्दो । काहलो । लुक्को । अवद्दालं । भसलो । जढलं । बढलो । निट्ठुलो ॥ बहुलाधिकाराच्चरणशब्दस्य पादार्थवृत्तेरेव । अन्यत्र चरण–करणं ॥ भ्रमरे ससंनियोगे एव । अन्यत्र भ्रमरो ॥ तथा । जढरं । बढरो । निट्ठुरो इत्याद्यपि ॥ हरिद्रा । दरिद्राति । दरिद्र । दारिद्र्य । हरिद्र । युधिष्ठिर । शिथिर । मुखर । चरण । वरुण । करुण । अङ्गार । सत्कार । सकुमार । किरात । पारिखा । परिध । पारिभद्र । कातर । रुग्ण । अपद्वार । भ्रमर । जठर । बठर । निष्ठुर । इत्यादि ॥ आर्षे दुवाल-सङ्गे इत्याद्यपि ॥ २५४ ॥

स्थूले लो रः ॥८।१।२५५॥

स्थूले लस्य रो भवति ॥ थोरं ॥ कथं थूलभद्दो । स्थूरस्य हरिद्रादिलत्वे भविष्यति ॥२५५॥

लाहल–लाङ्गल–लाङ्गूले वादेर्णः ॥ ८।१।२५६ ॥

एषु आदेर्लस्य णो वा भवति ॥ णाहलो । लाहलो । णङ्गलं । लङ्गलं । णङ्गूलं । लङ्गूलं ॥२५६॥

ललाटे च ॥ ८।१।२५७॥

ललाटे च आदेर्लस्य णो भवति ॥ चकार आदेरनुवृत्त्यर्थः ॥ णिडालं । णडालं ॥ २५७ ॥

शबरे बो मः ॥ ८ । १ । २५८ ॥

शबरे बस्य मो भवति ॥ समरो ॥ २५८ ॥

स्वप्न–नीव्योर्वा ॥८।१।२५९ ॥

अनयोर्वस्य मो वा भवति ॥ सिमिणो । सिविणो । नीमी नीवी ॥ २५९ ॥

श–षोः सः ॥ ८।१। २६० ॥

शकारषकारयोः सो भवति ॥ श। सद्दो । कुसो । निसंसो । वंसो । सामा । सुद्धं । दस । सोहइ । विसइ ॥ ष । सण्डो । निहसो । कसाओ । घोसइ ॥ उभयोरपि । सेसो । विसेसो ॥ २६० ॥

स्नुषायां ण्हो न वा ॥ ८।१।२६१ ॥

स्नुषाशब्दे षस्य ण्हः णकाराक्रान्तो हो वा भवति ॥ सुण्हा सुसा ॥ २६१ ॥

दश–पाषाणे हः ॥ ८।१।२६२ ॥

दशन्शब्दे पाषाणशब्दे च शषोर्यथादर्शनं हो वा भवति ॥ दहमुहो दस-मुहो । दहबलो दस-बलो । दह–रहो दस-रहो । दह दस । एआरह बारह । तेरह । पाहाणो पासाणो ॥ २६२ ॥

दिवसे सः ॥ ८।१।२६३ ॥

दिवसे सस्य हो वा भवति ॥ दिवहो । दिवसो ॥ २६३ ॥

हो घोऽनुस्वारात् ॥ ८।१।२६४ ॥

अनुस्वरात्परस्य हस्य घो वा भवति ॥ सिंघो । सीहो ॥ संघारो । संहारो । क्वचिदननुस्वारादपि । दाहः । दाघो ॥ २६४ ॥

षट्–शमी–शाव–सुधा–सप्तपर्णेष्वादेश्छः ॥ ८।१।२६५ ।

एषु आदेर्वर्णस्य छो भवति ॥ छट्ठो । छट्ठी । छप्पओ । छंमुहो । छमी । छावो । छुवो । छुहा । छत्तिवण्णो ॥ २६५ ॥

शिरायां वा ॥ ८।१।२६६ ॥

शिराशब्दे आदेश्छो वा भवति ॥ छिरा सिरा ॥ २६६ ॥

लुग् भाजन–दनुज–राजकुले जः सस्वरस्य न वा ॥ ८।१।२६७ ॥

एषु सस्वरजकारस्य लुग् वा भवति ॥ भाणं । भायणं । दणु–वहो । दणुअ–वहो । रा-उलं । राय-उलं ॥ २६७ ॥

व्याकरण-प्राकारागते कगोः ॥ ८।१।२६८ ॥

एषु को गश्च सस्वरस्य लुग् वा भवति ॥ वारणं वायरणं । पारो पायारो ॥ आओ आगओ ॥ २६८ ॥

किसलय–कालायस–हृदये यः ॥ ८।१।२६९ ॥

एषु सस्वरयकारस्य लुग् वा भवति ॥ किसलं किसलयं । कालासं । कालासयं । महण्णव–समा सहिआ । जाला ते सहिअएहिं घेप्पन्ति । निसमणुप्पिअ–हिअस्स हिअयं ॥ २६९ ॥

दुर्गादेव्युदुम्बर–पादपतन–पादपीठेन्तर्दः ॥ ८।१।२७० ॥

एषु सस्वरस्य दकारस्य अन्तर्मध्ये वर्तमानस्य लुग् वा भवति ॥ दुग्गा–वी । दुग्गा-एवी । उम्बरो उउम्बरो । पा-वडणं पाय-वडणं । पा-वीढं ॥ पाय–वीढं ॥ अन्तरिति किम् । दुर्गादेव्यामादौ मा भूत् ॥ २७० ॥

यावत्तावज्जीवितावर्त्तमानावट–प्रावारक–देवकुलैवमेवे वः ॥८।१।२७१॥

यावदादिषु सस्वरवकारस्यान्तर्वर्तमानस्य लुग् वा भवति ॥ जा जाव । ता ताव । जीअं जीविअं । अत्तमाणो आवत्तमाणो । अडो अवडो । पारओ पावरओ । दे-उलं देव-उलं । एमेव एवमेव ॥ अन्तरित्येव । एव-मेवेन्त्यस्य न भवति ॥ २७१ ॥

इत्याचार्यश्रीहेमचन्द्रविरचितायां सिद्धहेमचन्द्राभिधानस्वोपज्ञशब्दा-नुशासनवृत्तौ अष्टमस्याध्यायस्य प्रथमः पादः ॥

यद् दोर्मण्डलकुण्डलीकृतधनुर्दण्डेन सिद्धाधिप
क्रीतं वैरिकुलात् त्वया किल दलत्कुन्तावदातं यशः ।
भ्रान्त्वा त्रीणि जगन्ति खेदविवशं तन्मालवीनां व्यधा-
दापाण्डौ स्तनमण्डले च धवले गण्डस्थले च स्थितिम् ॥ १ ॥

अर्हं

संयुक्तस्य ॥ ८।२।१ ॥

अधिकारोयं "**ज्यायामीत्** " (८-२-११५) इति यावत् । यदित उर्ध्वमनुक्रमिष्यामस्तत्संयुक्तस्येति वेदितव्यम् ॥ १ ॥

शक्त-मुक्त-दष्ट-रुग्ण-मृदुत्वे को वा ॥ ८।२।२ ॥

एषु संयुक्तस्य को वा भवति ॥ सक्को सत्तो । मुक्को मुत्तो । डक्को दट्ठो । लुक्को लुग्गो । माउक्कं माउत्तणं ॥ २ ॥

क्षः खः क्वचित्तु छ-झौ ॥८।२।३ ॥

क्षस्य खो भवति । । क्वचित्तु छझावपि ॥ खओ । लक्खणं । क्वचित्तु छझावपि । खीणं । छीणं । झीणं । झिज्जइ ॥ ३ ॥

ष्क-स्कयोर्नाम्नि ॥ ८।२।४॥

अनयोर्नाम्नि संज्ञायां खो भवति ॥ ष्क । पोक्खरं । पोक्खरिणी । निक्खं ॥ स्क । खन्धो। खन्धावारो। अवक्खन्दो ॥ नाम्नीति किम् । दुक्करं । निक्कम्पं । निक्कओ । नमोक्कारो । सक्कयं । सक्कारो । तक्करो ॥ ४ ॥

शुष्क-स्कन्दे वा ॥ ८।२।५ ॥

अनयोः ष्कस्कयोः खो वा भवति ॥ सुक्खं सुक्कं । खन्दो कन्दो ॥५॥

श्वेटकादौ ॥ ८।२।६ ॥

श्वेटकादिषु संयुक्तस्य खो भवति॥ खेडओ। श्वेटकशब्दो विषपर्यायः ॥ श्वोटकः । खोडओ ॥ स्फोटकः । खोडओ ॥ स्फेटकः । खेडओ ॥ स्फेटिकः । खेडिओ ॥ ६ ॥

स्थाणावहरे ॥ ८।२।७॥

स्थाणौ संयुक्तस्य खो भवति हरश्चेद् वाच्यो न भवति ॥ खाणू ॥ अहर इति किम् । थाणुणो रेहा ॥ ७ ॥

स्तम्भे स्तो वा ॥ ८।२।८ ॥

स्तम्भशब्दे स्तस्य खो वा भवति ॥ खम्भो । थम्भो । काष्ठादिमयः ॥ ८ ॥

थ–ठावस्पन्दे ॥ ८।२।९ ॥

स्पन्दाभाववृतौ स्तम्भे स्तस्य थठौ भवतः ॥ थम्भो । ठम्भो । स्तभ्यते । थम्भिज्जइ । ठम्भिज्जइ ॥ ९ ॥

रक्ते गो वा ॥ ८ । २ । १० ॥

रक्तशब्दे संयुक्तस्य गो वा भवति ॥ रग्गो रत्तो ॥ १० ॥

शुल्के ङ्को वा ॥ ८।२।११ ॥

शुल्कशब्दे संयुक्तस्य ङ्को वा भवति ॥ सुङ्कं सुक्कं ॥ ११ ॥

कृत्ति–चत्वरे चः ॥ ८।२।१२ ॥

अनयोः संयुक्तस्य चो भवति ॥ किच्ची । चच्चरं ॥१२॥

त्योचैत्ये ॥ ८।२।१३ ॥

चैत्यवर्जिते त्यस्य चो भवति ॥ सच्चं पच्चओ ॥ अचैत्य इति किम् । चइत्तं ॥ १३ ॥

प्रत्यूषे षश्च हो वा ॥ ८।२ । १४ ॥

प्रत्यूषे त्यस्य चो भवति तत्संनियोगे च षस्य हो वा भवति ॥ पच्चूहो । पच्चूसो ॥ १४ ॥

त्व–थ्व–द्व–ध्वां च–छ–ज–झाः क्वचित् ॥ ८ ।२।१५॥

एषां यथासंख्यमेते क्वचित् भवन्ति ॥ भुक्त्वा । भोच्चा ॥ ज्ञात्वा । णच्चा ॥ श्रुत्वा । सोच्चा ॥ पृथ्वी । पिच्छी ॥ विद्वान् । विज्जं ॥ बुध्द्वा । बुज्झा ॥

भोच्चा सयलं पिच्छिं विज्जं बुज्झा अणण्णय–गामि ।
चइऊण तवं काउं सन्ती पत्तो सिवं परमं ॥१५॥

वृश्चिके श्चेर्च्छुर्वा ॥ ८ । २ । १६ ॥

वृश्चिके श्चेः सस्वरस्य स्थाने च्छुरादेशो वा भवति । छापवादः ॥ विच्छुओ विंचुओ । पक्षे । विञ्छिओ ॥ १६ ॥

छोक्ष्यादौ ॥ ८।२।१७ ॥

अक्ष्यादिषु संयुक्तस्य छो भवति । खस्यापवादः ॥ अच्छि । उच्छू ।

लच्छी । कच्छो । छीअं। छीरं । सरिच्छो । वच्छो । मच्छिआ । छेत्तं । छुहा । दच्छो । कुच्छी । वच्छं । छुण्णो । कच्छा । छारो । कुच्छेअयं । छुरो । उच्छा । छयं । सारिच्छं ॥ अक्षि । इक्षु । लक्ष्मी । कक्ष । क्षुत । क्षीर । सदृक्ष । वृक्ष । मक्षिका । क्षेत्र । क्षुध् । दक्ष । कुक्षि । वक्षस् । क्षुण्ण । कक्षा । क्षार । कौक्षेयक । क्षुर । उक्षन् । क्षत । सादृश्य ॥ क्वचित् स्थगितशब्देपि । छइअं ॥ आर्षे । इक्खू । खीरं । सारिक्ख-मित्याद्यपि दृश्यते ॥१७॥

क्षमायां कौ ॥ ८।२ । १८ ॥

कौ पृथिव्यां वर्तमाने क्षमाशब्दे संयुक्तस्य छो भवति । छमा पृथिवी ॥ लाक्षणिकस्यापि क्ष्मादेशस्य भवति । क्ष्मा । छमा ॥ कावितो किम् । खमा क्षान्ति ॥ १८ ॥

ऋक्षे वा ॥ ८।२।१९ ॥

ऋक्षशब्दे संयुक्तस्य छो वा भवति ॥ रिच्छं । रिक्खं । रिच्छो । रिक्खो ॥ कथं छूढं क्षिप्तं । **"वृक्ष-क्षिप्तयो रुक्ख-छूढौ"** (८-२-१२७) इति भविष्यति ॥ १९ ॥

क्षण उत्सवे ॥ ८ । २। २० ॥

क्षणशब्दे उत्सवाभिधायिनि संयुक्तस्य छो भवति ॥ छणो ॥ उत्सव इति । किम् । खणो ॥ २० ॥

ह्रस्वात् थ्य-श्च-त्स-प्सामनिश्चले ॥ ८ । २ । २१ ॥

ह्रस्वात्परेषां थ्यश्चत्सप्सां छो भवति निश्चले तु न भवति ॥ थ्य । पच्छं । पच्छा । मिच्छा ॥ श्च । पच्छिमं । अच्छेरं । पच्छा ॥ त्स । उच्छाहो । मच्छरो । मच्छरो । संवच्छलो । चिइच्छइ ॥ प्स । लिच्छइ । जुगुच्छइ । अच्छरा ॥ ह्रस्वादिति किम् । ऊसारिओ ॥ अनिश्चल इति किम् । निच्चलो ॥ आर्षे तथ्ये चोपि । तच्चं ॥२१॥

सामर्थ्योत्सुकोत्सवे वा ॥ ८ । २ । २२ ॥

एषु संयुक्तस्य छो वा भवति ॥ सामच्छं सामत्थं । उच्छुओ ऊसुओ । उच्छवो ऊसवो ॥ २२ ॥

स्पृहायाम् ॥८।२।२३॥

स्पृहाशब्दे संयुक्तस्य छो भवति । फस्यापवादः ॥ छिहा ॥ बहुलाधिकाराच्कचिदन्यदपि । निप्पिहो ॥ २३ ॥

द्य–य्य–र्यां जः ॥ ८ । २ । २४ ॥

एषां संयुक्तानां जो भवति ॥ द्य । मज्जं । अवज्जं । वेज्जो । जुई । जोओ ॥ य्य । जज्जो । सेज्जा ॥ र्य । भज्जा । चौर्यसमत्वात् । भारिआ । कज्जं । वज्जं । पज्जाओ । पज्जत्तं । मज्जाया ॥ २४ ॥

अभिमन्यौ ज–ञ्जौ वा ॥ ८ । २ । २५ ॥

अभिमन्यौ संयुक्तस्य जो ञ्जश्च वा भवति ॥ अहिमज्जू । अहिमञ्जू । पक्षे । अहिमन्नू ॥ अभिग्रहणादिह न भवति मन्नू ॥ २५ ॥

साध्वस--ध्य--ह्यां झः ॥ ८ । २ । २६ ॥

साध्वसे संयुक्तस्य ध्यह्ययोश्च झो भवति ॥ सज्झसं ॥ ध्य । वज्झए । झाणं । उवज्झाओ । सज्झाओ । सज्झं । विज्झो ॥ ह्य । सज्झो । मज्झं । गुज्झं । णज्झइ ॥ २६ ॥

ध्वजे वा ॥ ८ । २ । २७॥

ध्वजशब्दे संयुक्तस्य झो वा भवति ॥ झओ धओ ॥ २७ ॥

इन्धौ झा ॥ ८ । २ । २८ ॥

इन्धौ धातौ संयुक्तस्य झा इत्यादेशो भवति । सामिज्झाइ । विज्झाइ ॥ २८ ॥

वृत्त--प्रवृत्त--मृत्तिका--पत्तन--कदर्थिते टः ॥ ८ । २ । २९ ॥

एषु संयुक्तस्य टो भवति ॥ वट्टो । पयट्टो । मट्टिआ । पट्टणं । कवट्टिओ ॥ २९ ॥

र्त्तस्याधूर्तादौ ॥ ८ । २ । ३० ॥

र्त्तस्य टो भवति धूर्तादीन् वर्जयित्वा ॥ केवट्टो । वट्टी । जट्टो । पयट्टइ ॥ वट्टल । रायवट्टं । नट्टई । संवट्टिअं ॥ अधूर्तादाविति किम् । धुत्तो । कित्ती । वत्ता । आवत्तणं । निवत्तणं । पवत्तणं । संवत्तणं । आव-

त्तओ । निवत्तओ । निव्वत्तओ । पवत्तओ । संवत्तओ । वतिआ । वात्तिआ । कत्तिओ । उक्कत्तिओ । कत्तरी । मुत्ती । मुत्तो । मुहुत्तो ॥ बहुलाधिकाराद् वट्टा ॥ धूर्त । कीर्ति । वार्ता । आवर्तन । निवर्तन । प्रवर्तन । संवतर्क । आवर्तक । निवर्तक । निर्वर्तक । प्रवर्तक । संवर्तका । वर्तिका । वार्तिका । कार्तिक । उत्कर्तित । कर्तरी । मूर्ति । मूर्त । मुहूर्त । इत्यादि ॥३०॥

वृन्ते ण्टः ॥ ८।२।३१ ॥

वृन्ते संयुक्तस्य ण्टो भवति ॥ वेण्टं । तालवेण्टं ॥ ३१ ॥

ठोस्थि–विसंस्थुले ॥ ८।२।३२ ॥

अनयोः संयुक्तस्य ठो भवति ॥ अट्ठी । विसंठुलं ॥ ३२ ॥

स्त्यानचतुर्थार्थे वा ॥ ८ । २ । ३३ ॥

एषु संयुक्तस्य ठो वा भवति । ठीणं । थीणं । चउट्ठो । चउत्थो । अट्ठो प्रयोजनम् । अत्थो धनम् ॥

ष्टस्यानुष्ट्रेष्टासंदष्टे ॥ ८ । २ । ३४ ॥

उष्ट्रादिवर्जिते ष्टस्य ठो भवति ॥ लट्ठी । मुट्ठी । दिट्ठी । सिट्ठी । पुट्ठो । कट्ठं । सुरट्ठा । इट्ठो । अणिट्ठं ॥ अनुष्ट्रेष्टासंदष्ट इति किम् । उट्टो । इट्टाचुण्णं व । संदट्टो ॥ ३४ ॥

गर्ते डः ॥ ८।२।३५ ॥

गर्तशब्दे संयुक्तस्य डो भवति । टापवादः ॥ गड्डो । गड्डा ॥ ३५ ॥

संमर्द–वितर्दि–विच्छर्द्–च्छर्दि–कपर्द–मर्दिते र्दस्य ॥ ८।२।३६ ॥

एषु र्दस्य डत्वं भवति ॥ सम्मड्डो । विअड्डी । विच्छड्डो । छड्डइ । छड्डी । कवड्डो । मड्डिओ । सम्मड्डिओ ॥ ३६ ॥

गर्दभे वा ॥ ८।२।३७ ॥

गर्दभे र्दस्य डो वा भवति ॥ गड्डहो । गद्दहो ॥ ३७ ॥

कन्दरिका–भिन्दिपाले ण्डः ॥ ८।२।३८ ॥

अनयोः संयुक्तस्य ण्डो भवति ॥ कण्डलिआ । भिण्डिवालो ॥ ३८ ॥

स्तब्धे ठ-ढौ ॥ ८।२।३९ ॥

स्तब्धे संयुक्तयोर्यथाक्रमं ठढौ भवतः ॥ ठड्ढो ॥ ३९ ॥

दग्ध-विदग्ध-वृद्धि-वृद्धे ढः ॥ ८।२।४० ॥

एषु संयुक्तस्य ढो भवति ॥ दड्ढो । विअड्ढो । वुड्ढी । वुड्ढो ॥ क्वचिन्न भवति । विद्ध-कइ-निरूविअं ॥ ४० ॥

श्रद्धर्द्धि-मूर्धाधन्ते वा ॥ ८।२।४१ ॥

एषु अन्ते वर्तमानस्य संयुक्तस्य ढो वा भवति ॥ सड्ढा सद्धा । इड्ढी रिद्धी । मुण्ढा मुद्धा । अड्ढं अद्धं ॥ ४१ ॥

ण्ण्योर्णः ॥ ८।२।४ ॥

अनयोर्णो भवति ॥ ण्ण । निण्णं । पज्जुण्णो ॥ ज्ञ । णाणं । सण्णा । पण्णा । विण्णाणं ॥ ४२ ॥

पंचाशत्पंचदश-दत्ते ॥ ८।२।४३ ॥

एषु संयुक्तस्य णो भवति ॥ पण्णासा । पण्णरह । दिण्णं ॥ ४३ ॥

मन्यौ न्तो वा ॥ ८।२।४४ ॥

मन्युशब्दे संयुक्तस्य न्तो वा भवति ॥ मन्तू मन्नू ॥ ४४ ॥

स्तस्य थोसःस्त-स्तम्बे ॥ ८।२।४५ ॥

समस्तस्तम्बवर्जिते स्तस्य थो भवति ॥ हत्थो । थुई । थोत्तं । थोअं । पत्थरो । पसत्थो । अत्थि । सत्थि ॥ असमस्तस्तम्ब इति किम् । समत्तो तम्बो ॥ ४५ ॥

स्तवे ॥ ८।२।४६ ॥

स्तवशब्दे स्तस्य थो वा भवति ॥ थवो तवो ॥ ४६ ॥

पर्यस्ते थ-ट्टौ ॥ ८।२।४७ ॥

पर्यस्ते स्तस्य पर्यायेण थट्टौ भवतः ॥ पल्लत्थो पल्लट्टो ॥ ४७ ॥

वोत्साहे थो हश्च रः ॥ ८।२।४८ ॥

उत्साहशब्दे संयुक्तस्य थो वा भवति तत्सन्नियोगे च हस्य रः ॥ उत्थारो । उच्छाहो ॥ ४८ ॥

आश्लिष्टे ल–धौ ॥ ८।२।४९ ॥

आश्लिष्टे संयुक्तयोर्यथासंख्यं ल ध इत्येतौ भवतः ॥ आलिद्धो ॥ ४९ ॥

चिन्हे न्धो वा ॥ ८।२।५० ॥

चिह्ने संयुक्तस्य न्धो वा भवति । ण्हापवादः ॥ पक्षे सोपि ॥ चिन्धं इन्धं चिण्हं ॥ ५० ॥

भस्मात्मनोः पो वा ॥ ८।२।५१ ॥

अनयोः संयुक्तस्य पो वा भवति ॥ भप्पो भस्सो । अप्पा अप्पाणो । पक्षे । अत्ता ॥ ५१ ॥

ङ्म–क्मोः ॥ ८।२।५२॥

ङ्मक्मोः पो भवति ॥ कुङ्मलम् । कुम्पलं । रुक्मिणी । रुप्पिणी ॥ क्वचित् च्मोपि । रुच्मी रुप्पी ॥ ५२ ॥

प्प–स्पयोः फः ॥ ८।२।५३ ॥

प्पस्पयोः फो भवति ॥ पुप्पम् । पुप्फं ॥ शप्पम् । सप्फं ॥ निष्पेषः । निप्फेसो ॥ निष्पावः । निप्फावो ॥ स्पन्दनम् । फन्दणं ॥ प्रतिस्पर्धिन् । पाडिप्फद्धी ॥ बहुलाधिकारात् क्वचिद् विकल्पः । बुहप्फई बुहप्पई ॥ क्वचिन्न भवति । निष्पहो । णिप्पुंसणं । परोप्परम् ॥ ५३ ॥

भीष्मे ष्मः ॥ ८।२।५४ ॥

भीष्मे ष्मस्य फो भवति । भिप्फो ॥ ५४ ॥

श्लेष्माणि वा ॥ ८।२।५५ ॥

श्लेष्मशब्दे ष्मस्य फो वा भवति ॥ सेफो सिलिम्हो ॥ ५५ ॥

ताम्राम्रे म्बः ॥ ८।२।५६ ॥

अनयोः संयुक्तस्य मयुक्तो बो भवति ॥ तम्बं । अम्बं ॥ अम्बिर तम्बिर इति देश्यौ ॥ ५६ ॥

ह्मो भो वा ॥ ८।२। ५७॥

ह्मस्य भो वा भवति ॥ जिब्भा जीहा ॥ ५७ ॥

वा विह्वले वौ वश्च ॥ ८।२।५८ ॥

विह्वले ह्वस्य भो वा भवति तत्सन्नियोगे च विशब्दे वस्य वा भो भवति ॥ विब्भलो बिब्भलो विहलो ॥ ५८ ॥

वोर्ध्वे ॥ ८।२। ५९॥

ऊर्ध्वशब्दे संयुक्तस्य भो वा भवति ॥ उब्भं उद्धं ॥ ५९ ॥

कश्मीरे म्भो वा ॥ ८।२।६० ॥

कश्मीरशब्दे संयुक्तस्य म्भो वा भवति ॥ कम्भारा कम्हारा ॥ ६० ॥

न्मो मः ॥ ८।२।६१ ॥

न्मस्य मो भवति । अधोलोपापवादः ॥ जम्मो । वम्महो । मम्मणं ॥६१॥

ग्मो वा ॥ ८।२। ॥६२ ॥

ग्मस्य मो वा भवति ॥ युग्मम् । जुम्मं जुग्गं ॥ तिग्मम् । तिम्मं तिग्गं ॥ ६२ ॥

ब्रह्मचर्य–तूर्य–सौन्दर्य–शौण्डीर्ये र्यो रः ॥ ८।२।६३ ॥

एषु र्यस्य रो भवति । जापवादः ॥ बह्मचेरं । चौर्यसमत्वाद् बह्मचारिअं । तूरं । सुन्देरं । सोण्डीरं ॥ ६३ ॥

धैर्ये वा ॥ ८।२।६४॥

धैर्ये र्यस्य रो वा भवति ॥ धीरं धिज्जं । सूरो सुज्जो इति तु सूरसूर्य-प्रकृतिभेदात् ॥ ६४ ॥

एतः पर्यन्ते ॥ ८।२।६५॥

पर्यन्ते एकारात्परस्य र्यस्य रो भवति ॥ पेरन्तो ॥ एत इति किम् । पज्जन्तो ॥ ६५ ॥

आश्चर्ये ॥८।२।६६॥

आश्चर्ये एतः परस्य र्यस्य रो भवति ॥ अच्छेरं ॥ एत इत्येव । अच्छ-रिअं ॥ ६६॥

अतो रिआर--रिज्ज--रीअं ॥८।२।६७॥

आश्चर्ये अकारात्परस्य र्यस्य रिअ अर रिज्ज रीअ इत्येते आदेशा भवन्ति ॥ अच्छरिअं अच्छअरं अच्छरिज्जं अच्छरीअं ॥ अत इति किम् । अच्छेरं ॥६७॥

पर्यस्त--पर्याण--सौकुमार्ये ल्लः ॥ ८।२।६८॥

एषु र्यस्य ल्लो भवति ॥ पर्यस्तं पल्लट्टं पल्लत्थं । पल्लाणं । सोअमल्लं ॥ पल्लङ्को इति च पल्यङ्कशब्दस्य यलोपे द्वित्वे च ॥ पलिअङ्को इत्यपि चौर्य-समत्वात् ॥ ६८ ॥

बृहस्पति--वनस्पत्योः सो वा ॥ ८।२।६९ ॥

अनयोः संयुक्तस्य सो वा भवति ॥ बहस्सई । बहप्फई । भयस्सई भयप्फई । वणस्सई वणप्फई ॥ ६९ ॥

बाष्पे होश्रुणि ॥८।२।७०॥

बाष्पशब्दे संयुक्तस्य हो भवति अश्रुण्यभिधेये ॥ बाहो नेत्रजलम् ॥ अश्रुणीति किम् ॥ बप्फो ऊष्मा ॥ ७० ॥

कार्षापणे ॥ ८। २ । ७१ ॥

कार्षापणे संयुक्तस्य हो भवति ॥ काहावणो ॥ कथं कहावणो । **ह्रस्वः संयोगे** ' (८–१–८४) इति पूर्वमेव ह्रस्वत्वे पश्चादादेशे । कर्षापणशब्दस्य वा भविष्यति ॥ ७१ ॥

दुःख--दक्षिण--तीर्थे वा ॥८।२। ७२ ॥

एषु संयुक्तस्य हो वा भवति ॥ दुहं दुक्खं । पर--दुक्खे दुक्खिआ विरला । दाहिणो दक्खिणो । तूहं तित्थं ॥ ७२ ॥

कूष्माण्ड्यां ष्मो लस्तु ण्डो वा ॥ ८।२।७३ ॥

कूष्माण्ड्यां ष्मा इत्येतस्य हो भवति ण्ड इत्यस्य तु वा लो भवति ॥ कोहली कोहण्डी ॥ ७३ ॥

पक्ष्म--श्म--ष्म--स्म--ह्मां--म्हः ॥ ८ । २ । ७४ ॥

पक्ष्मशब्दसंबन्धिनः संयुक्तस्य श्मष्मस्मह्मां च मकारोकान्तो हकार

आदेशो भवति ॥ पक्ष्मम् । पम्हाइं । पम्हल-लोअणा ॥ श्म । कुश्मानः कुम्हाणो । कश्मीराः । कम्हारा ॥ ष्म । ग्रीष्मः । गिम्हो । ऊष्मा । उम्हा ॥ स्म । अस्मादृशः । अम्हारिसो । विस्मयः । विम्हओ । ह्म । ब्रह्मा । बम्हा ॥ सुह्माः । सुम्हा ॥ बम्हणो । बम्हचेरं ॥ क्वचित् म्भोपि दृश्यते । बम्भणो । बम्भचेरं । सिम्भो । क्वचिन्न भवति । रश्मिः । रस्सी । स्मरः सरो ॥ ७४ ॥

सूक्ष्म-श्न-ष्ण-स्न-ह्न-ह्म-क्ष्णां ष्हः ॥ ८ । २ । ७५ ॥

सूक्ष्मशब्दसंबन्धिनः संयुक्तस्य श्नष्णस्नह्नह्मक्ष्णां च णकाराक्रान्तो हकार आदेशो भवति ॥ सुक्ष्मं । सण्हं ॥ श्न । पण्हो । सिण्हो ॥ ष्ण । विष्णू । जिष्णू । कण्हो । उण्हीसं ॥ स्न । जोण्हा । ण्हाओ । पण्हुओ ॥ ह्न । वण्ही । जण्हू ॥ ह्म । पुव्वण्हो । अवरण्हो ॥ क्ष्ण । सण्हं । तिण्हं ॥ विप्रकर्षे तु कृष्णकृस्नशब्दयोः कसणो । कसिणो ॥ ७५ ॥

ह्नो ल्हः ॥ ८ । २ । ७६ ॥

ह्नः स्थाने लकाराक्रान्तो हकारो भवति ॥ कल्हारं । पल्हाओ ॥७६॥

क-ग-ट-ड-त-द-प-श-ष-स-ᵏ क-ᵏ पामूर्ध्वं लुक् ॥ ८।२।७७ ॥

एषां संयुक्तवर्णसंबन्धिनामूर्ध्वं स्थितानां लुग् भवति ॥ क । भुत्तं । सित्थं ॥ ग । दुद्धं । मुद्धं ॥ ट । षट्पदः । छप्पओ ॥ कट्फलम् । कप्फलं ॥ ड । खड्गः । खग्गो ॥ षड्जः । सज्जो ॥ त । उप्पलं । उप्पाओ ॥ द । मद्गुः । मग्गू । मोग्गरो ॥ प । सुत्तो । गुत्तो ॥ श । लण्हं । निच्चलो । चुअइ ॥ ष । गोट्ठी । छट्ठो । निट्ठुरो ॥ स । खलिओ । नेहो । ᵏक । दुᵏखम् । दुक्खं ॥ ᵏप । अंतᵏपातः । अंतप्पाओ ॥७७॥

अधो म-न-याम् ॥८ । २ । ७८ ॥

मनयां संयुक्तस्याधो वर्तमानानां लुग् भवति ॥ म । जुग्गं । रस्सी । सरो । सेरं ॥ न । नग्गो । लग्गो ॥ य । सामा । कुड्डं । वाहो ॥ ७८ ॥

सर्वत्र ल-ब-रामवन्द्रे ॥ ८ । २ । ७९ ॥

वन्द्रशब्दादन्यत्र लबरां सर्वत्र संयुक्तस्योर्ध्वमधश्च स्थितानां लुग् भवति ॥

ऊर्ध्वं ॥ ल । उल्का । उक्का ॥ वल्कलम् । वक्कलं ॥ ब । शब्दः । सद्दो ॥ अब्दः । अद्दो ॥ लुब्धकः । लोद्धओ ॥ र । अर्कः । अक्को ॥ वर्गः । वग्गो ॥ अधः । श्लक्ष्णम् । संण्हं ॥ विक्लवः । विक्कवो ॥ पक्वम् । पक्कं पिक्कं ॥ ध्वस्तः । धत्थो ॥ चक्रम् । चक्कं ॥ ग्रहः । गहो ॥ रात्रिः । रत्ती ॥ अत्र द्व इत्यादिसंयुक्तानामुभयप्राप्तौ यथादर्शनं लोपः ॥ क्वचिदू-र्ध्वम् । उद्विग्नः । उव्विग्गो ॥ द्विगुणः । बि-उणो ॥ द्वितीयः । बीओ ॥ कल्मषम् । कम्मसं ॥ सर्वम् । सव्वं ॥ शुल्बम् । सुब्बं ॥ क्वचित्त्वधः । काव्यम् । कव्वं ॥ कुल्या । कुल्ला ॥ माल्यम् । मल्लं ॥ द्विपः । दिओ ॥ द्विजातिः । दुआई ॥ क्वचित्पर्यायेण । द्वारम् । बारं । दारं ॥ उद्विग्नः । उव्विग्गो । उव्विण्णो ॥ अवन्द्र इति किम् । वन्द्रं । संस्कृतसमोयं प्राकृत-शब्दः । अत्रोत्तरेण विकल्पोपि न भवति निषेधसामर्थ्यात् ॥७९॥

द्रे रो न वा ॥ ८ । २ । ८० ॥

द्रशब्दे रेफस्य वा लुग् भवति ॥ चन्दो चन्द्रो । रुद्दो रुद्रो । भद्दं भद्रं । समुद्दो समुद्रो ॥ ह्रदशब्दस्य स्थितिपरिवृत्तौ द्रह इति रूपम् । तत्र द्रहो दहो । केचिद् रलोपं नेच्छन्ति । द्रहशब्दमपि कश्चित् संस्कृतं मन्यते ॥ वोद्रहादयस्तु तरुणपुरुषादिवाचका नित्यं रेफसंयुक्ता देश्या एव । सिक्खन्तु वोद्रहीओ । वोद्रह-द्रहम्मि पडिआ ॥ ८० ॥

धात्र्याम् ॥ ८ । २ । ८१ ॥

धात्रीशब्दे रस्य लुग् वा भवति ॥ धत्ती । ह्रस्वात् प्रागेव रलोपे धाई । पक्षे धारी ॥ ८१ ॥

तीक्ष्णे णः ॥ ८ । २ । ८२ ॥

तीक्ष्णशब्दे णस्य लुग् वा भवति ॥ तिक्खं । तिण्हं ॥ ८२ ॥

ज्ञो ञः ॥ ८ । २ । ८३ ॥

ज्ञः सम्बन्धिनो ञस्य लुग् वा भवति । जाणं णाणं । सव्वज्जो सव्वण्णू । अप्पज्जो अप्पण्णू । दइवज्जो दइवण्णू । इङ्गिअज्जो इङ्गिअण्णू । मणोज्जं मणोण्णं । अहिज्जो अहिण्णू । पज्जा पण्णा । अज्जा आणा । संज्ञा सण्णा ॥ क्वचिन्न भवति । विण्णाणं ॥ ८३ ॥

मध्याह्ने हः ॥ ८ । २ । ८४ ॥

मध्याह्ने हस्य लुग् वा भवति ॥ मज्झन्नो मज्झण्हो ॥ ८४ ॥

दशार्हे ॥ ८ । २ । ८५ ॥

पृथग्योगाद्वेति निवृत्तम् । दशार्हे हस्य लुग् भवति ॥ दसारो ॥ ८५ ॥

आदेः श्मश्रु-श्मशाने ॥ ८।२ । ८६ ॥

अनयोरादेर्लुग् भवति ॥ मासू मंसू मस्सू ॥ मसाणं । आर्षे श्मशान-शब्दस्य सीआणं सुसाणमित्यपि भवति ॥ ८६ ॥

गो हरिश्चन्द्रे ॥ ८।२।८७ ॥

हरिश्चन्द्रशब्दे श्च इत्यस्य लुग् भवति ॥ हरिअन्दो ॥ ८७ ॥

रात्रौ वा ॥ ८।२।८८ ॥

रात्रिशब्दे संयुक्तस्य लुग् वा भवति ॥ राई रत्ती ॥ ८८ ॥

अनादौ शेषादेशयोर्द्वित्वम् ॥ ८।२।८९ ॥

पदस्यानादौ वर्तमानस्य शेषस्यादेशस्य च द्वित्वं भवति ॥ शेष । कप्प-तरू । भुत्तं । दुद्धं । नग्गो । उक्का । अक्को । मुक्खो ॥ आदेश । डक्को । जक्खो । रग्गो । किच्ची । रुप्पी ॥ क्वचिन्न भवति । कसिणो ॥ अनादा-वितिं किम् । खलिअं । थेरो । खम्भो ॥ द्वयोस्तु द्वित्वमस्त्येवेति न भवति विन्हुओ । भिण्डिवालो ॥ ८९ ॥

द्वितीयतुर्ययोरुपरि पूर्वः ॥ ८।२।९० ॥

द्वितीयतुर्ययोर्द्वित्वप्रसङ्गे उपरि पूर्वौ भवतः ॥ द्वितीयस्योपरि प्रथमश्चतुर्थ-स्योपरि तृतीय इत्यर्थः ॥ शेष । वक्खाणं । वग्घो । मुच्छा । निज्झरो ॥ कट्ठं । तित्थं । निद्धणो । गुप्फं । निब्भरो ॥ आदेश । जक्खो ॥ घस्य नास्ति ॥ अच्छी । मज्झं । पट्ठी । वुड्ढो । हत्थो । आलिद्धो । पुप्फं । भिब्भलो ॥ 'तैलादौ' (८-२-९८) द्वित्वे ओक्खलं ॥ सेवादौ (८-२-९९) नक्खं । नेहा ॥ समासे । कइ-द्धओ कइ-धओ ॥ द्वित्व इत्येव । खाओ ॥ ९० ॥

दीर्घ वा ॥ ८।२।९१ ॥

दीर्घशब्दे शेषस्य घस्य उपरि पूर्वो वा भवति ॥ दिग्घो दीहो ॥ ९१ ॥

न दीर्घानुस्वारात् ॥ ८।२।९२ ॥

दीर्घानुस्वाराभ्यां लाक्षणिकाभ्यामलाक्षणिकाभ्यां च परयोः शेषादेशयोर्द्वित्वं न भवति ॥ छूढो । नीसासो । फासो ॥ अलाक्षणिक । पार्श्वम् । पासं ॥ शीर्षम् । सीसं ॥ ईश्वरः । ईसरो ॥ द्वेष्यः । वेसो ॥ लास्यम् । लासं ॥ आस्यम् । आसं ॥ प्रेष्यः । पेसो ॥ अवमाल्यम् । ओमालं ॥ आज्ञा । आणा ॥ आज्ञप्तिः । आणत्ती ॥ आज्ञप्तनं । आणवणं ॥ अनुस्वारात् । व्यस्तम् । तंसं ॥ अलाक्षणिक । संझा । विंझो । कंसालो ॥ ९२ ॥

र-होः ॥ ८।२।९३ ॥

रेफहकारयोर्द्वित्वं न भवति ॥ रेफः शेषो नास्ति ॥ आदेश । सुन्देरं । बम्हचेरं । पेरन्तं ॥ शेषस्य हस्य । विहलो ॥ आदेशस्य । कहावणो ॥ ९३ ॥

धृष्टद्युम्ने णः ॥ ८ । २ । ९४ ॥

धृष्टद्युम्नशब्दे आदेशस्य णस्य द्वित्वं न भवति ॥ धट्ठज्जुणो ॥ ९४ ॥

कर्णिकारे वा ॥ ८।२। ९५ ॥

कर्णिकारशब्दे शेषस्य णस्य द्वित्वं वा न भवति ॥ कणिआरो कण्णिआरो ॥ ९५ ॥

दृप्ते ॥ ८ । २ । ९६ ॥

दृप्तशब्दे शेषस्य द्वित्वं न भवति ॥ दरिअ-सीहेण ॥ ९६ ॥

समासे वा ॥८।२।९७॥

शेषादेशयोः समासे द्वित्वं वा भवति ॥ नइ-ग्गामो नइ-गामो । कुसुम-प्पयरो कुसुम-पयरो । देव-त्थुई । देव-थुई । हर-क्खन्दा हरखन्दा । आणाल-क्खम्भो आणाल-खम्भो । बहुलाधिकारादशेषादेशयोरपि । स-प्पिवासो स-प्पिवासो । बद्ध-प्फलो बद्ध-प्फलो । मलय-सिहर-क्खण्डं मलय-सिहर-खण्डं । पम्मुक्कं पमुक्कं । अद्दंसणं अदंसणं । पडिक्कूलं पडिकूलं । तेलोक्कं तेलोक्कं इत्यादि ॥ ९७ ॥

तैलादौ ॥ ८ । २ । ९८ ॥

तैलादिषु अनादौ यथादर्शनमन्त्यस्यानन्त्यस्य च व्यञ्जनस्य द्वित्वं

भवति ॥ तेलं । मण्डुक्को । वेइल्लं । उज्जू । विड्डा । बहुत्तं ॥ अनन्यस्य । सोत्तं । पेम्मं । जुव्वणं ॥ आर्षे । पडिसोओ । विस्सोअसिआ ॥ तैलं । मंडूक । विचकिल । ऋजु । व्रीडा । प्रभूत । स्रोतस् । प्रेमन् । यौवन । इत्यादि ॥ ९८ ॥

सेवादौ वा ॥ ८।२।९९ ॥

सेवादिषु अनादौ यथादर्शनमन्यस्यानन्यस्य च द्वित्वं वा भवति ॥ सेव्वा सेवा ॥ नेड्डं नीडं । नक्खा नहा । निहित्तो निहिओ । वाहित्तो वाहिओ । माउक्कं माउअं । एक्को एओ । कोउहल्लं कोउहलं । वाउल्लो वाउलो । थुल्लो थोरो । हुत्तं हूअं । दइव्वं दइवं । तुण्हिक्को तुण्हिओ । मुक्को मूओ । खण्णू खाणू । थिण्णं थीणं ॥ अनन्यस्य । अम्हकेरं अम्हकेरं । तंच्चेअ तं चेअ । सो च्चिअ सो चिअ ॥ सेवा । नीड । नख । निहित । व्याहृत । मृदुक । एक । कुतूहल । व्याकुल । थूस्ल । हूत । दैव । तूष्णीक । मूक । स्थाणु । स्त्यान । अस्मदीय । चेअ । चिअ । इत्यादि ॥९९ ॥

शार्ङ्गे ङात्पूर्वात् ॥ ८।२।१०० ॥

शार्ङ्गे ङात्पूर्वे अकारो भवति ॥ सारङ्गं ॥ १०० ॥

क्ष्मा--श्लाघा--रत्नेन्त्यव्यञ्जनात् ॥ ८ । २ । १०१ ॥

एषु संयुक्तस्य यदन्त्यव्यञ्जनं तस्मात्पूर्वोद् भवति ॥ छमा । सलाहा । रयणं । आर्षे सूक्ष्मेपि । सुहुमं ॥ १०१ ॥

स्नेहाग्न्योर्वा ॥८।२।१०२॥

अनयोः संयुक्तस्यान्त्यव्यञ्जनात्पूर्वोकारो वा भवति ॥ सणेहो नेहो । अग्गणी अग्गी ॥ १०२ ॥

प्लक्षे लात् ॥ ८।२।१०३॥

प्लक्षशब्दे संयुक्तस्यान्त्यव्यञ्जनाल्लात्पूर्वोद् भवति ॥ पलक्खो ॥ १०३॥

ह्री--श्री--ह्री--कृत्स्न--क्रिया--दिष्ट्यास्वित् ॥ ८ । २ । १०४ ॥

एषु संयुक्तस्यान्त्यव्यञ्जनात्पूर्व इकारो भवति ॥ ह्री । अरिहइ । अरिहा । गरिहा । बरिहो ॥ श्री । सिरी । ह्री । हिरी ॥ ह्रीतः । हिरीओ ॥

अहीकः । अहिरीओ ॥ कृत्स्नः । कसिणो ॥ क्रिया । किरिआ ॥ आर्षे तु हयं नाणं किया-हीणं ॥ दिष्ट्या । दिट्ठिआ ॥ १०४ ॥

शे-र्ष-तप्त-वज्रे ॥ ८।२।१०५ ॥

शेर्षयोस्तप्तवज्रयोश्च संयुक्तस्यान्त्यव्यञ्जनात्पूर्व इकारो वा भवति ॥ शं । आयरिसो आयंसो । सुदरिसणो सुदंसणो । दरिसणं दंसणं ॥ र्ष । वरिसं वासं । वरिसा वासा । वरिस--सयं वाससयं ॥ व्यवस्थितविभाषया क्वचिन्नित्यम् । परामरिसो । हरिसो । अमरिसो ॥ तप्त । तविओ तत्तो ॥ वज्र । वइरं वज्जं ॥ १०५ ॥

लात् ॥८।२।१०६ ॥

संयुक्तस्यान्त्यव्यञ्जनाल्लात्पूर्व इद् भवति ॥ किलिन्नं । किलिट्ठं । सिलिट्ठं पिलुट्ठं । पिलोसो । सिलिम्हो । सिलेसो । सुक्किलं । सुइलं । सिलोओ । किलेसो । अम्बिलं । गिलाइ । गिलाणं । मिलाइ । मिलाणं । किलम्मइ । किलन्तं । क्वचिन्न भवति ॥ कमो । पवो । पिप्पवो । सुक्क--पक्खो ॥ उत्प्लावयति । उप्पावेइ ॥ १०६ ॥

स्याद्--भव्य--चैत्य--चौर्यसमेषु यात् ॥ ८ । २ । १०७ ॥

स्यादादिषु चौर्यशब्देन समेषु च संयुक्तस्य यात्पूर्व इद् भवति ॥ सिआ । सिआ--वाओ । भविओ । चेइअं ॥ चौर्यसम । चोरिअं । थेरिअं । भारिआ । गम्भीरिअं । गहीरिअं । आयरिओ । सुन्दरिअं । सोरिअं । वीरिअं । वरिअं । सूरिओ । धीरिअं । बम्भचरिअं ॥ १०७ ॥

स्वप्ने नात् ॥ ८।२।१०८॥

स्वप्नशब्दे नकारात्पूर्व इद् भवति ॥ सिविणो ॥ १०८ ॥

स्निग्धे वादितौ ॥ ८।२।१०९ ॥

स्निग्धे संयुक्तस्य नात्पूर्वौ अदितौ वा भवतः ॥ साणिद्धं सिणिद्धं । पक्षे निद्धं ॥ १०९ ॥

कृष्णे वर्णे वा ॥ ८।२।११० ॥

कृष्णे वर्णवाचिनि संयुक्तस्यान्त्यव्यञ्जनात्पूर्वौ अदितौ वा भवतः ॥

कसणो कसिणो कण्हो ॥ वर्ण इति किम् ॥ विष्णौ कण्हो ॥ ११० ॥

उच्चार्हतः ॥ ८।२।१११ ॥

अर्हत्-शब्दे संयुक्तस्यान्त्यव्यञ्जनात्पूर्व उत् अदितौ च भवतः ॥ अदितौ च भवतः ॥ अरुहो अरहो अरिहो । अरुहन्तो अरहन्तो अरिहन्तो ॥ १११ ॥

पद्म-छद्म-मूर्ख-द्वारे वा ॥ ८।२।११२ ॥

एषु संयुक्तस्यान्त्यव्यञ्जनात्पूर्व उद् वा भवति ॥ पउमं पोम्मं । छउमं छम्मं । मुरुक्खो मुक्खो । दुवारं । पक्षे । वारं । देरं । दारं ॥ ११२ ॥

तन्वीतुल्येषु ॥ ८।२।११३ ॥

उकारान्ता ङीप्रत्ययान्तास्तन्वीतुल्याः । तेषु संयुक्तस्यान्त्यव्यजनात् पूर्व उकारो भवति ॥ तणुवी । लहुवी । गुरुवी । बहुवी । पुहुवी । मउवी ॥ क्वचिदन्यत्रापि । सुन्नम् । सुरुग्घं ॥ आर्षे । सूक्ष्मम् । सुहुमं ॥ ११३ ॥

एकस्वरे श्वः-स्वे ॥ ८।२।११४ ॥

एकस्वरे पदे यौ श्वस् स्व इत्येतौ तयोरन्त्यव्यञ्जनात्पूर्व उद् भवति ॥ श्वः कृतम् । सुवे कयं ॥ स्वे जनाः । सुवे जणा । एकस्वर इति किम् । स्व-जनः । स-यणो ॥ ११४ ॥

ज्यायामीत् ॥ ८।२।११५ ॥

ज्याशब्दे अन्त्यव्यञ्जनात्पूर्व ईद् भवति ॥ जीआ ॥ ११५ ॥

करेणू-वाराणस्यो र-णोर्व्यत्ययः ॥ ८।२।११६ ॥

अनयो रेफणकारयोर्व्यत्ययः स्थितिपरिवृत्तिर्भवति ॥ कणेरू । वाणारसी ॥ स्त्रीलिङ्गनिर्देशात्पुंसि न भवति । एसो करेणू ॥ ११६ ॥

आलाने लनोः ॥ ८।२।११७ ॥

आलानशब्दे लनोर्व्यत्ययो भवति ॥ आणालो । आणाल-क्खम्भो ॥ ११७ ॥

अचलपुरे च-लोः ॥ ८।२।११८ ॥

अचलपुरशब्दे चकारलकारयोर्व्यत्ययो भवति ॥ अलचपुरं ॥ ११८ ॥

महाराष्ट्रे ह–रोः ॥ ८।२।११९ ॥

महाराष्ट्रशब्दे हरोर्व्यत्ययो भवति ॥ मरहट्ठं ॥ ११९ ॥

ह्रदे ह–दोः ॥ ८।२।१२० ॥

ह्रदशब्दे हकारदकारयोर्व्यत्ययो भवति ॥ द्रहो ॥ आर्षे । हरए महपुण्डरिए ॥ १२० ॥

हरिताले र–लोर्न वा ॥ ८।२।१२१ ॥

हरितालशब्दे रकारलकारयोर्व्यत्ययो वा भवति ॥ हलिआरो हरिआलो ॥ १२१ ॥

लघुके ल–होः ॥ ८।२।१२२ ॥

लघुकशब्दे घस्य हत्वे कृते लहोर्व्यत्ययो वा भवति ॥ हलुअं । लहुअं ॥ घस्य व्यत्यये कृते पदादित्वात् हो न प्राप्नोतीति हकरणम् ॥ १२२ ॥

ललाटे ल–डोः ॥ ८।२।१२३ ॥

ललाटशब्दे लकारडकारयोर्व्यत्ययो भवति वा ॥ णडालं । णलाडं । '**ललाटे च**' (८–१–२५७) इति आदेर्लस्य णत्वविधानादिह द्वितीयो लः स्थानी ॥ १२३ ॥

ह्ये ह्योः ॥ ८।२।१२४ ॥

ह्यशब्दे हकारयकारयोर्व्यत्ययो वा भवति ॥ गुह्यम् । गुय्हं । गुज्झं ॥ सह्यः । सय्हो सज्झो ॥ १२४ ॥

स्तोकस्य थोक–थोव–थेवाः ॥ ८। २।१२५ ॥

स्तोकशब्दस्य एते त्रय आदेशा भवन्ति वा ॥ थोक्कं थोवं थेवं । पक्षे । थोअं ॥ १२५ ॥

दुहितृ–भगिन्योर्धूआ–बहिण्यौ ॥ ८।२।१२६ ॥

अनयोरेतावादेशौ वा भवतः ॥ धूआ दुहिआ । बहिणी भइणी ॥१२६॥

वृक्ष–क्षिप्तयो रुक्ख–छूढौ ॥ ८।२।१२७ ॥

वृक्ष–क्षिप्तयोर्यथासंख्यं रुक्ख छूढ इत्यादेशौ वा भवतः ॥ रुक्खो वच्छो । छूढं खित्तं । उच्छूढं । उक्खित्तं ॥ १२७ ॥

वनिताया विलया ॥ ८।२।१२८ ॥

वनिताशब्दस्य विलया इत्यादेशो वा भवति ॥ विलया वणिआ ॥ विलयेतिसंस्कृतेपीति केचित् ॥ १२८ ॥

गौणस्येषतः कूरः ॥ ८।२।१२९ ॥

ईषच्छब्दस्य गौणस्य कूर इत्यादेशो वा भवति ॥ चिंच व्व कूर-पिक्का । पक्षे । ईसि ॥ १२९ ॥

स्त्रिया इत्थी ॥ ८।२।१३० ॥

स्त्रीशब्दस्य इत्थी इत्यादेशो वा भवति ॥ इत्थी थी ॥ १३० ॥

धृतेर्दिहिः ॥ ८।२।१३१ ॥

धृतिशब्दस्य दिहिरित्यादेशो वा भवति ॥ दिही धिई ॥ १३१ ॥

मार्जारस्य मञ्जर–वञ्जरौ ॥ ८।२।१३२ ॥

मार्जारशब्दस्य मञ्जर वञ्जर इत्यादेशौ वा भवतः ॥ मञ्जरो वञ्जरो । पक्षे । मज्जारो ॥ १३२ ॥

वैडूर्यस्य वेरुलिअं ॥ ८।२।१३३ ॥

वैडूर्यशब्दस्य वेरुलिअ इत्यादेशो वा भवति ॥ वेरुलिअं । वेडुज्जं ॥ १३३ ॥

एण्हिं एत्ताहे इदानीमः ॥ ८।२।१३४ ॥

अस्य एतावादेशौ वा भवतः ॥ एण्हिं । एत्ताहे । इआणिं ॥ १३४ ॥

पूर्वस्य पुरिमः ॥ ८।२।१३५ ॥

पूर्वस्य स्थाने पुरिम इत्यादेशो वा भवति ॥ पुरिमं पुव्वं ॥ १३५ ॥

त्रस्तस्य हित्थ–तट्ठौ ॥ ८।२।१३६ ॥

त्रस्तशब्दस्य हित्थ तट्ठ इत्यादेशौ वा भवतः ॥ हित्थं तट्ठं तत्थं ॥ १३६ ॥

बृहस्पतौ बहो भयः ॥ ८।२।१३७ ॥

बृहस्पतिशब्दे बह इत्यस्यावयवस्य भय इत्यादेशो वा भवति ॥ भयस्सई भयप्फई भयप्पई ॥ पक्षे । बहस्सई । बहप्फई । बहप्पई ॥ **'वा बृहस्पतौ'** (८–१–१३८) इति इकारे उकारे च बिहस्सई । बिहप्फई । बिहप्पई । बुहस्सई । बुहप्फई । बुहप्फई ॥ १३७ ॥

मलिनोभय–शुक्ति–क्षुभारब्ध–पदातेर्मइलावह–सिप्पि–छिक्का–ढत्त–पाइक्कं ॥ ८।२।१३८ ॥

मलिनादीनां यथासंख्यं मइलादय आदेशा वा भवन्ति ॥ मलिन । मइलं मलिणं ॥ उभय । अवहं । उवहमित्यपि केचित् । अवहोआसं । उभयबलं । आर्षे । उभयोकालं ॥ शुक्ति । सिप्पी सुत्ती ॥ क्षुभ । छिक्को छुत्तो ॥ आरब्ध । आढत्तो आरद्धो ॥ पदाति । पाइक्को-पयाई ॥ १३८ ॥

दंष्ट्राया दाढा ॥ ८।२।१३९ ॥

पृथग्योगाद्वेति निवृत्तम् । दंष्ट्राशब्दस्य दाढा इत्यादेशो भवति ॥ दाढा । अयं संस्कृतेपि ॥ १३९ ॥

बहिसो बाहिं–बाहिरा ॥ ८।२।१४० ॥

बहिःशब्दस्य बाहिं बाहिर इत्यादेशो भवतः ॥ बाहिं बाहिरं ॥ १४० ॥

अधसो हेट्ठं ॥ ८।२।१४१ ॥

अधस्शब्दस्य हेट्ठ इत्ययमादेशो भवति ॥ हेट्ठं ॥ १४१ ॥

मातृ-पितुः स्वसुः सिआ-छौ ॥ ८।२।१४२ ॥

मातृपितृभ्यां परस्य स्वसृशब्दस्य सिआ छा इत्यादेशो भवतः ॥ माउ-सिआ । माउ-च्छा । पिउ-सिआ । पिउ-च्छा ॥ १४२ ॥

तिर्यचस्तिरिच्छिः ॥ ८।२।१४३ ॥

तिर्यच्शब्दस्य तिरिच्छिरित्यादेशो भवति ॥ तिरिच्छि पेच्छइ ॥ आर्षे तिरिआ इत्यादेशोपि । तिरिआ ॥ १४३ ॥

गृहस्य घरोपतौ ॥ ८।२।१४४ ॥

गृहशब्दस्य घर इत्यादेशो भवति पतिशब्दश्चेत् परो न भवति ॥ घरो । घर–सामी । राय–हरं ॥ अपताविति किम् । गह–वई ॥ १४४ ॥

शीलाद्यर्थस्येरः ॥ ८।२।१४५ ॥

शीलधर्मसाध्वर्थे विहितस्य प्रत्ययस्य इर इत्यादेशो भवति ॥ हसनशीलः हसिरो । रोविरो । लज्जिरो । जम्भिरो । वेविरो । भमिरो । ऊससिरो ।

केचित् तृन एव इरमाहुस्तेषां नमिरगमिसदयो न सिध्यन्ति । तृनोत्र रादिना बाधितत्वात् ॥ १४५ ॥

क्त्वस्तुमत्तूण–तुआणाः ॥ ८।२।१४६ ॥

क्त्वाप्रत्ययस्य तुम् अत् तूण तुआण इत्येते आदेशा भवन्ति ॥ तुम् । दट्ठुं । मोत्तुं ॥ अत् । भमिअ । रमिअ ॥ तूण । घेत्तूण । काऊण ॥ तुआण । भेत्तुआण । सोउआण ॥ वन्दित्तु इत्यनुस्वारलोपात् ॥ वन्दित्ता इति सिद्धसंस्कृतस्यैव वलोपेन ॥ कट्टु इति तु आर्षे ॥ १४६ ॥

इदमर्थस्य केरः ॥ ८।१।१४७ ॥

इदमर्थस्य प्रत्ययस्य केर इत्यादेशो भवति ॥ युष्मदीयः । तुम्हकेरो ॥ अस्मदीयः । अम्हकेरो ॥ न च भवति । मईअ–पक्खे । पाणिणीआ ॥ १४७ ॥

पर–राजभ्यां क्क–डिक्कौ च ॥८।२।१४८॥

पर राजन् इत्येताभ्यां परस्येदमर्थस्य प्रत्ययस्य यथासंख्यं संयुक्तौ क्क डित् इक्कश्चादेशौ भवतः । चकारात्केरश्च ॥ परकीयम् । पारक्कं । परकं । पारकेरं ॥ राजकीयम् । राइक्कं । रायकेरं ॥ १४८ ॥

युष्मदस्मदोञ एचयः ॥ ८।२।१४९ ॥

आभ्यां परस्येदमर्थस्याञ एच्चय इत्यादेशो भवति ॥ युष्माकमिदं यौष्माकम् । तुम्हेच्चयं । एवम् अम्हेच्चयं ॥ १४९ ॥

वतेर्व्वः ॥ ८।२।१५० ॥

वतेः प्रत्ययस्य द्विरुक्तो वो भवति ॥ महुरव्व पाडलिउत्ते पासाया ॥ १५० ॥

सर्वाङ्गादीमस्येकः ॥ ८।२।१५१ ॥

सर्वाङ्गात् सर्वादेः पथ्यङ्ग (हे० १७–९०) इत्यादिना विहितस्येनस्य स्थाने इक इत्यादेशो भवति ॥ सर्वाङ्गीणः । सव्वङ्गिओ ॥ १५१ ॥

पथो णस्येकट् ॥ ८।२।१५२ ॥

'नित्यं णः पन्थश्च' (हे० ६–८९) इति यः पथो णो विहितस्तस्य इकट् भवति ॥ पान्थः । पहिओ ॥ १५२ ॥

ईयस्यात्मनो णयः ॥ ८।२।१५३ ॥

आत्मनः परस्य ईयस्य णय इत्यादेशो भवति ॥ आत्मीयम् । अप्पणअं ॥ १५३ ॥

त्वस्य डिमा-त्तणौ वा ॥ ८।२।१५४ ॥

त्वप्रत्ययस्य डिमा त्तण इत्यादेशौ वा भवतः ॥ पीणिमा । पुप्फिमा । पीणत्तणं । पुप्फत्तणं । पक्षे । पीणत्तं । पुप्फत्तं ॥ इम्नः पृथ्वादिषु नियतत्वात् तदन्यप्रत्ययान्तेषु अस्य विधिः ॥ पीनता इत्यस्य प्राकृते पीणया इति भवति । पीणदा इति तु भाषान्तरे । तेनेह तलो दा न क्रियते ॥ १५४ ॥

अनङ्कोठात्तैलस्य डेल्लः ॥ ८।२।१५५ ॥

अङ्कोठवर्जिताच्छब्दात्परस्य तैलप्रत्ययस्य डेल्ल इत्यादेशो भवति ॥ सुरहि-जलेण कडुएल्लं ॥ अनङ्कोठादिति किम् । अङ्कोल्लतेलं ॥ १५५ ॥

यत्तदेतदोतोरित्तिअ एतल्लुक् च ॥ ८।२।१५६ ॥

एभ्यः परस्य डावादेरतोः परिणामार्थस्य इत्तिअ इत्यादेशो भवति एतदो लुक् च ॥ यावत् । जित्तिअं ॥ तावत् । तित्तिअं ॥ एतावत् । इत्तिअं ॥ १५६ ॥

इदंकिमश्च डेत्तिअ-डेत्तिल-डेद्दहाः ॥ ८।२।१५७ ॥

इदंकिंभ्यां यत्तदेतद्भ्यश्च परस्यातोर्डावतोर्वा डित एत्तिअ एत्तिल एद्दह इत्यादेशा भवन्ति एतल्लुक् च ॥ इयत् । एत्तिअं । एत्तिलं । एद्दहं ॥ कियत् । केत्तिअं । केत्तिलं । केद्दहं ॥ यावत् । जेत्तिअं । जेत्तिलं । जेद्दहं ॥ तावत् । तेत्तिअं । तेत्तिलं । तेद्दहं ॥ एतावत् । एत्तिअं । एत्तिलं । एद्दहं ॥ १५७ ॥

कृत्वसो हुत्तं ॥ ८।२।१५८ ॥

'वारे कृत्वस्' (हे० ७-२-१०९) इति यः कृत्वस् विहितस्तस्य हुत्तमित्यादेशो भवति ॥ सयहुत्तं । सहस्सहुत्तं ॥ कथं प्रियाभिमुख्ये पियहुत्तं । अभिमुखार्थेन हुत्तशब्देन भविष्यति ॥ १५८ ॥

आल्विल्लोल्लाल–वन्त–मन्तेत्तेर–मणा मतोः ॥ ८।२।१५९ ॥

आलु इत्यादयो नव आदेशा मतोः स्थाने यथाप्रयोगं भवन्ति ॥ आलु। नेहालू । दयालू । ईसालू । लज्जालुआ ॥ इल्ल । सोहिल्लो । छाइल्लो । जामइल्लो ॥ उल्ल । विआरुल्लो । मंसुल्लो । दप्पुल्लो ॥ आल । सद्दालो । जडालो । फडालो । रसालो । जोण्हालो ॥ वन्त ॥ धणवन्तो । भत्तिवन्तो ॥ मन्त । हणुमन्तो । सिरिमन्तो । पुण्णमन्तो ॥ इत्त । कव्वइत्तो । माणइत्तो ॥ इर । गव्विरो । रेहिरो ॥ मण । धणमणो ॥ केचिन्मादेशमपीच्छन्ति । हणुमा ॥ मतोरिति किम् । धणी । अत्थिओ ॥ १५९ ॥

त्तो दो तसो वा ॥ ८।२।१६० ॥

तसः प्रत्ययस्य स्थाने त्तो दो इत्यादेशौ वा भवतः ॥ सव्वत्तो सव्वदो । एकत्तो एकदा । अन्नत्तो अन्नदो । कत्तो कदो । जत्तो जदो । तत्तो तदो । इत्तो इदो । पक्षे । सव्वओ । इत्यादि ॥ १६० ॥

त्रपो हि–ह–त्थाः ॥ ८।२।१६१ ॥

त्रप्प्रत्ययस्य एते भवन्ति ॥ यत्र । जहि । जह । जत्थ ॥ तत्र । तहि । तह । तत्थ ॥ कुत्र । कहि । कह । कत्थ ॥ अन्यत्र । अन्नहि । अन्नह । अन्नत्थ ॥ १६१ ॥

वैकादेः सि सिअं इआ ॥ ८।२।१६२ ॥

एकशब्दात्परस्य दाप्रत्ययस्य सि सिअं इआ इत्यादेशा वा भवन्ति ॥ एकदा । एक्कसि । एक्कसिअं । एकइआ । पक्षे । एगया ॥ १६२ ॥

डिल्ल–डुल्लौ भवे ॥ ८।२।१६३ ॥

भवेर्थे नाम्नः परौ इल्ल उल्ल इत्येतौ डितौ प्रत्ययौ भवतः ॥ गामिल्लिआ । पुरिल्लं । हेट्ठिल्लं । उवरिल्लं । अप्पुल्लं ॥ आल्वालावपीच्छन्त्यन्ये ॥ १६३ ॥

स्वार्थे कश्च वा ॥ ८।२।१६४ ॥

स्वार्थे कश्चकारादिल्लोल्लौ डितौ प्रत्ययौ वा भवतः ॥ क । कुङ्कमपिञ्जरयं । चन्दओ । गयणयम्मि । धरणीहर–पक्खुब्भन्तयं । दुहिअए राम–हिअयए । इहयं । आलेट्ठुअं । आश्लेष्टुमित्यर्थः ॥ द्विरपि भवति । बहुअयं ॥

ककारोच्चारणं पैशाचिकभाषार्थम् । यथा । वतनके वतनकं समप्पेत्तून ॥ इल्ल । निज्जिआसोअ-पल्लविल्लेणं । पुरिल्लो । पुरा पुरो वा ॥ उल्ल । मह पिउल्लओ । मुहुल्लं । हत्थुल्ला । पक्षे । चन्दो । गयणं । इह । आलेट्ठुं । बहु । बहुअं । मुहं । हत्था ॥ कुत्सादिविशिष्टे तु संस्कृतवदेव कप् सिद्धः॥ यावादिलक्षणः कः प्रतिनियतविषय एवेति वचनम् ॥ १६४ ॥

ल्लो नवैकाद्वा ॥ ८।२।१६५ ॥

आभ्यां स्वार्थे संयुक्तो ल्लो वा भवति ॥ नवल्लो । एकल्लो ॥ सेवादित्वात् कस्य द्वित्वे एक्कल्लो ॥ पक्षे । नवो । एक्को । एओ ॥ १६५ ॥

उपरेः संव्याने ॥ ८।२।१६६ ॥

संव्यानेर्थे वर्तमानादुपरिशब्दात् स्वार्थे ल्लो भवति ॥ अवरिल्लो ॥ संव्यान इति किम् । अवरिं ॥ १६६ ॥

भ्रुवो मया डमया ॥ ८।२।१६७ ॥

भ्रूशब्दात्स्वार्थे मया डमया इत्येतौ प्रत्ययौ भवतः ॥ भुमया । भमया ॥ १६७ ॥

शनैसो डिअम् ॥ ८।२।१६८ ॥

शनैस्शब्दात्स्वार्थे डिअम् भवति ॥ सणिअमवगूढो ॥ १६८ ॥

मनाको न वा डयं च ॥ ८।२।१६९ ॥

मनाक्शब्दात्स्वार्थे डयम् डिअम् च प्रत्ययो वा भवति ॥ मणयं । मणिअं । पक्षे । मणा ॥ १६९ ॥

मिश्राङ्गालिअः ॥ ८।२।१७० ॥

मिश्रशब्दात्स्वार्थे डालिअः प्रत्ययो वा भवति ॥ मीसालिअं । पक्षे । मीसं ॥ १७० ॥

रो दीर्घात् ॥ ८।२।१७१ ॥

दीर्घशब्दात्परः स्वार्थे रो वा भवति ॥ दीहरं दीहं ॥ १७१ ॥

त्वादेः सः ॥ ८।२।१७२ ॥

'भावे त्व-तल' (हे० ७-१-५५) इत्यादिना विहितात्त्वादेः परः

स्वार्थे स एव त्वादिर्वा भवति ॥ मृदुकत्वेन । मउअत्तयाइ ॥ आतिशायिकात्त्वातिशायिकः संस्कृतवदेव सिद्धः । जिट्ठयरो । कणिट्ठयरो ॥ १७२ ॥

विद्युत्पत्र–पीतान्धाल्लः ॥ ८।२।१७३ ॥

एभ्यः स्वार्थे लो वा भवति ॥ विज्जुला । पत्तलं । पीवलं । पीअलं । अन्धलो । पक्षे । विज्जू । पत्तं । पीअं । अन्धो ॥ कथं जमलं । यमलमिति संस्कृतशब्दाद् भविष्यति ॥ १७३ ॥

गोणादयः ॥ ८।२।१७४ ॥

गोणादयः शब्दा अनुक्तप्रकृतिप्रत्ययलोपागमवर्णविकारा बहुलं निपात्यन्ते ॥ गौः । गोणो । गावी ॥ गावः । गावीओ ॥ बलीवर्दः । बइल्लो ॥ आपः । आऊ ॥ पञ्चपञ्चाशत् । पञ्चावण्णा । पणपन्ना ॥ त्रिपञ्चाशत् । तेवण्णा । त्रिचत्वारिंशत् । तेआलीसा ॥ व्युत्सर्गः । विउसग्गो । व्युत्सर्जनम् । वोसिरणं ॥ बहिर्मैथुनं वा । बाहिद्धा । कार्यम् । णामुक्कसिअं । क्वचित् । कत्थइ ॥ उद्वहति । मुव्वहइ ॥ अपस्मारः । वम्हलो ॥ उत्पलम् । कन्दुट्टं ॥ धिक्धिक् । छिछि । द्विद्धि ॥ धिगस्तु । धिरत्थु । प्रतिस्पर्धा । पाडिसिद्धी । पाडिसिद्धी ॥ स्थासकः । चच्चिक्कं ॥ निलयः । निहेलणं ॥ मघवान् । मघोणो ॥ साक्षी । सक्खिणो ॥ जन्म । जम्मणं ॥ महान् । महन्तो ॥ भवान् । भवन्तो ॥ आशीः । आसीसा । क्वचित् । हस्य ड्डभौ । बृहत्तरम् । वड्डयरं ॥ हिमोरः । भिमोरो ॥ ल्लस्य ड्डः । क्षुल्लकः । खुड्डओ ॥ घोषाणामग्रेतनो गायनः । घायणो ॥ वडः । वढो ॥ ककुदम् । ककुधं ॥ अकाण्डम् । अत्थक्कं ॥ लज्जावती । लज्जालुइणी ॥ कुतूहलम् । कुड्डं ॥ चूतः । मायन्दो । माकन्दशब्दः संस्कृतेपीत्यन्ये ॥ विष्णुः । भट्टिओ ॥ श्मशानम् । करसी ॥ असुराः । अगया ॥ खेलम् । खेड्डं ॥ पौष्पं रजः । तिज्झिच्छि ॥ दिनम् । अल्लं ॥ समर्थः । पक्कलो ॥ पण्डकः । णेलच्छो ॥ कर्पासः । पलही ॥ बली । उज्जलो ॥ ताम्बूलम् । झसुरं । पुंश्चली । छिंछई ॥ शाखा । साहुली । इत्यादि ॥ वाधिकारात्पक्षे यथादर्शनं मउओ इत्यादयपि भवति ॥ गोला गोआवरी इति तु गोलागोदा-

वरीभ्यां सिद्धम् ॥ भाषाशब्दाश्च । आहित्थ । ललक्क । विड्डिर । पच्चड्डिअ । उप्पेहड । मडप्फर । पड्डिच्छिर । अट्टमट्ट । विहडप्फड । उज्जल्ल । हल्लप्फल इत्यादयो महाराष्ट्रविदर्भादिदेशप्रसिद्धा लोकतोवगन्तव्याः ॥ क्रियाशब्दाश्च । अवयासइ । फुम्फुल्लइ । उप्फालेइ । इत्यादयः । अत एव च कृष्ट–घृष्ट–वाक्य–विद्वस्–वाचस्पति–विष्टरश्रवस्–प्रचेतस्–प्रोक्त–प्रोतादीनां क्विबादिप्रत्ययान्तानां च अग्निचित्सोमसुत्सुग्लसुम्लेत्यादीनां पूर्वैः कविभिरप्रयुक्तानां प्रतीतिवैषम्यपरः प्रयोगो न कर्तव्यः शब्दान्तरैरेव तु तदर्थोभिधेयः । यथा कृष्टः कुशलः । वाचस्पतिर्गुरुः । विष्टरश्रवा हरिरित्यादि ॥ घृष्टशब्दस्य तु सोपसर्गस्य प्रयोग इष्यत एव । मन्दर–यड–परिघट्टं । तद्दिअस–निहट्टाणङ्ग इत्यादि ॥ आर्षे तु यथादर्शनं सर्वमविरुद्धम् । यथा । घट्टा । मट्टा । विउसा । सुअ–लक्खणाणुसारेण । वक्कन्तरेसु अ पुणो इत्यादि ॥ १७४ ॥

अव्ययम् ॥८।२।१७५ ॥

अधिकारोयम् । इतः परं ये वक्ष्यन्ते आपादसमासेस्तेव्ययसंज्ञा ज्ञातव्याः ॥ १७५ ॥

तं वाक्योपन्यासे ॥ ८।२।१७६ ॥

तमिति वाक्योपन्यासे प्रयोक्तव्यम् ॥ तं तिअस–वन्दि–मोक्खं ॥ १७६ ॥

आम अभ्युपगमे ॥ ८।२।१७७ ॥

आमेत्यभ्युपगमे प्रयोक्तव्यम् ॥ आम बहला वणोली ॥ १७७ ॥

णवि वैपरीत्ये ॥ ८।२।१७८ ॥

णवीति वैपरीत्ये प्रयोक्तव्यम् ॥ णवि हा वणे ॥ १७८ ॥

पुणरुत्तं कृतकरणे ॥ ८–२–१७९ ॥

पुणरुत्तमिति कृतकरणे प्रयोक्तव्यम् ॥

अइ सुप्पइ पंसुलि णीसहेहि अङ्गेहि पुणरुत्तं ॥ १७९ ॥

हन्दि विषाद–विकल्प–पश्चात्ताप–निश्चय–सत्ये ॥८।२।१८०॥

हन्दि इति विषादादिषु प्रयोक्तव्यम् ॥

हन्दि चलणे णओ सो न माणिओ हन्दि हुज्ज एत्ताहे ।
हन्दि न होही भाणिरी सा सिज्जइ हन्दि तुह कज्जे ॥

हन्दि । सत्यमित्यर्थः ॥ १८० ॥

हन्द च गृहाणार्थे ॥ ८।२।१८१ ॥

हन्द हन्दि च गृहाणार्थे प्रयोक्तव्यम् ॥ हन्द पलोएसु इमं । हन्दि । गृहाणेत्यर्थः ॥ १८१ ॥

मिव पिव विव व्व व विअ इवार्थे वा ॥ ८।२।१८२॥

एते इवार्थे अव्ययसंज्ञकाः प्राकृते वा प्रयुज्यन्ते ॥ कुमुअं मिव । चन्दणं पिव । हंसो विव । साअरो व्व खीरोओ । सेसस्स व निम्मोओ । कमलं विअ । पक्षे । नीलुप्पल-माला इव ॥ १८२ ॥

जेण तेण लक्षणे ॥ ८।२।१८३ ॥

जेण तेण इत्येतौ लक्षणे प्रयोक्तव्यौ ॥ भमर-रुअं जेण कमल-वणं ॥ भमर-रुअं तेण कमल-वणं ॥ १८३ ॥

णइ चेअ चिअ च अवधारणे ॥ ८।२।१८४ ॥

एतेवधारणे प्रयोक्तव्याः ॥ गईए णइ । जं चेअ मउलणं लोअणाणं । अणुबद्धं तं चिअ कामिणीणं ॥ सेवादित्वाद् द्वित्वमपि । ते च्चिअ धन्ना । ते च्चेअ सुपुरिसा । च्च । स च्च य रूवेण । स च्च सीलेण ॥ १८४ ॥

बले निर्धारण-निश्चययोः ॥ ८।२।१८५ ॥

बले इति निर्धारणे निश्चये च प्रयोक्तव्यम् ॥ निर्धारणे । बले पुरिसो धणंजओ खत्तिआणं ॥ निश्चये । बले सीहो । सिंह एवायम् ॥१८५॥

किरेर हिर किलार्थे वा ॥ ८।२।१८६ ॥

किर इर हिर इत्येते किलार्थे वा प्रयोक्तव्याः ॥ कलं किर खरहिअओ । तस्स इर । पिअ-वयंसो हिर । पक्षे । एवं किल तेण सिविणए भणिआ ॥ १८६ ॥

णवर केवले ॥ ८।२।१८७ ॥

केवलार्थे णवर इति प्रयोक्तव्यम् ॥ णवर पिआइं चिअ णिव्वडन्ति ॥ १८७ ॥

आनन्तर्ये णवरि ॥ ८।२।१८८ ॥

आनन्तर्ये णवरीति प्रयोक्तव्यम् ॥ णवरि अ से रहु-वइणा ॥ केचित्तु केवलानन्तर्यार्थयोर्णवरणवरि इत्येकमेव सूत्रं कुर्वते तन्मते उभावप्युभयार्थौ ॥ १८८ ॥

अलाहि निवारणे ॥ ८।२।१८९ ॥

अलाहीति निवारणे प्रयोक्तव्यम् ॥ अलाहि किं वाइएण लेहेण ॥१८९॥

अण णाइं नञर्थे ॥ ८।२।१९० ॥

अण णाइं इत्येतौ नञोर्थे प्रयोक्तव्यौ ॥ अणचिन्तिअममुणन्ती । णाइं करेमि रोसं ॥ १९० ॥

माइं मार्थे ॥ ८।२।१९१ ॥

माइं इति मार्थे प्रयोक्तव्यम् ॥ माइं काहीअ रोसं । मा कार्षीद् रोषम् ॥ १९१ ॥

हद्धी निर्वेदे ॥ ८।२।१८२ ॥

हद्धी इत्यव्ययमतएव निर्देशात् हाधिक्शब्दादेशो वा निर्वेदे प्रयोक्तव्यम् ॥ हद्धीहद्धी । हा धाहधाह ॥ १९२ ॥

वेव्वे भय-वारण-विषादे ॥ ८।२।१९३ ॥

भयवारणविषादेषु वेव्वे इति प्रयोक्तव्यम् ॥

वेव्वेत्ति भये वेव्वेत्ति वारणे जूरणे अ वेव्वेत्ति ।
उल्लाविरीइ वि तुहं वेव्वेत्ति मयच्छि किं णेअं ॥
किं उल्लावेन्तीए उअ जूरन्तीएँ किं तु भीआए ।
उव्वाडिरीएँ वेव्वेत्ति तीएँ भणिअं न विम्हरिमो ॥ १९३ ॥

वेव्व च आमन्त्रणे ॥ ८।२।१९४ ॥

वेव्व वेव्वे च आमन्त्रणे प्रयोक्तव्ये ॥ वेव्वे गोले । वेव्वे मुरन्दले वहसि पाणिअं ॥ १९४ ॥

मामि हला हले सख्या वा ॥ ८।२।१९५ ॥

एते सख्या आमन्त्रणे वा प्रयोक्तव्याः ॥ मामि सरिसक्खराण वि ॥

पणवह माणस्स हला । हले हयासस्स । पक्षे । सहि एरिसि च्चिअ गई ॥ १९५ ॥

दे संमुखीकरणे च ॥ ८।२।१९६ ॥

संमुखीकरणे सख्या आमन्त्रणे च दे इति प्रयोक्तव्यम् ॥ दे पसिअ ताव सुन्दरि ॥ दे आ पसिअ निअत्तसु ॥ १९६ ॥

हुं दान-पृच्छा-निवारणे ॥ ८।२।१९७ ॥

हुं इति दानादिषु प्रयुज्यते ॥ दाने । हुं गेण्ह अप्पणो च्चिअ ॥ पृच्छायाम् । हुं साहसु सब्भावं ॥ निवारणे । हुं निल्लज्ज समोसर ॥१९७॥

हु खु निश्चय-वितर्क-संभावन विस्मये ॥८।२।१९८॥

हु खु इत्येतौ निश्चयादिषु प्रयोक्तव्यौ ॥ निश्चये । तंपि हु अछिन्निसरी । तं खु सिरीए रहस्सं ॥ वितर्कः ऊहः संशयो वा । ऊहे । न हु णवरं संगहिआ । एअं खु हसइ ॥ संशये । जलहरो खु धूमवडलो खु ॥ संभावने । तरिउं ण हु णवर इमं । एअं खु हसइ ॥ विस्मये । को खु एसो सहस्ससिरो । बहुलाधिकारादनुस्वारात्परो हुर्न प्रयोक्तव्यः ॥ १९८ ॥

ऊ गर्हाक्षेप-विस्मय-सूचने ॥ ८।२।१९९ ॥

ऊ इति गर्हादिषु प्रयोक्तव्यम् ॥ गर्हा । ऊ णिल्लज्ज ॥ प्रक्रान्तस्य वाक्यस्य विपर्यासाशङ्काया विनिवर्तनलक्षण आक्षेपः ॥ ऊ किं मए भणिअं ॥ विस्मये । ऊ कह मुणिआ अहयं ॥ सूचने । ऊ केण न विण्णायं ॥१९९॥

थू कुत्सायाम् ॥ ८ । २ । २०० ॥

थू इति कुत्सायां प्रयोक्तव्यम् ॥ थू निल्लज्जो लोओ ॥ २०० ॥

रे अरे संभाषण-रतिकलहे ॥ ८ । २ । २०१ ॥

अनयोरर्थयोर्यथासंख्यमेतौ प्रयोक्तव्यौ ॥ रे संभाषणे । रे हिअह मडहसरिआ ॥ अरे रतिकलहे । अरे मए समं मा करेसु उवहासं ॥ २०१ ॥

हरे क्षेपे च ॥ ८ । २ । २०२ ॥

क्षेपे संभाषणरतिकलहयोश्च हरे इति प्रयोक्तव्यम् ॥ क्षेपे । हरे णिल्लज्ज ॥ संभाषणे । हरे पुरिसा ॥ रतिकलहे । हरे बहु-वल्लह ॥ २०२ ॥

ओ सूचना-पश्चात्तापे ॥ ८ । २ । २०३ ॥

ओ इति सूचनापश्चात्तापयोः प्रयोक्तव्यम् ॥ सूचनायाम् । ओ अविणय–तत्तिल्ले ॥ पश्चात्तापे । ओ न मए छाया इत्तिआए ॥ विकल्पे तु उतादेशेनैवोक्तेन सिद्धम् ॥ ओ विरएमि नहयले ॥ २०३ ॥

अव्वो सूचना-दुःख-संभाषणापराध-विस्मयानन्दादर-भय-खेद–विषाद–पश्चात्तापे ॥८।२।२०४॥

अव्वो इति सूचनादिषु प्रयोक्तव्यम् ॥ सूचनायाम् । अव्वो दुक्करयारय । दुःखे । अव्वो दलन्ति हिययं ॥ संभाषणे । अव्वो किमिणं किमिणं ॥ अपराधविस्मययोः ।

अव्वो हरन्ति हिअयं तहवि न वेसा हवन्ति जुवईण ।
अव्वो किंपि रहस्सं मुणन्ति घुत्ता जणब्भहिआ ॥

आनन्दादरभयेषु ।

अव्वो सुपहायमिणं अव्वो अज्जम्ह सप्फलं जीअं ।
अव्वो अइअम्मि तुमे नवरं जइ सा न जूरिहिइ ॥

खेदे । अव्वो न जामि छेत्तं ।

विषादे ।

अव्वो नासेन्ति दिहिं पुलयं वड्ढेन्ति देन्ति रणरणयं ।
एण्हिं तस्सेअ गुणा ते च्चिअ अव्वो कह णु एअं ॥

पश्चात्तापे ।

अव्वो तह तेण कया अहयं जह कस्य साहेमि ॥२०४॥

अइ संभावने ॥ ८।२।२०५ ॥

संभावने अइ इति प्रयोक्तव्यम् ॥ अइ दिअर किं न पेच्छसि ॥२०५॥

वणे निश्चय–विकल्पानुकम्प्ये च ॥ ८।२।२०६ ॥

वणे इति निश्चयादौ संभावने च प्रयोक्तव्यम् ॥ वणे देमि । निश्चयं ददामि ॥ विकल्पे । होई वणे न होइ । भवति वा न भवति ॥ अनुकम्प्ये । दासो वणे न मुच्चइ । दासोनुकम्प्यो न त्यज्यते ॥ संभावने । नत्थि वणे जं न देइ विहि–परिणामो । संभाव्यते एतदित्यर्थः ॥२०६॥

मणे विमर्शे ॥ ८।२।२०७॥

मणे इति विमर्शे प्रयोक्तव्यम् ॥ मणे सूरो । किं स्वित्सूर्यः ॥ अन्ये मन्ये इत्यर्थमपीच्छन्ति ॥ २०७ ॥

अम्मो आश्चर्ये ॥ ८।२।२०८॥

अम्मो इत्याश्चर्ये प्रयोक्तव्यम् ॥ अम्मो कह पारिज्जइ ॥ २०८ ॥

स्वयमोर्थे अप्पणो न वा ॥८।२।२०९॥

स्वयमित्यस्यार्थे अप्पणो वा प्रयोक्तव्यम् ॥ विसयं विसअन्ति अप्पणो कमल–सरा । पक्षे । सयं चेअ मुणसि करणिज्जं ॥ २०९ ॥

प्रत्येकमः पाडिक्कं पाडिएक्कं ॥८।२।२१०॥

प्रत्येकमित्यस्यार्थे पाडिक्कं पाडिएक्कं इति च प्रयोक्तव्यं वा ॥ पाडिक्कं । पाडिएक्कं । पक्षे । पत्तेअं ॥ २१० ॥

उअ पश्य ॥८।२।२११॥

उअ इति पश्येत्यस्यार्थे प्रयोक्तव्यं वा ॥

उअ निच्चलनिच्फंदा भिसिणीपत्तंमि रेहइ बलाआ ।
निम्मल-मरगय-भायण-परिट्ठिआ संख-सुत्ति व्व ॥

पक्षे पुलआदयः ॥ २११ ॥

इहरा इतरथा ॥ ८।२।२१२ ॥

इहरा इति इतरथार्थे प्रयोक्तव्यं वा ॥ इहरा नीसामन्नेहिं । पक्षे । इअरहा ॥ २१२ ॥

एक्कसरिअं झगिति संप्रति ॥ ८।२।२१३ ॥

एक्कसरिअं झगित्यर्थे संप्रत्यर्थे च प्रयोक्तव्यम् ॥ एक्कसरिअं । झगिति सांप्रतं वा ॥ २१३ ॥

मोरउल्ला मुधा ॥ ८।२।२१४ ॥

मोरउल्ला इति मुधार्थे प्रयोक्तव्यम् ॥ मोरउल्ला । मुधेत्यर्थः ॥ २१४ ॥

दरार्धाल्पे ॥ ८।२।२१५ ॥

दर इत्यव्ययमर्धार्थे ईषदर्थे च प्रयोक्तव्यम ॥ दर-विआसिअं । अर्धेनेषद्वा विकसितमित्यर्थः ॥ २१५ ॥

किणो प्रश्ने ॥ ८।२।२१६ ॥

किणो इति प्रश्ने प्रयोक्तव्यम् ॥ किणो धुवसि ॥ २१६ ॥

इ-जे-राः पाद-पूरणे ॥ ८।२।२१७ ॥

इ जे र इत्येते पादपूरणे प्रयोक्तव्याः ॥ नउणा इ अच्छीइं । अणुकूलं वोत्तुं जे । गेण्हइ र कलम-गोवी ॥ अहो । हंहो । हेहो । हा । नाम । अहह । हीसि । अपि । अहाह । अरिरिहो इत्यादयस्तु संस्कृतसमत्वेन सिद्धाः ॥ २१७ ॥

प्यादयः ॥ ८।२।२१८ ॥

प्यादयो नियतार्थवृत्तयः प्राकृते प्रयोक्तव्याः ॥ पि वि अप्यर्थे ॥२१८॥

इत्याचार्यश्रीहेमचन्द्रसूरिविरचितायां सिद्धहेमचन्द्राभिधान-स्वोपज्ञशब्दानुशासनवृत्तौ अष्टमस्याध्यायस्य द्वितीयः पादः समाप्तः ॥

द्विषत्पुरक्षोदविनोदहेतोर्भवादवामस्य भवद्भुजस्य ।
अयं विशेषो भुवनैकवीर परं न यत्काममपाकरोति ॥ १ ॥

अर्हं

वीप्स्यात्स्यादेर्वीप्स्ये स्वरे मो वा ॥ ८।३।१ ॥

वीप्सार्थात्पदात्परस्य स्यादेः स्थाने स्वरादौ वीप्सार्थे पदे परे मो वा भवति ॥ एकैकम् । एक्कमेक्कं । एक्कमेक्केण । अङ्के अङ्के । अङ्कमङ्कम्मि । पक्षे । एक्केक्कमित्यादि ॥ १ ॥

अतः सेर्डोः ॥ ८ । ३ । २ ॥

अकारान्तान्नाम्नः परस्य स्यादेः सेः स्थाने डो भवति ॥ वच्छो ॥ २ ॥

वैतत्तदः ॥ ८। ३ ।३ ॥

एतत्तदोकारात्परस्य स्यादेः सेर्डो वा भवति ॥ एसो एस । सो णरो । स णरो ॥ ३ ॥

जस्-शसोर्लुक ॥ ८ । ३ । ४ ॥

अकारान्तान्नाम्नः परयोः स्यादिसंबन्धिनोर्जस्-शसोर्लुग् भवति ॥ वच्छा । एए । वच्छे पेच्छ ॥ ४ ॥

अमोस्य ॥ ८ । ३ । ५ ॥

अतः परस्य मोकारस्य लुग् भवति ॥ वच्छं पेच्छं ॥ ५ ॥

टा–आमोर्णः ॥ ८ । ३ । ६ ॥

अतः परस्य टा इत्येतस्य षष्ठीबहुवचनस्य च आमो णो भवति ॥ वच्छेण । वच्छाण ॥ ६ ॥

भिसो हि हिँ हिं ॥ ८ । ३ । ७ ॥

अतः परस्य भिसः स्थाने केवलः सानुनासिकः सानुस्वारश्च हिर्भवति ॥ वच्छेहि । वच्छेहिँ । वच्छेहिं कया छाही ॥ ७ ॥

ङसेस् त्तो-दो-दु-हि-हिन्तो-लुकः ॥ ८ । ३ । ८ ॥

अतः परस्य ङसेः त्तो दो दु हि हिन्तो लुक् इत्येते षडादेशा भवन्ति ॥ वच्छत्तो । वच्छाओ । वच्छाउ । वच्छाहि । वच्छाहिन्तो । वच्छा । दकारकरणं भाषान्तरार्थम् ॥ ८ ॥

भ्यसस् त्तो दो दु हि हिन्तो सुन्तो ॥ ८ । ३ । ९ ॥

अतः परस्य भ्यसः स्थाने त्तो दो दु हि हिन्तो सुन्तो इत्यादेशा भवन्ति ॥ वृक्षेभ्यः । वच्छत्तो । वच्छाओ । वच्छाउ । वच्छाहि । वच्छेहि । वच्छाहिन्तो । वच्छेहिन्तो । वच्छासुन्तो । वच्छेसुन्तो ॥ ९ ॥

ङसः स्सः ॥ ८ । ३ । १० ॥

अतः परस्य ङसः संयुक्तः सो भवति ॥ पियस्स । पेम्मस्स । उपकुम्भं शैत्यम् । उपकुम्भस्स सीअलत्तणं ॥ १० ॥

ङे म्मि ङेः ॥ ८ । ३ । ११ ॥

अतः परस्य ङेर्ङित् एकारः संयुक्तो मिश्च भवति ॥ वच्छे । वच्छम्मि ॥ देवम् । देवम्मि । तम् । तम्मि । अत्र ' **द्वितीयातृतीययोः सप्तमी** ' (८-३-१३५) इत्यमो ङिः ॥ ११ ॥

जस्-शस्-ङसि-त्तो-दो-द्वामि दीर्घः ॥ ८ । ३ । १२ ॥

एषु अतो दीर्घो भवति ॥ जसि शसि च । वच्छा ॥ ङसि । वच्छाओ । वच्छाउ । वच्छाहि । वच्छाहिन्तो । वच्छा ॥ त्तोदोदुषु । वृक्षेभ्यः । वच्छत्तो । ' **ह्रस्वः संयोगे** ' (८-१-८४) इति ह्रस्वः ॥ वच्छाओ । वच्छाउ ॥ आमि । वच्छाण ॥ ङसिनैव सिद्धे त्तोदोदुग्रहणं भ्यसि एत्वबाधनार्थम् ॥ १२ ॥

भ्यसि वा ॥ ८ । ३ । १३ ॥

भ्यसादेशे परे अतो दीर्घो वा भवति ॥ वच्छाहिन्तो वच्छेहिन्तो । वच्छासुन्तो वच्छेसुन्तो । वच्छाहि वच्छेहि ॥ १३ ॥

टाण-शस्येत् ॥ ८ । ३ । १४ ॥

टादेशे णे शसि च परे अस्य एकारो भवति ॥ टाण । वच्छेण ॥ णेति किम् । अप्पणा । अप्पणिआ । अप्पणइआ ॥ शस् । वच्छे पेच्छ ॥ १४ ॥

भिस्भ्यस्सुपि ॥ ८ । ३ । १५ ॥

एषु अत एर्भवति ॥ भिस् । वच्छेहिं । वच्छेहिँ । वच्छेहिं ॥ भ्यस् । वच्छेहि । वच्छेहिन्तो । वच्छेसुन्तो ॥ सुप् । वच्छेसु ॥ १५ ॥

इदुतो दीर्घः ॥ ८ । ३ । १६ ॥

इकारस्य उकारस्य च भिस्भ्यस्सुप्सु परेषु दीर्घो भवति ॥ भिस् । गिरीहि । बुद्धीहिं । दहीहिं । तरूहिं । धेणूहिं । महूहिं कयं ॥ भ्यस् । गिरीओ । बुद्धीओ । दहीओ । तरूओ । धेणूओ । महूओ आगओ ॥ एवं गिरीहिन्तो । गिरीसुन्तो आगओ इत्याद्यपि ॥ सुप् । गिरीसु । बुद्धीसु । दहीसु । तरूसु । धेणूसु । महूसु ठिअं ॥ क्वचिन्न भवति । दिअ-भूमिसु दाणजलोल्लिआइं ॥ इदुत इति किम् । वच्छेहिं । वच्छेसुन्तो । वच्छेसु ॥ भिस्भ्यस्सुपीत्येव । गिरिं तरुं पेच्छ ॥ १६ ॥

चतुरो वा ॥ ८ । ३ । १७ ॥

चतुर उदन्तस्य भिस्भ्यस्सुप्सु परेषु दीर्घो वा भवति ॥ चऊहि । चउहि । चऊओ चउओ । चऊसु । चउसु ॥ १७ ॥

लुप्ते शसि ॥ ८ । ३ । १८ ॥

इदुतोः शसि लुप्ते दीर्घो भवति ॥ गिरी । बुद्धी । तरू । धेणू पेच्छ ॥ लुप्त इति किम् । गिरिणो । तरुणो पेच्छ ॥ इदुत इत्येव । वच्छे पेच्छ ॥ ' **जस्-शस्** ' (८-३-१२) इत्यादिना शसि दीर्घस्य लक्ष्यानुरोधार्थो योगः । लुप्त इति तु णवि प्रतिप्रसवार्थशङ्कानिवृत्त्यर्थम् ॥ १८ ॥

अक्लीबे सौ ॥ ८ । ३ । १९ ॥

इदुतोक्लीबे नपुंसकादन्यत्र सौ दीर्घो भवति ॥ गिरी । बुद्धी । तरू । धेणू ॥ अक्लीब इति किम् । दहिं । महुं ॥ साविति किम् । गिरिं । बुद्धिं । तरुं । धेणुं ॥ केचित्तु दीर्घत्वं विकल्प्य तदभावपक्षे सेर्मादेशमपीच्छन्ति । अग्गिं । निहिं । वाउं । विहुं ॥ १९ ॥

पुंसि जसो डउ डआ वा ॥ ८ । ३ । २० ॥

इदुत इतीह पञ्चम्यन्तं संबध्यते ॥ इदुतः परस्य जसः पुंसि अउ अओ इत्यादेशौ डितौ वा भवतः ॥ अग्गउ अग्गओ । वायउ वायओ चिट्ठन्ति । पक्षे । अग्गिणो । वाउणो ॥ शेषे अदन्तवद्भावाद् अग्गी । वाऊ ॥ पुंसीति किम् । बुद्धीओ । धेणूओ । दहीइं । महूइं ॥ जस इति किम् । अग्गी ।

अग्गिणो । वाऊ । वाउणो पेच्छइ ॥ इदुत इत्येव । वच्छा ॥ २० ॥

वोतो डवो ॥ ८ । ३ । २१ ॥

उदन्तात्परस्य जसः पुंसि डित् अवो इत्यादेशो वा भवति ॥ साहवो । पक्षे । साहओ । साहउ । साहू । साहुणो ॥ उत इति किम् । वच्छा ॥ पुंसीत्येव । धेणू । महूइं ॥ जस इत्येव । साहू । साहुणो पेच्छ ॥ २१ ॥

जस-शसोर्णो वा ॥ ८।३।२२ ॥

इदुतः परयोर्जस्-शसोः पुंसि णो इत्यादेशो वा भवति ॥ गिरिणो । तरुणो रेहन्ति पेच्छ वा । पक्षे । गिरी । तरू ॥ पुंसीत्येव । दहीइं । महूइं ॥ जस्-शसोरिति किम् । गिरिं । तरुं ॥ इदुत इत्येव । वच्छा । वच्छे ॥ जस्-शसोरिति द्वित्वमिदुत इत्यनेन यथासंख्याभावार्थम् । एवमुत्तरसूत्रेपि ॥ २२ ॥

ङसि-ङसोः पुं-क्लीबे वा ॥ ८।३।२३ ॥

पुंसि क्लीबे च वर्तमानादिदुतः परयोर्ङसिङसोर्णो वा भवति ॥ गिरिणो । तरुणो । दहिणो । महुणो आगओ विआरो वा । पक्षे । ङसेः । गिरीओ । गिरीउ । गिरीहिन्तो । तरूओ । तरूउ । तरूहिन्तो ॥ हिलुकौ निषेत्स्येते ॥ ङसः । गिरिस्स । तरुस्स ॥ ङसिङसोरिति किम् । गिरिणा । तरुणा कयं ॥ पुंक्लीब इति किम् । बुद्धीअ । धेणूअ लद्धं समिद्धी वा ॥ इदुत इत्येव । कमलाओ । कमलस्स ॥ २३ ॥

टो णा ॥ ८ । ३ । २४ ॥

पुंक्लीबे वर्तमानादिदुतः परस्य टा इत्यस्य णा भवति ॥ गिरिणा । गामणिणा । खलपुणा । तरुणा । दहिणा । महुणा ॥ ट इति किम् । गिरी । तरू । दहिं । महुं ॥ पुंक्लीब इत्येव । बुद्धीअ । धेणूअ कयं ॥ इदुत इत्येव । कमलेण ॥ २४ ॥

क्लीबे स्वरान्म् सेः ॥ ८।३।२५ ॥

क्लीबे वर्तमानात्स्वरान्तान्नाम्नः सेः स्थाने म् भवति ॥ वणं । पेम्मं । दहिं । महुं ॥ दहि महु इति तु सिद्धापेक्षया ॥ केचिदनुनासिकमपीच्छ-

न्ति । दहिँ महुँ ॥ क्लीब इति किम् । बालो । बाला । स्वरादिति इदुतो निवृत्त्यर्थम् ॥ २५ ॥

जस्-शस इँ-ईं-णयः सप्राग्दीर्घाः ॥ ८।३।२६ ॥

क्लीबे वर्तमानान्नाम्नः परयोर्जस्-शसोः स्थाने सानुनासिकसानुस्वारा-विकारौ णिश्चादेशा भवन्ति सप्राग्दीर्घाः । एषु सत्सु पूर्वस्वरस्य दीर्घत्वं विधीयते इत्यर्थः ॥ इँ । जाइँ वयणाइँ अम्हे ॥ ईं । उम्मीलन्ति पङ्कयाईं पेच्छ वा चिट्ठन्ति । दहीईं जेम वा हुन्ति महूईं मुञ्च वा ॥ णि । फुल्लन्ति पङ्कयाणि गेण्ह वा । हुन्ति दहीणि जेम वा । एवं महूणि ॥ क्लीब इत्येव । वच्छा वच्छे ॥ जस्-शस इति किम् । सुहं ॥ २६ ॥

स्त्रियामुदोतौ वा ॥ ८।३।२७ ॥

स्त्रियां वर्तमानान्नाम्नः परयोर्जस्-शसोः स्थाने प्रत्येकम् उत् ओत् इत्येतौ सप्राग्दीर्घौ वा भवतः ॥ वचनभेदो यथासंख्यनिवृत्त्यर्थः ॥ मालाउ मालाओ । बुद्धीउ बुद्धीओ । सहीउ सहीओ । धेणूउ धेणूओ । वहूउ वहूओ । पक्षे । माला । बुद्धी । सही । धेणू । वहू ॥ स्त्रियामिति किम् । वच्छा । जस्-शस इत्येव । मालाए कयं ॥ २७ ॥

ईतः सेश्चा वा ॥ ८।३।२८ ॥

स्त्रियां वर्तमानादीकारान्तात् सेर्जस्-शसोश्च स्थाने आकारो वा भवति ॥ एसा हसन्तीआ । गोरीआ चिट्ठन्ति पेच्छ वा । पक्षे । हसन्ती । गोरीओ ॥ २८ ॥

टा-ङस्-ङेरदादिदेद्वा तु ङसेः ॥ ८ ।३।२९ ॥

स्त्रियां वर्तमानान्नाम्नः परेषां टाङस्ङीनां स्थाने प्रत्येकम् अत् आत् इत् एत् इत्येते चत्वार आदेशाः सप्राग्दीर्घा भवन्ति । ङसेः पुनरेते सप्राग्-दीर्घा वा भवन्ति ॥ मुद्धाअ । मुद्धाइ । मुद्धाए कयं मुहं ठिअं वा ॥ कप्रत्यये तु मुद्धिआअ । मुद्धिआइ । मुद्धिआए ॥ कमलिआअ । कमलि-आइ । कमलिआए ॥ बुद्धीअ । बुद्धीआ । बुद्धीइ । बुद्धीए कयं चिहओ ठिअं वा ॥ सहीअ । सहीआ । सहीइ । सहीए कयं वयणं ठिअं वा ॥

धेणूअ । धेणूआ । धेणूइ । धेणूए । कयं दुद्धं ठिअं वा ॥ वहूअ । वहूआ । वहूइ । वहूए कयं भवणं ठिअं वा ॥ ङसेस्तु वा । मुद्धाअ । मुद्धाइ । मुद्धाए । बुद्धीअ । बुद्धीआ । बुद्धीइ । बुद्धीए ॥ सहीअ । सहीआ । सहीइ । सहीए ॥ धेणूअ । धेणूआ । धेणूइ । धेणूए ॥ वहूअ । वहूआ । वहूइ । वहूए आगओ । पक्षे । मुद्धाओ । मुद्धाउ । मुद्धाहिन्तो ॥ रईओ । रईउ । रईहिन्तो । धेणूओ । धेणूउ । धेणूहिन्तो । इत्यादि ॥ 'शेषेदन्तवत्' (८-३-१२४) अतिदेशात् 'जस्-शस्-ङसित्तो-दो-द्वामि-दीर्घः' (८-३-१२) इति दीर्घत्वं पक्षेपि भवति ॥ स्त्रियामित्येव । वच्छेण । वच्छस्स । वच्छम्मि । वच्छाओ ॥ टादीनामिति किम् । मुद्धा । बुद्धी । सही । धेणू । वहू ॥ २९ ॥

नात आत् ॥ ८।३।३० ॥

स्त्रियां वर्तमानादादन्तान्नाम्नः परेषां टाङस्ङिङसीनामादादेशो न भवति ॥ मालाअ । मालाइ । मालाए कयं सुहं ठिअं आगओ वा ॥३०॥

प्रत्यये ङीर्न वा ॥ ८।३।३१ ॥

अणादिसूत्रेण (हे०२-४-२०) प्रत्ययनिमित्तो यो ङीरुक्तः स स्त्रियां वर्तमानान्नाम्नो वा भवति ॥ साहणी । कुरुचरी । पक्षे । आत् (हे० २-४-१८) इत्याप् । साहणा । कुरुचरा ॥ ३१॥

अजातेः पुंसः ॥ ८।३।३२ ॥

अजातिवाचिनः पुल्लिङ्गात् स्त्रियां वर्तमानात् ङीर्वा भवति ॥ नीली नीला । काली काला । हसमाणी हसमाणा । सुप्पणही सुप्पणहा । इमीए इमाए । इमीणं इमाणं । एईए एआए । एईणं एआणं ॥ अजातेरिति किम् । करिणी । अया । एलया ॥ अप्राप्ते विभाषेयम् । तेन गोरी कुमारी इत्यादौ संस्कृतवन्नित्यमेव ङीः ॥ ३२ ॥

किं-यत्तदोस्यमामि ॥ ८।३।३३ ॥

सिअम्आम्वर्जिते स्यादौ परे एभ्यः स्त्रियां ङीर्वा भवति ॥ कीओ । काओ । कीए । काए । कीसु । कासु । एवं । जीओ । जाओ ।

तीओ । ताओ । इत्यादि ॥ अस्यमामीति किम् । का । जा । सा । कं । जं । तं । काण । जाण । ताण ॥ ३३ ॥

छाया-हरिद्रयोः ॥ ८ । ३ । ३४ ॥

अनयोराप्प्रसङ्गे नान्नः स्त्रियां ङीर्वा भवति ॥ छाही छाया । हलद्दी हलद्दा ॥ ३४ ॥

स्वस्रादेर्डा ॥ ८ । ३ । ३५ ॥

स्वस्रादेः स्त्रियां वर्तमानात् डा प्रत्ययो भवति ॥ ससा । नणन्दा । दुहिआ । दुहिआहिं । दुहिआसु । दुहिआ-सुओ । गउआ ॥ ३५ ॥

ह्रस्वोमि ॥८।३।३६ ॥

स्त्रीलिङ्गस्य नाम्नोमि परे ह्रस्वो भवति ॥ मालं । नइं । वहुं । हसमाणिं । हसमाणं पेच्छ ॥ अमीति किम् । माला । सही । वहू ॥ ३६ ॥

आमन्त्र्यात्सौ मः ॥ ८ ३ । ३७ ॥

आमन्त्र्यार्थात्परे सौ सति ' **क्लीबे स्वरान्म् सेः** ' (८-३-२५) इति यो म् उक्तः स न भवति ॥ हे तण । हे दहि । हे महु ॥ ३७ ॥

डो दीर्घो वा ॥ ८ । ३ । ३८ ॥

आमन्त्र्यार्थात्परे सौ सति ' **अतः सेर्डोः** ' (३-२) इति यो नित्यं डोः प्राप्तो यश्च ' **अक्लीबे सौ** ' (३-१९) इति इदुतोरकारान्तस्य च प्राप्तो दीर्घः स वा भवति ॥ हे देव हे देवो ॥ हे खमा-समण हे खमा-समणो । हे अज्ज हे अज्जो ॥ दीर्घः । हे हरी हे हरि । हे गुरू हे गुरु । जाइ-विसुद्धेण पहू । हे प्रभो इत्यर्थः । एवं दोण्णि पहू जिअ-लोअे । पक्षे । हे पहु । एषु प्राप्ते विकल्पः ॥ इह त्वप्राप्ते हे गोअमा हे गोअम । हे कासवा हे कासव । रे रे चप्फलया । रे रे निग्घिणया ॥ ३८ ॥

ऋतोद्वा ॥ ८ । ३ । ३९ ॥

ऋकारान्तस्यामन्त्रणे सौ परे अकारोन्तादेशो वा भवति ॥ हे पितः । हे पिअ ॥ हे दातः । हे दाय । पक्षे । हे पिअरं । हे दायार ॥ ३९ ॥

नाम्न्यरं वा ॥ ८ । ३ । ४० ॥

ऋदन्तस्यामन्त्रणे सौ परे नाम्नि संज्ञायां विषये अरं इति अन्तादेशो वा भवति ॥ हे पितः । हे पिअरं । पक्षे । हे पिअ ॥ नाम्नीति किम् । हे कर्तः । हे कर्तार ॥ ४० ॥

वाप ए ॥ ८ । ३ । ४१ ॥

आमन्त्रणे सौ परे आप एत्वं व भवति ॥ हे माले । हे महिले । अज्जिए । पज्जिए । पक्षे । हे माला । इत्यादि ॥ आप इति किम् । हे पिउच्छा । हे माउच्छा ॥ बहुलाधिकारात् क्वचिदोत्वमपि । अम्मो भणामि भणिए ॥ ४१ ॥

ईदूतोर्ह्रस्वः ॥ ८ । ३ । ४२ ॥

आमन्त्रणे सौ परे ईदूदन्तयोर्ह्रस्वो भवति ॥ हे नइ । हे गामणि । हे समणि । हे वहु । हे खलपु ॥ ४२ ॥

क्विपः ॥ ८ । ३ । ४३ ॥

क्विबन्तस्येदूदन्तस्य ह्रस्वो भवति ॥ गामणिणा । खलपुणा । गामणिणो । खलपुणो ॥ ४३ ॥

ऋतामुदस्यमौसु वा ॥ ८ । ३ । ४४ ॥

सिअम्औवर्जिते अर्थात् स्यादौ परे ऋदन्तानामुदन्तादेशो वा भवति ॥ जस् । भत्तू । भत्तुणो । भत्तउ । भत्तओ । पक्षे । भत्तारा ॥ शस । भत्तू । भत्तुणो । पक्षे । भत्तारे ॥ टा । भत्तुणा । पक्षे । भत्तारेण ॥ भिस् । भत्तूहिं । पक्षे । भत्तारेहिं ॥ ङसि । भत्तुणो । भत्तूओ । भत्तूउ । भत्तूहि । भत्तूहिन्तो । पक्षे । भत्ताराओ । भत्ताराउ । भत्ताराहि । भत्ताराहिन्तो । भत्तारा । ङस् । भत्तुणो । भत्तुस्स । पक्षे भत्तारस्स । सुप् । भत्तूसु । पक्षे भत्तारेसु ॥ बहुवचनस्य व्याप्त्यर्थत्वात् यथादर्शनं नाम्न्यपि उद् वा भवति जस्शस्ङसिङस्सु । पिउणो । जामाउणो । भाउणो ॥ टायाम् । पिउणा ॥ भिसि । पिऊहिं ॥ सुपि । पिऊसु । पक्षे । पिअरा । इत्यादि ॥ अस्यमौस्विति किम् । सि । पिआ ॥ अम् । पिअरं ॥ औ । पिअरा ॥ ४४ ॥

आरः स्यादौ ॥ ८ । ३ । ४५ ॥

स्यादौ परे ऋत आर इत्यादेशो भवति ॥ भत्तारो । भत्तारा । भत्तारं । भत्तारे । भत्तारेण । भत्तारेहिं ॥ एवं ङस्यादिषूदाहार्यम् ॥ लुप्तस्याद्यपेक्षया। भत्तार-विहिअं ॥ ४५ ॥

आ अरा मातुः ॥ ८ । ३ । ४६ ॥

मातृसम्बन्धिन ऋतः स्यादौ परे आ अरा इत्यादेशो भवतः ॥ माआ । माअरा । माआउ । माआओ । माअराउ । माअराओ । माअं । माअरं । इत्यादि ॥ बाहुलकाज्जनन्यर्थस्य आ देवतार्थस्य तु अरा इत्यादेशः । माआए कुच्छीए । नमो माअराण ॥ '**मातुरिद्वा**' (८-१-१३५) इतीत्त्वे माईण इति भवति ॥ '**ऋतामुद्**' (८-३-४४) इत्यादिना उत्त्वे तु माऊए समन्निअं वन्दे इति ॥ स्यादावित्येव । माइदेवो । माइ-गणो ॥ ४६ ॥

नाम्यरः ॥ ८ । ३ । ४७ ॥

ऋदन्तस्य नाम्नि संज्ञायां स्यादौ परे अर इत्यन्तादेशो भवति॥ पिअरा। पिअरं । पिअरे । पिअरेण । पिअरेहिं । जामायरा । जामायरं । जामायरे । जामायरेण । जामायरेहिं । भायरा । भायरं । भायरे । भायरेण । भायरेहिं ॥ ४७ ॥

आ सौ न वा ॥ ८ । ३ । ४८ ॥

ऋदन्तस्य सौ परे आकारो वा भवति ॥ पिआ । जामाया। भाया। कत्ता । पक्षे । पिअरो । जामायरो । भायरो । कत्तारो ॥ ४८ ॥

राज्ञः ॥ ८ । ३ । ४९ ॥

राज्ञो नलोपेन्त्यस्य आत्वं वा भवति सौ परे ॥ राया। हे राया । पक्षे। आणादेशे । रायाणो ॥ हे राया । हे रायमिति तु शौरसेन्याम् । एवं हे अप्पं । हे अप्प ॥ ४९ ॥

जस्-शस्-ङसि-ङसां णो ॥ ८ । ३ । ५० ॥

राजन्शब्दात्परेषां णो इत्यादेशो वा भवति ॥ जस् । रायाणो चिट्ठन्ति। पक्षे । राया॥ शस् । रायाणो पेच्छ । पक्षे। राया । राए ॥ ङसि । राइणो

रण्णो आगओ । पक्षे । रायाओ । रायाउ । रायाहि । रायाहिन्तो । राया ॥ ङस् । राइणो रण्णो धणं । पक्षे । रायस्स ॥ ५० ॥

टो णा ॥ ८ । ३ । ५१ ॥

राजन्शब्दात्परस्य टा इत्यस्य णा इत्यादेशो वा भवति ॥ राइणा । रण्णा । पक्षे । रायेण कयं ॥ ५१ ॥

ङेर्ङस्य णो–णा–ङौ ॥ ८ । ३ । ५२ ॥

राजन्शब्दसंबन्धिनो जकारस्य स्थाने णोणाङिषु परेषु इकारो वा भवति ॥ राइणो चिट्ठन्ति पेच्छ आगओ धणं वा ॥ राइणा कयं । राइम्मि । पक्षे । रायाणो । रण्णो । रायणा । राएण । रायम्मि ॥ ५२ ॥

इणममामा ॥ ८ । ३ । ५३ ॥

राजन्शब्दसंबन्धिनो जकारस्य अमाम्भ्यां सहितस्य स्थाने इणम् इत्यादेशो वा भवति ॥ राइणं पेच्छ । राइणं धणं । पक्षे । रायं । राईणं ॥५३॥

ईद्भिस्भ्यसाम्सुपि ॥ ८ । ३ । ५४ ॥

राजन्शब्दसम्बन्धिनो जकारस्य भिसादिषु परतो वा ईकारो भवति ॥ भिस् । राईहि ॥ भ्यस् । राईहि । राईहिन्तो राईसुन्तो ॥ आम् । राईणं ॥ सुप् । राईसु । पक्षे । रायाणेहि । इत्यादि ॥ ५४ ॥

आजस्य टा-ङ-सि ङस्सु सणाणोप्वण् ॥ ८ । ३ । ५५ ॥

राजन्शब्दसंबन्धिन आज इत्यवयवस्य टाङसिङस्सु णा णो इत्यादेशापन्नेषु परेषु अण् वा भवति ॥ रण्णा राइणा कयं । रण्णो राइणो आगओ धणं वा ॥ टाङसिङस्विति किम् । रायाणो चिट्ठन्ति पेच्छ वा ॥ सणाणेष्विति किम् । राएण । रायाओ । रायस्स ॥ ५५ ॥

पुंस्यन आणो राजवच्च ॥ ८ । ३। ५६ ॥

पुंल्लिङ्गे वर्तमानस्यान्नन्तस्य स्थाने आण इत्यादेशो वा भवति । पक्षे । यथादर्शनं राजवत् कार्यं भवति ॥ आणादेशे च **'अतः सेर्डोः'** (८–३–२) इत्यादयः प्रवर्तन्ते । पक्षे तु **'राज्ञः' 'जस्-शस्-ङसि-ङसां णो'** (८–३–५०) **'टोणा'** (८–३–२४) **'इणममामा'** (८–३–५३) इति प्रवर्तन्ते ॥

अप्पाणो । अप्पाणा । अप्पाणं । अप्पाणे । अप्पाणेण । अप्पाणेहि । अप्पाणाओ । अप्पाणासुन्तो । अप्पाणस्स । अप्पाणाण । अप्पाणम्मि । अप्पाणेसु । अप्पाण-कयं । पक्षे । राजवत् । अप्पा । अप्पो । हे अप्पा । हे अप्प । अप्पाणो चिट्ठन्ति । अप्पाणो पेच्छ । अप्पणा । अप्पेहिं । अप्पाणो । अप्पाओ । अप्पाउ । अप्पाहि । अप्पाहिन्तो । अप्पा । अप्पासुन्तो ॥ अप्पणो धणं । अप्पाणं । अप्पे । अप्पेसु ॥ रायाणो । रायाणा । रायाणं । रायाणे । रायाणेण । रायाणेहिं । रायाणाहिन्तो । रायाणस्स । रायाणाणं । रायाणम्मि । रायाणेसु । पक्षे । राया । इत्यादि । एवं जुवाणो । जुवाण–जणो । जुआ ॥ बम्हाणो । बम्हा ॥ अद्धाणो । अद्धा ॥ उक्षन् । उच्छाणो । उच्छा । गावाणो । गावा ॥ पूसाणो । पूसा ॥ तक्खाणो । तक्खा ॥ मुद्धाणो । मुद्धा ॥ श्वन् । साणो । सा ॥ सुकर्मणः पश्य । सुकम्माणे पेच्छ । निएइ कह सो सुकम्माणे । पश्यति कथं स सुकर्मण इत्यर्थः ॥ पुंसीति किम् । शर्म । सम्मं ॥ ५६ ॥

आत्मनष्टेः णिआ णइआ ॥ ८।३।५७ ॥

आत्मनः परस्याष्टायाः स्थाने णिआ णइआ इत्यादेशौ वा भवतः ॥ अप्पणिआ पाउसे उवगयम्मि । अप्पाणिआ य विआड्डि खाणिआ । अप्पणइआ । पक्षे । अप्पाणेण ॥ ५७ ॥

अतः सर्वादेर्डेर्जसः ॥ ८ । ३ । ५८ ॥

सर्वादेरदन्तात्परस्य जसः डित् ए इत्यादेशो भवति ॥ सव्वे । अन्ने । जे । ते । के । एक्के । कयरे । इयरे । एए ॥ अत इति किम् । सव्वाओ रिद्धीओ ॥ जस इति किम् । सव्वस्स ॥ ५८ ॥

डेः स्सिं-म्मि-त्थाः ॥ ८ । ३ । ५९ ॥

सर्वादेरकारात्परस्य डेः स्थाने स्सिं म्मि त्थ एते आदेशा भवन्ति ॥ सव्वस्सिं । सव्वम्मि । सव्वत्थ ॥ अन्नस्सिं । अन्नम्मि । अन्नत्थ ॥ एवं सर्वत्र ॥ अत इत्येव । अमुम्मि ॥ ५९ ॥

न वानिदमेतदो हिं ॥ ८।३।६० ॥

इदम्-एतद्भ्यां जसादेरदन्तात्परस्य डेर्हिमादेशो वा भवति ॥ सव्वहिं । अन्नहिं । कहिं । जहिं । तहिं ॥ बहुलाधिकारात् किंयत्तद्भ्यः स्त्रियामपि । काहिं । जाहिं । ताहिं ॥ बाहुलकादेव **'किंयत्तदोस्यमामि'** (८-३-३३) इति ङीर्नास्ति ॥ पक्षे । सव्वस्सिं । सव्वम्मि । सव्वत्थ । इत्यादि ॥ स्त्रियां तु पक्षे । काए । कीए । जाए । जीए । ताए । तीए ॥ इदमेतद्भ्यां जसि किम् । इमस्सिं । एअस्सिं ॥ ६० ॥

आमो डेसिं ॥ ८ । ३ । ६१ ॥

सर्वादेरकारान्तात्परस्यामो डेसिमित्यादेशो वा भवति ॥ सव्वेसिं । अन्नेसिं । अवरेसिं । इमेसिं । एएसिं । जेसिं । तेसिं । केसिं । पक्षे । सव्वाण । अन्नाण । अवराण । इमाण । एआण । जाण । ताण । काण॥ बाहुलकात् स्त्रियामपि । सर्वासाम् । सव्वेसिं ॥ एवम् अन्नेसिं । तेसिं ॥ ६१ ॥

किंतद्भ्यां डासः ॥ ८ । ३ । ६२ ॥

किंतद्भ्यां परस्यामः स्थाने डास इत्यादेशो वा भवति ॥ कास । तास । पक्षे । केसिं । तेसिं ॥ ६२ ॥

किंयत्तद्भ्यो ङसः ॥ ८ । ३ । ६३ ॥

एभ्यः परस्य ङसः स्थाने डास इत्यादेशो वा भवति । **'ङसः स्सः'** (३-१०) इत्यस्यापवादः । पक्षे सोपि भवति ॥ कास । कस्स । जास। जस्स । तास । तस्स ॥ बहुलाधिकारात् किंतद्भ्यामाकारान्ताभ्यामपि डासादेशो वा । कस्या धनम् । कास धणं ॥ तस्या धनम् । तास धणं । पक्षे । काए । ताए ॥ ६३ ॥

ईद्भ्यः स्सा से ॥ ८ । ३ ॥ ६४ ॥

किमादिभ्य ईदन्तेभ्यः परस्य ङसः स्थाने स्सा से इत्यादेशौ वा भवतः । **'टा-ङस्-ङेरदादिदेद्वा तु ङसेः'** (८-३-२९) इत्यस्यापवादः । पक्षे अदादयोपि ॥ किस्सा । कीसे । कीअ । कीआ । कीइ । कीए ॥ जिस्सा ।

जीसे । जीअ । जीआ । जीइ । जीए ॥ तिस्सा । तीसे । तीअ तीआ । तीइ । तीए ॥ ६४ ॥

ङेर्डाहे डाला इआ काले ॥ ८ । ३ । ६५ ॥

किंयत्तद्भ्यः कालेभिधेये ङेः स्थाने आहे आला इति डितौ इआ इति च आदेशा वा भवन्ति । हिंस्सिम्मित्थानामपवादः । पक्षे तेपि भवन्ति ॥ काहे । काला । कइआ ॥ जाहे । जाला । जइआ ॥ ताहे । ताला । तइआ ॥

ताला जाअन्ति गुणा जाला ते सहिअएहिं घेप्पन्ति ।

पक्षे । कहिं । कस्सिं । कम्मि । कत्थ ॥ ६५ ॥

ङसेर्म्हा ॥ ८।३।६६ ॥

किंयत्तद्भ्यः परस्य ङसेः स्थाने म्हा इत्यादेशो वा भवति ॥ कम्हा । जम्हा । तम्हा । पक्षे । काओ । जाओ । ताओ ॥ ६६ ॥

तदो डोः ॥ ८।३।६७ ॥

तदः परस्य ङसेर्डो इत्यादेशो वा भवति ॥ तो । तम्हा ॥ ६७ ॥

किमो डिणो–डीसौ ॥ ८।३।६८ ॥

किमः परस्य ङसेर्डिणो डीस इत्यादेशौ वा भवतः ॥ किणो । कीस । कम्हा ॥ ६८ ॥

इदमेतत्किं–यत्तद्भ्यष्टो डिणा ॥ ८।३।६९ ॥

एभ्यः सर्वादिभ्योकारान्तेभ्यः परस्याष्टायाः स्थाने डित् इणा इत्यादेशो वा भवति ॥ इमिणा । इमेण ॥ एदिणा । एदेण ॥ किणा । केण ॥ जिणा । जेण ॥ तिणा । तेण ॥ ६९ ॥

तदो णः स्यादौ क्वचित् ॥ ८।३।७० ॥

तदः स्थाने स्यादौ परे ण आदेशो भवति क्वचित् लक्ष्यानुसारेण ॥ णं पेच्छ । तं पश्येत्यर्थः ॥ सोअइ अ णं रहुवई । तमित्यर्थः ॥ स्त्रियामपि । हत्थुन्नामिअ–मुही णं तिअडा । तां त्रिजटेत्यर्थः ॥ णेण भणिअं । तेन भणितमित्यर्थः ॥ तो णेण कर-यल-ट्ठिआ । तेनेत्यर्थः ॥ भणिअं च

णाए । तयेत्यर्थः ॥ णेहिं कयं । तैः कृतमित्यर्थः ॥ णाहिं कयं । ताभिः कृतमित्यर्थः ॥ ७० ॥

किमः कस्त्र-तसोश्च ॥ ८।३।७१ ॥

किमः को भवति स्यादौ त्रतसोश्च परयोः ॥ को । के । कं । के । केण ॥ त्र । कत्थ ॥ तस् । कओ । कत्तो । कदो ॥ ७१ ॥

इदम इमः ॥ ८।३।७२ ॥

इदमः स्यादौ परे इम आदेशो भवति ॥ इमो । इमे । इमं । इमे । इमेण ॥ स्त्रियामपि । इमा ॥ ७२ ॥

पुं-स्त्रियोर्न वायमिमिआ सौ ॥ ८।३।७३ ॥

इदम्शब्दस्य सौ परे अयमिति पुल्लिङ्गे इमिआ इति स्त्रीलिङ्गे आदेशौ वा भवतः ॥ अहवायं कय-कज्जो । इमिआ वाणिअ-धूआ । पक्षे । इमो । इमा ॥ ७३ ॥

स्सिं-स्सयोरत् ॥ ८।३।७४ ॥

इदमः स्सिं स्स इत्येतयोः परयोरद् भवति वा ॥ अस्सिं । अस्स । पक्षे । इमादेशोपि । इमस्सिं । इमस्स ॥ बहुलाधिकारादन्यत्रापि भवति । एहि । एसु । आहि । एभिः एषु आभिरित्यर्थः ॥ ७४ ॥

डेर्मेन हः ॥ ८।३।७५ ॥

इदमः कृतेमादेशात् परस्य डेः स्थाने मेन सह ह आदेशो वा भवति ॥ इह । पक्षे । इमस्सिं । इमम्मि ॥ ७५ ॥

न त्थः ॥८।३।७६ ॥

इदमः परस्य **'डेः स्सिं-म्मि-त्थाः'** (३-५९) इति प्राप्तः त्थो न भवति ॥ इह । इमस्सिं । इमम्मि ॥ ७६ ॥

णो म्-शस्टा-भिसि ॥ ८।३।७७ ॥

इदमः स्थाने अम्शस्टाभिस्सु परेषु ण आदेशो वा भवति ॥ णं पेच्छ । णे पेच्छ । णेण । णेहिं कयं । पक्षे । इमं । इमे । इमेण । इमेहिं ॥७७॥

अमेणम् ॥ ८।३।७८ ॥

इदमोमा सहितस्य स्थाने इणम् इत्यादेशो वा भवति ॥ इणं वेच्छ । पक्षे । इमं ॥ ७८ ॥

क्लीबे स्यमेदामिणमो च ॥ ८।३।७९ ॥

नपुंसकलिङ्गे वर्तमानस्येदमः स्यम्भ्यां सहितस्य इदम् इणमो इणम् च नित्यमादेशा भवन्ति ॥ इदं इणमो इणं धणं चिट्ठइ पेच्छ वा ॥ ७९ ॥

किमः किं ॥ ८।३।८० ॥

किमः क्लीबे वर्तमानस्य स्यम्भ्यां सह किं भवति ॥ किं कुलं तुह । किं किं ते पडिहाइ ॥८० ॥

वेदं–तदेतदो ङसाम्भ्यां से–सिमौ ॥ ८ । ३ । ८१ ॥

इदम् तद् एतद् इत्येतेषां स्थाने ङस् आम् इत्येताभ्यां सह यथासंख्यं से, सिम् इत्यादेशौ वा भवतः ॥ इदम् । से सीलम् । से गुणा । अस्य शीलं गुणा वेत्यर्थः ॥ सिं उच्छाहो । एषाम् उत्साह इत्यर्थः ॥ तद् । से सीलं । तस्य तस्या वेत्यर्थः ॥ सिं गुणा । तेषां तासां वेत्यर्थः ॥ एतत् । से अहिअं । एतस्याहितमित्यर्थः ॥ सिं गुणा । सिं सीलं । एतेषां गुणाः शीलं वेत्यर्थः । पक्षे । इमस्स । इमेसिं । इमाण ॥ तस्स । तेसिं । ताण ॥ एअस्स । एएसिं । एआण । इदंतदोरामापि सेआदेशं कश्चिदिच्छति ॥ ८१ ॥

वैतदो ङसेस्तो त्ताहे ॥ ८ । ३ । ८२ ॥

एतदः परस्य ङसेः स्थाने त्तो त्ताहे इत्येतावादेशौ वा भवतः ॥ एत्तो । एत्ताहे । पक्षे । एआओ । एआउ । एआहि । एआहिन्तो । एआ॥८२॥

त्थे च तस्य लुक् ॥ ८ । ३ । ८३ ॥

एतदस्त्थे परे चकारात् त्तो त्ताहे इत्येतयोश्च परयोस्तस्य लुग् भवति ॥ एत्थ । एत्तो । एत्ताहे ॥ ८३ ॥

एरदीतौ म्मौ वा ॥ ८ । ३ । ८४ ॥

एतद एकारस्य ङ्यादेशे म्मौ परे अदीतौ वा भवतः ॥ अयम्मि । ईयम्मि । पक्षे । एअम्मि ॥ ८४ ॥

वैसेणमिणमो सिना ॥ ८ । ३ । ८५ ॥

एतदः सिना सह एस इणम् इणमो इत्यादेशा वा भवन्ति ॥ सव्व-स्स वि एस गई ॥ सव्वाण वि पत्थिवाण एस मही ॥ एस सहाओ च्चिअ ससहरस्स ॥ एस सिरं । इणं । इणमो । पक्षे । एअं । एसा । एसो ॥ ८५ ॥

तदश्च तः सोक्लीबे ॥ ८ । ३ । ८६ ॥

तद एतदश्च तकारस्य सौ परे अक्लीबे सो भवति ॥ सो पुरिसो । सा महिला । एसो पिओ । एसा मुद्धा ॥ सावित्येव । ते एए धन्ना । ताओ एआओ महिलाओ ॥ अक्लीब इति किम् । तं एअं वणं ॥ ८६ ॥

वादसो दस्य होनोदाम् ॥ ८ । ३ । ८७ ॥

अदसो दकारस्य सौ परे ह आदेशो वा भवति तस्मिंश्च कृते **'अतः सेर्डोः'** (८–३–२) इत्योत्वं **'शेषं संस्कृतवत्'** (८–४–४४८) इत्यतिदेशाद् **'आत्'** (हे०–२–४१८) इत्याप् **'क्लीबे स्वरान्म् सेः'** (८–३–२५) इति मश्च न भवति ॥ अह पुरिसो । अह महिला । अह वणं । अह मोहो पर-गुण–लहुअयाइ । अह णे हिअएण हसइ मारुय-तणओ । असावस्मान् हसतीत्यर्थः । अह कमल-मुही । पक्षे । उत्तरेण मुरादेशः । अमू पुरिसो । अमू महिला । अमुं वणं ॥ ८७ ॥

मुः स्यादौ ॥ ८।३।८८ ॥

अदसो दस्य स्यादौ परे मुरादेशो भवति ॥ अमू पुरिसो । अमुणो पुरिसा । अमुं वणं । अमूइं वणाइं । अमूणि वणाणि । अमू माला । अमूउ अमूओ मालाओ । अमुणा । अमूहिं ॥ ङसि । अमूओ । अमूउ । अमूहिन्तो ॥ भ्यस् । अमूहिन्तो । अमूसुन्तो ॥ ङस् । अमुणो । अमुस्स॥ आम् । अमूण ॥ ङि । अमुम्मि ॥ सुप् । अमूसु ॥ ८८ ॥

म्मावयेऔ वा ॥ ८ । ३ । ८९ ॥

अदसोन्त्यव्यञ्जनलुकि दकारसन्तस्य स्थाने ङ्यादेशे म्मौ परतः अय इअ इत्यादेशौ वा भवतः ॥ अयम्मि । इअम्मि । पक्षे । अमुम्मि ॥८९॥

युष्मदस्तं तुं तुवं तुह तुमं सिना ॥ ८ । ३ । ९० ॥

युष्मदः सिना सह तं तुं तुवं तुह तुमं इत्येते पञ्चादेशा भवन्ति ॥ तं तुं तुवं तुह तुमं दिट्ठो ॥ ९० ॥

भे तुब्भे तुज्झ तुम्ह तुय्हे उय्हे जस ॥ ८ । ३ । ९१ ॥

युष्मदो जसा सह भे तुब्भे तुज्झ तुम्ह तुय्हे उय्हे इत्येते षडादेशा भवन्ति ॥ भे तुब्भे तुज्झ तुम्ह तुय्हे उय्हे चिट्ठह । **'ब्भो म्हज्झौ वा'** (३–१०४) इति वचनात् तुम्हे । तुज्झे । एवं चाष्टरूप्यम् ॥ ९१ ॥

तं तुं तुमं तुवं तुह तुमे तुए अमा ॥ ८ । ३ । ९२ ॥

युष्मदोमा सह एते सप्तादेशा भवन्ति ॥ तं तुं तुमं तुवं तुह तुमे तुए वन्दामि ॥ ९२ ॥

वो तुज्झ तुब्भे तुय्हे उय्हे भे शसा ॥ ८ । ३ । ९३ ॥

युष्मदः शसा सह एते षडादेशा भवन्ति ॥ वो तुज्झ तुब्भे । **'ब्भो म्हज्झौ वा'** इति वचनात् तुम्हे तुज्झे तुय्हे उय्हे भे पेच्छामि ॥ ९३ ॥

भे दि दे ते तइ तए तुमं तुमइ तुमए तुमे तुमाइ टा ॥८ । ३ । ९४॥

युष्मदष्टा इत्यनेन सह एते एकादशादेशा भवन्ति ॥ भे दि दे ते तइ तए तुमं तुमइ तुमए तुमे तुमाइ जम्पिअं ॥ ९४ ॥

भे तुब्भेहिं उज्झेहिं उम्हेहिं तुय्हेहिं उय्हेहिं भिसा ॥ ८ । ३ । ९५ ॥

युष्मदो भिसा सह एते षडादशा भवन्ति ॥ भे । तुब्भेहिं । **'ब्भो म्हज्झौ वा'** इति वचनात् तुम्हेहिं तुज्झेहिं उज्झेहिं उम्हेहिं तुय्हेहिं उय्हेहिं भुत्तं । एवं चाष्टरूप्यम् ॥ ९५ ॥

तइ–तुव–तुम–तुह–तुब्भा ङसौ ॥ ८ । ३ । ९६ ॥

युष्मदो ङसौ पञ्चम्येकवचने परत एते पञ्चादेशा भवन्ति । ङसेस्तु त्तोदोदुहिहिन्तोलुको यथाप्राप्तमेव ॥ तइत्तो । तुवत्तो । तुमत्तो । तुहत्तो । तुब्भत्तो । **'ब्भो म्हज्झौ वा'** इति वचनात् तुम्हत्तो । तुज्झत्तो ॥ एवं दोदुहिहिन्तोलुक्ष्वप्युदाहार्यम् ॥ तत्तो इति तु त्वत्त इत्यस्य वलोपे सति ॥ ९६ ॥

तुय्ह तुब्भ तहिन्तो ङसिना ॥ ८ । ३ । ९७ ॥

युष्मदो ङसिना सहितस्य एते त्रय आदेशा भवन्ति ॥ तुय्ह तुब्भ तहिन्तो आगओ । **'ब्भो म्हज्झौ वा'** इति वचनात् तुह्म । तुज्झ । एवं च पञ्च रूपाणि ॥ ९७ ॥

तुब्भ–तुय्होय्होम्हा भ्यसि ॥ ८ । ३ । ९८ ॥

युष्मदो भ्यसि परत एते चत्वार आदेशा भवन्ति ॥ भ्यसस्तु यथाप्राप्तमेव ॥ तुब्भत्तो । तुय्हत्तो । उय्हत्तो । उह्मत्तो **'ब्भो म्हज्झौ वा'** इति वचनात् तुम्हत्तो । तुज्झत्तो ॥ एवं दोदुहिहिन्तोष्वप्युदाहार्यम् ॥ ९८ ॥

तइ–तु–ते–तुम्हं–तुह–तुहं–तुव–तुम–तुमे–तुमो–तुमाइ-दि-दे-इ-ए–तुब्भोब्भोय्हा ङसा ॥ ८ । ३ । ९९ ॥

युष्मदो ङसा षष्ठ्येकवचनेन सहितस्य एते अष्टादशादेशा भवन्ति ॥ तइ । तु । ते । तुम्हं । तुह । तुहं । तुव । तुम । तुमे । तुमो । तुमाइ । दि । दे । इ । ए । तुब्भ । उब्भ । उय्ह धणं ॥ **'ब्भो म्ह–ज्झौ वा'** इति वचनात् तुम्ह । तुज्झ । उम्ह । उज्झ । एवं च द्वाविंशती रूपाणि ॥९९॥

तु वो भे तुब्भ तुब्भं तुब्भाण तुवाण तुमाण तुहाण उम्हाण आमा ॥ ८।३।१०० ॥

युष्मद् आमा सहितस्य एते दशादेशा भवन्ति ॥ तु । वो । भे । तुब्भ । तुब्भं । तुब्भाण । तुवाण । तुमाण । तुहाण । उम्हाण । **'क्त्वा–स्यादेर्ण-स्त्रोर्वा** (८–१–२७) इत्यनुस्वारे तुब्भाणं । तुवाणं । तुमाणं । तुहाणं । उम्हाणं ॥ **'ब्भो म्ह–ज्झौ वा'** इति वचनात् तुम्ह । तुज्झ । तुम्हं । तुज्झं । तुम्हाण । तुम्हाणं । तुज्झाण । तुज्झाणं धणं । एवं च त्रयोविंशती रूपाणि ॥ १०० ॥

तुमे तुमए तुमाइ तइ तए ङिना ॥ ८।३।१०१ ॥

युष्मदो ङिना सप्तम्येकवचनेन सहितस्य एते पञ्चादेशा भवन्ति ॥ तुमे तुमए तुमाइ तइ तए ठिअं ॥ १०१ ॥

तु–तुव–तुम–तुह–तुब्भा ङौ ॥ ८।३।१०२ ॥

युष्मदो ङौ परत एते पञ्चादेशा भवन्ति । ङेस्तु यथाप्राप्तमेव । तुम्मि । तुवम्मि । तुमम्मि । तुहम्मि । तुब्भम्मि । **'ब्भो म्ह–ज्झौ वा'** इति वचनात् तुम्हम्मि । तुज्झम्मि । इत्यादि ॥ १०२ ॥

सुपि ॥ ८।३।१०३ ॥

युष्मदः सुपि परतः तु-तुव-तुम-तुह-तुब्भा भवन्ति ॥ तुसु । तुवेसु । तुमेसु । तुहेसु । तुब्भेसु ॥ **'ब्भो म्ह–ज्झौ वा'** इति वचनात् तुम्हेसु । तुज्झेसु ॥ केचित्तु सुप्येत्वविकल्पमिच्छन्ति । तन्मते तुवसु । तुमसु । तुहसु । तुब्भसु । तुम्हसु । तुज्झसु ॥ तुब्भस्यात्वमपीच्छत्यन्यः । तुभासु । तुम्हासु । तुज्झासु ॥ १०३ ॥

ब्भो म्ह–ज्झौ वा ॥ ८ । ३ । १०४ ॥

युष्मदादेशेषु यो द्विरुक्तो भस्तस्य म्ह ज्झ इत्येतावादेशौ वा भवतः ॥ पक्षे स एवास्ते । तथैव चोदाहृतम् ॥ १०४ ॥

अस्मदो म्मि अम्मि अम्हि हं अहं अहयं सिना ॥ ८।३।१०५॥

अस्मदः सिना सह एते षडादेशा भवन्ति ॥ अज्ज म्मि हासिआ मामि तेण ॥ उन्नम न अम्मि कुविआ । अम्हि करेमि । जेण हं विद्धा । किं पम्हुट्ठम्मि अहं । अहयं कय–प्पणामो ॥ १०५ ॥

अम्ह अम्हे अम्हो मो वयं भे जसा ॥ ८।३।१०६ ॥

अस्मदो जसा सह एते षडादेशा भवन्ति ॥ अम्ह अम्हे अम्हो मो वयं भे भणामो ॥ १०६ ॥

णे णं मि अम्मि अम्ह मम्ह मं ममं मिमं अहं अमा ॥ ८ । ३ । १०७ ॥

अस्मदोमा सह एते दशादेशा भवन्ति ॥ णे णं मि अम्मि अम्ह मम्ह मं ममं मिमं अहं पेच्छ ॥ १०७ ॥

अम्हे अम्हो अम्ह णे शसा ॥ ८ । ३ । १०८ ॥

अस्मदः शसा सह एते चत्वार आदेशा भवन्ति ॥ अम्हे अम्हो अम्ह णे पेच्छ ॥ १०८ ॥

मि मे ममं ममए ममाइ मइ मए मयाइ णे टा ॥८ । ३ ।१०९॥

अस्मदष्टा सह एते नवादेशा भवन्ति ॥ मि मे ममं ममए ममाइ मइ मए मयाइ णे कयं ॥ १०९ ॥

अम्हेहि अम्हाहि अम्ह अम्हे णे भिसा ॥ ८ । ३ । ११० ॥

अस्मदो भिसा सह एते पञ्चादेशा भवन्ति ॥ अम्हेहि अम्हाहि अम्ह अम्हे णे कयं ॥ ११० ॥

मइ–मम–मह–मज्झा ङसौ ॥ ८ । ३ । १११ ॥

अस्मदो ङसौ पञ्चम्येकवचने परत एते चत्वार आदेशा भवन्ति । ङसेस्तु यथाप्राप्तमेव ॥ मइत्तो ममत्तो महत्तो मज्झत्तो आगओ ॥ मत्तो इति तु मत्त इत्यस्य ॥ एवं दो-दु-हि-हिन्तो-लुक्ष्वप्युदाहार्यम् ॥१११॥

ममाम्हौ भ्यसि ॥ ८ । ३ । ११२ ॥

अस्मदो भ्यसि परतो मम अम्ह इत्यादेशौ भवतः । भ्यसस्तु यथाप्राप्तम् ॥ ममत्तो । अम्हत्तो । ममाहिन्तो । अम्हाहिन्तो । ममासुन्तो । अम्हासुन्तो । ममेसुन्तो । अम्हेसुन्तो ॥ ११२ ॥

मे मइ मम मह महं मज्झ मज्झं अम्ह अम्हं ङसा ॥८ । ३ । ११३॥

अस्मदो ङसा षष्ठ्येकवचनेन सहितस्य एते नवादेशा भवन्ति ॥ मे मइ मम मह महं मज्झ मज्झं अम्ह अम्हं धणं ॥ ११३ ॥

णे णो मज्झ अम्ह अम्हं अम्हे अम्हो अम्हाण ममाण महाण मज्झाण आमा ॥ ८ । २ । ११४ ॥

अस्मद आमा सहितस्य एते एकादशादेशा भवन्ति ॥ णे णो मज्झ अम्ह अम्हं अम्हे अम्हो अम्हाण ममाण महाण मज्झाणं धणं ॥ **'क्त्वा-स्यादेर्ण-स्वोर्वा'** (८–१–२७) इत्यनुस्वारे । अम्हाणं । ममाणं । महाणं । मज्झाणं । एवं च पञ्चदश रूपाणि ॥ ११४ ॥

मि मइ ममाइ मए मे ङिना ॥ ८ । ३ । ११५ ॥

अस्मदो ङिना सहितस्य एते पञ्चादेशा भवन्ति ॥ मि मइ ममाइ मए म ठिअं ॥ ११५ ॥

अम्ह–मम–मह–मज्झा ङौ ॥ ८ । ३ । ११६ ॥

अस्मदो ङौ परत एते चत्वार आदेशा भवन्ति । ङेस्तु यथाप्राप्तम् ॥ अम्हम्मि ममम्मि महम्मि मज्झम्मि ठिअं ॥ ११६ ॥

सुपि ॥ ८ । ३ । ११७ ॥

अस्मदः सुपि परे अम्हादयश्चत्वार आदेशा भवन्ति ॥ अम्हेसु । ममेसु । महेसु मज्झेसु । एत्वविकल्पमते तु । अम्हसु । ममसु । महसु । मज्झसु ॥ अम्हस्यात्वमपीच्छत्यन्यः । अम्हासु ॥ ११७ ॥

त्रेस्ती तृतीयादौ ॥ ८ । ३ । ११८ ॥

त्रेः स्थाने ती इत्यादेशो भवति तृतीयादौ ॥ तीहिं कयं । तीहिन्तो आगओ । तिण्हं धणं । तीसु ठिअं ॥ ११८ ॥

द्वेर्दो वे ॥ ८ । ३ । ११९ ॥

द्विशब्दस्य तृतीयादौ दो वे इत्यादेशौ भवतः ॥ दोहि वेहि कयं । दोहिन्तो वेहिन्तो आगओ । दोण्हं वेण्हं धणं । दोसु वेसु ठिअं ॥११९॥

दुवे दोण्णि वेण्णि च जस्–शसा ॥ ८ । ३ । १२० ॥

जस्-शस्भ्यां सहितस्य द्वेः स्थाने दुवे दोण्णि वेण्णि इत्येते दो वे इत्येतौ च आदेशा भवन्ति । दुवे दोण्णि वेण्णि दो वे ठिआ पेच्छ वा । **'ह्रस्वः संयोगे'** (८–१–८४) इति ह्रस्वत्वे दुण्णि विण्णि ॥ १२० ॥

त्रेस्तिण्णिः ॥ ८ । ३ । १२१ ॥

जस्-शस्भ्यां सहितस्य त्रेः स्थाने तिण्णि इत्यादेशो भवति ॥ तिण्णि ठिआ पेच्छ वा ॥ १२१ ॥

चतुरश्चत्तारो चउरो चत्तारि ॥ ८ । ३ । १२२ ॥

चतुरशब्दस्य जस्–शस्भ्यां सह चत्तारो चउरो चत्तारि इत्येते आदेशा भवन्ति ॥ चत्तारो । चउरो । चत्तारि चिट्ठन्ति पेच्छ वा ॥ १२२ ॥

संख्याया आमो ण्ह ण्हं ॥ ८ । ३ । १२३॥

संख्याशब्दात्परस्यामो ण्ह ण्हं इत्यादेशौ भवतः ॥ दोण्ह । तिण्ह । चउण्ह । पञ्चण्ह । छण्ह । सत्तण्ह । अट्ठण्ह ॥ एवं दोण्हं । तिण्हं ।

चउण्हं । पंचण्हं छण्हं । सत्तण्हं । अट्ठण्हं । नवण्हं । दसण्हं । पण्णरसण्हं दिवसाणं । अट्ठारसण्हं समण-साहस्सीणं ॥ कतीनाम् । कइण्हं ॥ बहुलाधिकाराद् विंशत्यादेर्न भवति ॥ १२३ ॥

शेषेदन्तवत् ॥ ८ । ३ । १२४ ॥

उपयुक्तादन्यः शेषस्तत्र स्यादिविधिरदन्तवदतिदिश्यते। येष्वाकाराद्यन्तेषु पूर्वं कार्याणि नोक्तानि तेषु **'जस्–शसोर्लुक्'** (८–३–४) इत्यादीनि अदन्ताधिकारविहितानि कार्याणि भवन्तीत्यर्थः ॥ तत्र **'जस्शसोर्लुक्'** इत्येतत्कार्यातिदेशः । माला गिरी गुरू सही वहू रेहन्ति पेच्छ वा ॥ **'अमोस्य'** (८–३–५) इत्येतत्कार्यातिदेशः । गिरिं गुरुं सहिं वहुं गामणिं खलपुं पेच्छ ॥ **'टा-आमोर्णः'** (८–३–६) इत्येतत्कार्यातिदेशः । हाहाण कयं । मालाण गिरीण गुरूण सहीण वहूण धणं । टायास्तु । **'टा णा'** (८–३–२४) ॥ **'टा-ङस्–ङेरदादिदेद्वा तु ङसेः'** (८–३–२९) इति विधिरुक्तः ॥ **'भिसो हि हि हिं'** (८–३–७) इत्येतत्कार्यातिदेशः । मालाहि गिरीहि गुरूहि सहीहि वहूहि कयं । एवं सानुनासिकानुस्वारयोरपि ॥ **'ङसेस् त्तो–दो–हि–हिन्तो–लुकः'** (८–३–८) इत्येतत्कार्यातिदेशः । मालाओ । मालाउ । मालाहिन्तो ॥ बुद्धीओ । बुद्धीउ । बुद्धीहिन्तो ॥ धेणूओ । धेणूउ । धेणूहिन्तो आगओ । हिलुकौ तु प्रतिषेत्स्येते (८–३–१२७, १२६.) **'भ्यसस् त्तो दो दु हि हिन्तो सुन्तो'** (८–३–९) इत्येतत्कार्यातिदेशः । मालाहिन्तो । मालासुन्तो । हिस्तु निषेत्स्यते (८–३–१२७) । एवं गिरीहिन्तो । इत्यादि ॥ **'ङसः स्सः'** (८–३–१०) इत्येतत्कार्यातिदेशः । गिरिस्स । गुरुस्स । दहिस्स । महुस्स ॥ स्त्रियां तु **'टा–ङस्–ङेः०'** (८–३–२९) इत्याद्युक्तम् ॥ **'ङे म्मि ङेः'** (८–३–११) इत्येतत्कार्यातिदेशः । गिरिम्मि ।गुरुम्मि । दहिम्मि । महुम्मि । ङेस्तु निषेत्स्यते (८–३–१२८) । स्त्रियां तु **'टा–ङस्–ङेः०'** (८–३–२९) इत्याद्युक्तम् ॥ **'जस्-शस्-ङसि-त्तो-दो-द्वामि दीर्घः'** (८–३–१२) इत्येतत्कार्यातिदेशः । गिरी गुरू

चिट्ठन्ति । गिरीओ गुरूओ आगओ । गिरीण गुरूण धणं ॥ **'भ्यसि वा'** (८–३–१३) इत्येतत्कार्यातिदेशो न प्रवर्तते **'इदुतो दीर्घः'** (८–३–१६) इति नित्यं विधानात् ॥ **' टाण–शस्येत् '** (८–३–१४) **'भिस्भ्यस्सुपि'** (८–३–१५) इत्येतत्कार्यातिदेशस्तु निषेत्स्यते (८–३–१२९)॥१२४॥

न दीर्घो णो ॥ ८ । ३ । १२५ ॥

इदुदन्तयोरर्थाज्जस्-शस्ङस्यादेशे णो इत्यस्मिन् परतो दीर्घो न भवति ॥ अग्गिणो । वाउणो ॥ णो इति किम् । अग्गी । अग्गीओ ॥ १२५ ॥

ङसेर्लुक् ॥ ८ । ३ । १२६ ॥

आकारान्तादिभ्योदन्तवत्प्राप्तो ङसेर्लुग् न भवति ॥ मालत्तो । मालाओ । मालाउ । मालाहिन्तो आगओ ॥ एवं अग्गीओ । वाऊओ । इत्यादि ॥१२६॥

भ्यसश्च हिः ॥ ८ । ३ ॥ १२७ ॥

आकारान्तादिभ्योदन्तवत्प्राप्तो भ्यसो ङसेश्च हिर्न भवति ॥ माला-हिन्तो । मालासुन्तो । एवं अग्गीहिन्तो । इत्यादि ॥ मालाओ । मालाउ । मालाहिन्तो ॥ एवम् अग्गीओ । इत्यादि ॥ १२७ ॥

ङेर्ङेः ॥ ८ । ३ । १२८ ॥

आकारान्तादिभ्योदन्तवत्प्राप्तो ङेर्ङे न भवति ॥ अग्गिमि । वाउम्मि । दहिम्मि । महुम्मि ॥ १२८ ॥

एत् ॥ ८ । ३ ॥ १२९ ॥

आकारान्तादीनामर्थात् टाशस्भिस्भ्यस्सुप्सु परतोदन्तवद् एत्वं न भवति ॥ हाहाण कयं ॥ मालाओ पेच्छ ॥ मालाहि कयं ॥ मालाहिन्तो । मालासुन्तो आगओ ॥ मालासु ठिअं ॥ एवं अग्गिणो । वाउणो । इत्यादि ॥ १२९ ॥

द्विवचनस्य बहुवचनम् ॥ ८ । ३ । १३० ॥

सर्वासां विभक्तीनां स्यादीनां त्यादीनां च द्विवचनस्य स्थाने बहुवचनं भवति ॥ दोण्णि कुणन्ति । दुवे कुणन्ति । दोहिं । दोहिन्तो । दोसुन्तो । दोसु । हत्था । पाया । श्रणया । नयणा ॥ १३० ॥

चतुर्थ्याः षष्ठी ॥ ८ । ३ । १३१ ॥

चतुर्थ्याः स्थाने षष्ठी भवति ॥ मुणिस्स । मुणीण देइ ॥ नमो देवस्स । देवाण ॥ १३१ ॥

तादर्थ्येङेर्वा ॥ ८ । ३ । १३२ ॥

तादर्थ्यविहितस्य ङेश्चतुर्थ्येकवचनस्य स्थाने षष्ठी वा भवति ॥ देवस्स देवाय । देवार्थमित्यर्थः ॥ ङेरिति किम् । देवाण ॥ १३२ ॥

वधाङ्गाइश्च वा ॥ ८ । ३ । १३३ ॥

वधशब्दात्परस्य तादर्थ्यङेर्ङिद् आइः षष्ठी च वा भवति ॥ वहाइं वहस्स वहाय । वधार्थमित्यर्थः ॥ १३३ ॥

क्वचिद् द्वितीयादेः ॥ ८ । ३ । १३४ ॥

द्वितीयादीनां विभक्तीनां स्थाने षष्ठी भवति क्वचित् ॥ सीमाधरस्स वन्दे । तिस्सा मुहस्स भरिमो । अत्र द्वितीयायाः षष्ठी ॥ धणस्य लद्धो । धनेन लब्ध इत्यर्थः । चिरस्स मुक्का । चिरेण मुक्तेत्यर्थः । तेसिमेअमणाइण्णं । तैरेतदनाचरितम् । अत्र तृतीयायाः ॥ चोरस्स बीहइ । चोराद्बिभेतीत्यर्थः । इअराइं जाण लहुअक्खराइं पायन्तिमिल्ल—सहिआण । पादान्तेन सहितेभ्य इतराणीति । अत्र पञ्चम्याः ॥ पिट्ठीए केस-भारो । अत्र सप्तम्याः ॥ १३४ ॥

द्वितीया-तृतीययोः सप्तमी ॥ ८ । ३ । १३५ ॥

द्वितीयातृतीययोः स्थाने क्वचित् सप्तमी भवति ॥ गामे वसामि । नयरे न जामि । अत्र द्वितीयायाः ॥ मइ वेविरीए मलिआइं ॥ तिसु तेसु अलंकिआ पुहवी । अत्र तृतीयायाः ॥ १३५ ॥

पञ्चम्यास्तृतीया च ॥ ८ । ३ । १३६ ॥

पञ्चम्याः स्थाने क्वचित् तृतीयासप्तम्यौ भवतः ॥ चोरेण बीहइ । चोराद्बिभेतीत्यर्थः ॥ अन्तेउरे रमिउमागओ राया । अन्तःपुराद् रन्त्वागत इत्यर्थः ॥ १३६ ॥

सप्तम्या द्वितीया ॥ ८ । ३ । १३७ ॥

सप्तम्याः स्थाने क्वचिद् द्वितीया भवति ॥ विज्जुज्जोयं भरइ रत्तिं ॥ आर्षे तृतीयापि दृश्यते । तेणं कालेणं । तेणं समएणं । तस्मिन् काले । तस्मिन् समये इत्यर्थः ॥ प्रथमाया अपि द्वितीया दृश्यते । चउवीसं पि जिणवरा । चतुर्विंशतिरपि जिनवरा इत्यर्थः ॥ १३७ ॥

क्यङोर्यलुक् ॥ ८ । ३ । १३८ ॥

क्यङन्तस्य-क्यङ्षन्तस्य वा सम्बन्धिनो यस्य लुग् भवति ॥ गरुआइ । गरुआअइ । अगुरुर्गुरुर्भवति गुरुरिवाचरति वेत्यर्थः ॥ क्यङ्ष् । दमदमाइ । दमदमाअइ ॥ लोहिआइ । लोहिआअइ ॥ १३८ ॥

त्यादीनामाद्यत्रयस्याद्यस्येचेचौ ॥ ८ । ३ । १३९ ॥

त्यादीनां विभक्तीनां परस्मैपदानामात्मनेपदानां च संबन्धिनः प्रथमत्रयस्य यदाद्यं वचनं तस्य स्थाने इच् एच् इत्येतावादेशौ भवतः ॥ हसइ । हसए । वेवइ । वेवए । चकारौ '**इचेचः**' (८–४–३१८) इत्यत्र विशेषणार्थौ ॥ १३९ ॥

द्वितीयस्य सि से ॥ ८ । ३ । १४० ॥

त्यादीनां परस्मैपदानामात्मनेपदानां च द्वितीयस्य त्रयस्य सम्बन्धिन आद्यवचनस्य स्थाने सि से इत्येतावादेशौ भवतः ॥ हससि । हससे । वेवसि । वेवसे ॥ १४० ॥

तृतीयस्य मिः ॥ ८ । ३ । १४१ ॥

त्यादीनां परस्मैपदानामात्मनेपदानां च तृतीयस्य त्रयस्याद्यस्य वचनस्य स्थाने मिरादेशो भवति ॥ हसामि । वेवामि ॥ बहुलाधिकाराद् मिवेः स्थानीयस्य मेरिकारलोपश्च ॥ बहु-जाणय रूसिउं सक्कं । शक्नोमीत्यर्थः ॥ न मरं । न म्रिये इत्यर्थः ॥ १४१ ॥

बहुष्वाद्यस्य न्ति न्ते इरे ॥ ८ । ३ । १४२ ॥

त्यादीनां परस्मैपदानामात्मनेपदानामाद्यत्रयसम्बन्धिनो बहुषु वर्तमानस्य वचनस्य स्थाने न्ति न्ते इरे इत्यादेशा भवन्ति ॥ हसन्ति । वेवन्ति । हसि-

ज्जन्ति । रमिज्जन्ति । मज्जन्ते खे मेहा ॥ वीहन्ते रक्खसाणं च ॥ उप्प-ज्जन्ते कइ-हिअय-सायरे कव्व-रयणाइं ॥ दोण्णि वि न पहुप्पिरे बाहू । न प्रभवत इत्यर्थः ॥ विच्छुहिरे । विक्षुभ्यन्तीत्यर्थः ॥ क्वचिद् रे एकत्वेपि । सूसइरे गाम-चिक्खल्लो । शुष्यतीत्यर्थः ॥ १४२ ॥

मध्यमस्येत्था-हचौ ॥ ८ । ३ । १४३ ॥

त्यादीनां परस्मैपदात्मनेपदानां मध्यमस्य त्रयस्य बहुषु वर्तमानस्य स्थाने इत्था हच् इत्येतावादेशौ भवतः ॥ हसित्था । हसह । वेवित्था । वेवह ॥ बाहुलकादित्थान्यत्रापि । यद्यत्ते रोचते । जं जं ते रोइत्था । हच् इति चकारः '**इह-हचोर्हस्य**' (८–४–२६८) इत्यत्र विशेषणार्थः ॥१४३॥

तृतीयस्य मो-मु-माः ॥ ८ । ३ । १४४ ॥

त्यादीनां परस्मैपदात्मनेपदानां तृतीयस्य त्रयस्य सम्बन्धिनो बहुषु वर्त-मानस्य वचनस्य स्थाने मो मु म इत्येते आदेशा भवन्ति ॥ हसामो । हसामु । हसाम । तुवरामो । तुवरामु । तुवराम ॥ १४४ ॥

अत एवैच् से ॥ ८ । ३ । १४५ ॥

त्यादेः स्थाने यौ एच् से इत्येतावादेशावुक्तौ तावकारान्तादेव भवतो नान्यस्मात् ॥ हसए । हससे ॥ तुवरए । तुवरसे ॥ करए । करसे ॥ अत इति किम् । ठाइ । ठासि ॥ वसुआइ । वसुआसि ॥ होइ । होसि । एवकारोकारान्ताद् एच् से एव भवत इति विपरीतावधारणनिषेधार्थः । तेनाकारान्ताद् इच् सि इत्येतावपि सिद्धौ ॥ हसइ । हससि ॥ वेवइ । वेवसि ॥ १४५ ॥

सिनास्तेः सिः ॥ ८ । ३ । १४६ ॥

सिना द्वितीयत्रिकादेशेन सह अस्तेः सिरादेशो भवति ॥ निट्ठुरो जं सि ॥ सिनेति किम् । सेआदेशे सति अत्थि तुमं ॥ १४६ ॥

मि–मो–मैर्म्हि–म्हो–म्हा वा ॥ ८ । ३ । १४७ ॥

अस्तेर्धातोः स्थाने मि मो म इत्यादेशैः सह यथासंख्यं म्हि म्हो म्ह इत्यादेशा वा भवन्ति ॥ एस म्हि । एषोस्मीत्यर्थः ॥ गय म्हो । गय म्ह ।

मुकारस्याग्रहणादप्रयोग एव तस्येत्यवसीयते । पक्षे अत्थि अहं।अत्थि अम्हे॥ अत्थि अम्हो ॥ ननु च सिद्धावस्थायां **'पक्ष्म–श्म–ष्म–स्म–म्हां म्हः'** (८–२–७४) इत्यनेन म्हादेशे म्हो इति सिध्यति । सत्यम् । किं तु विभक्तिविधौ प्रायः साध्यमानावस्थाङ्गीक्रियते । अन्यथा वच्छेण । वच्छेसु । सव्वे । जे । ते । के इत्याद्यर्थं सूत्राण्यनारम्भणीयानि स्युः ॥ १४७ ॥

अत्थिस्त्यादिना ॥ ८ । ३ । १४८ ॥

अस्तेः स्थाने त्यादिभिः सह अत्थि इत्यादेशो भवति ॥ अत्थि सो । अत्थि ते । अत्थि तुमं । अत्थि तुम्हे । अत्थि अहं । अत्थि अम्हे ॥१४८॥

णेरदेदावावे ॥ ८ । ३ । १४९ ॥

णेः स्थाने अत् एत् आव आवे एते चत्वार आदेशा भवन्ति ॥ दरिसइ । कारेइ । करावइ । करावेइ ॥ हासेइ । हसावइ । हसावेइ ॥ उवसामेइ । उवसमावइ । उवसमावेइ ॥ बहुलाधिकारात् क्वचिदेन्नास्ति । जाणावेइ ॥ क्वचिद् आवे नास्ति । पाएइ । भावेइ ॥ १४९ ॥

गुर्वादेरविर्वा ॥ ८ । ३ । १५० ॥

गुर्वादेर्णेः स्थाने अवि इत्यादेशो वा भवति ॥ शोषितम् । सोसविअं । सोसिअं ॥ तोषितम् । तोसविअं । तोसिअं ॥ १५० ॥

भ्रमेराडो वा ॥ ८ । ३ । १५१ ॥

भ्रमेः परस्य णेराड आदेशो वा भवति ॥ भमाडइ । भमाडेइ । पक्षे । भामेइ । भमावइ । भमावेइ ॥ १५१ ॥

लुगावी क्त-भाव-कर्मसु ॥ ८ । ३ । १५२ ॥

णेः स्थाने लुक् आवि इत्यादेशौ भवतः क्ते भावकर्मविहिते च प्रत्यये परतः ॥ कारिअं कराविअं ॥ हासिअं । हसाविअं ॥ खामिअं । खमाविअं ॥ भावकर्मणोः । कारीअइ । करावीअइ । कारिज्जइ । कराविज्जइ । हासीअइ । हसावीअइ । हासिज्जइ । हसाविज्जइ ॥ १५२ ॥

अदेर्लुक्यादेरत आः ॥ ८ । ३ । १५३ ॥

णेरदेर्लोपेषु कृतेषु आदेरकारस्य आ भवति ॥ अति । पाडइ । मारइ ॥

एति । कारेइ । खामेइ ॥ लुकि । कारिअं । खामिअं । कारीअइ । खामीअइ । कारिज्जइ । खामिज्जइ ॥ अदेलुकीति किम् । करावि अं । करावीअइ । करावि ज्जइ ॥ आदेरिति किम् । संगामेइ । इह व्यवहितस्य मा भूत् ॥ कारिअं । इहान्त्यस्य मा भूत् । अत इति किम् । दूसेइ ॥ केचित्तु आवेआव्यादेशयोरप्यादेरत आत्वमिच्छन्ति । कारावेइ । हासावि ओ जणो सामलीए ॥ १५३ ॥

मौ वा ॥ ८ । ३ । १५४ ॥

अत आ इति वर्तते । अदन्ताद्धातोर्मौ परे अत आत्वं वा भवति ॥ हसामि । हसमि ॥ जाणामि । जाणमि । लिहामि लिहमि ॥ अत इत्येव । होमि ॥ १५४ ॥

इच्च मो-मु-मे वा ॥ ८ । ३ । १५५ ॥

अकारान्ताद्धातोः परेषु मोमुमेषु अत इत्वं चकाराद् आत्वं च वा भवतः ॥ भणिमो भणामो । भणिमु भणामु । भणिम भणाम । पक्षे । भणमो । भणमु । भणम ॥ **'वर्तमाना-पञ्चमी-शतृषु वा'** (८-३-१५८) इत्येत्वे तु भणेमो । भणेमु । भणेम ॥ अत इत्येव । ठामो । होमो ॥ १५५ ॥

क्ते ॥ ८ । ३ । १५६ ॥

क्ते परतोत इत्वं भवति ॥ हसिअं । पढिअं । नविअं । हासिअं । षाढिअं ॥ गयं नयमित्यादि तु सिद्धावस्थापेक्षणात् ॥ अत इत्येव । झायं । लुअं । हूअं ॥ १५६ ॥

एच्च क्त्वा-तुम्-तव्य-भविष्यत्सु ॥ ८ । ३ । १५७ ॥

क्त्वातुम्तव्येषु भविष्यत्कालविहिते च प्रत्यये परतोत एकारश्चकारादिकारश्च भवति ॥ क्त्वा । हसेऊण । हसिऊण ॥ तुम् । हसेउं । हसिउं ॥ तव्य । हसेअव्वं । हसिअव्वं ॥ भविष्यत् । हसेहिइ हसिहिइ ॥ अत इत्येव । काऊण ॥ १५७ ॥

वर्तमाना–पञ्चमी–शतृषु वा ॥ ८ । ३ । १५८ ॥

वर्तमानापञ्चमीशतृषु परत अकारस्य स्थाने एकारो वा भवति ॥ वर्तमाना । हसेइ हसइ । हसेम हसिम । हसेमु हसिमु ॥ पञ्चमी । हसेउ हसउ । सुणेउ सुणउ ॥ शतृ । हसेन्तो हसन्तो ॥ क्वचिन्न भवति । जयइ॥ क्वचिदात्वमपि । सुणाउ ॥ १५८ ॥

ज्ञा–ज्जे ॥ ८ । ३ । १५९ ॥

ज्ञा ज्ज इत्यादेशयोः परयोरकारस्य एकारो भवति ॥ हसेज्ञा । हसेज्ज ॥ अत इत्येव । होज्ञा । होज्ज ॥ १५९ ॥

ईअ–इज्जौ क्यस्य ॥ ८ । ३ । १६० ॥

चिजिप्रभृतीनां भावकर्मविधिं वक्ष्यामः । येषां तु न वक्ष्यते तेषां संस्कृतातिदेशात्प्रातस्य क्यस्य स्थाने ईअ इज्ज इत्येतावादेशौ भवतः ॥ हसीअइ । हसिज्जइ । हसीअन्तो । हसिज्जन्तो । हसीअमाणो । हसिज्जमाणो । पढीअइ । पढिज्जइ । होईअइ । होइज्जइ ॥ बहुलाधिकारात् क्वचित् क्योपि विकल्पेन भवति । मए नवेज्ज मए नविज्जेज्ज । तेण लहेज्ज । तेण लहिज्जेज्ज । तेण अच्छेज्ज । तेण अच्छिज्जेज्ज । तेण अच्छीअइ ॥१६०॥

दृशि–वचेर्दीस–डुच्चं ॥ ८ । ३ । १६१ ॥

दृशेर्वचेश्च परस्य क्यस्य स्थाने यथासंख्यं डीस डुच्च इत्यादेशौ भवतः । ईअइज्जापवादः ॥ दीसइ वुच्चइ ॥ १६१ ॥

सी ही हीअ भूतार्थस्य ॥ ८ । ३ । १६२ ॥

भूतेर्थे विहितोद्यतन्यादिः प्रत्ययो भूतार्थः तस्य स्थाने सी ही हीअ इत्यादेशा भवन्ति ॥ उत्तरत्र व्यञ्जनादीअविधानात् स्वरान्तादेवायं विधिः ॥ कासी । काही । काहीअ । अकार्षीत् । अकरोत् । चकार वेत्यर्थः । एवं ठासी । ठाही । ठाहीअ ॥ आर्षे । देविन्दो इणमब्बवी इत्यादौ सिद्धावस्थाश्रयणात् ह्यस्त्यन्याः प्रयोगः ॥ १६२ ॥

व्यञ्जनादीअः ॥ ८ । ३ । १६३ ॥

व्यञ्जनाद्धातोः परस्य भूतार्थस्याद्यतन्यादिप्रत्ययस्य ईअ इत्यादेशो भवति ॥

हुवीअ । अभूत् । अभवत् । बभूवेत्यर्थः ॥ एवं अच्छीअ । आसिष्ट । आस्त । आसांचक्रे वा ॥ गेण्हीअ । अग्रहीत् । अगृण्हात् । जग्राह वा ॥ १६३ ॥

तेनास्तेरास्यहेसी ॥ ८ । ३ । १६४ ॥

अस्तेर्धातोस्तेन भूतार्थेन प्रत्ययेन सह आसि अहेसि इत्यादेशौ भवतः ॥ आसि सो तुमं अहं वा । जे आसि । ये आसन्नित्यर्थः । एवं अहेसि ॥ १६४ ॥

ज्जात्सप्तम्या इर्वा ॥ ८ । ३ । १६५ ॥

सप्तम्यादेशात् ज्जात्पर इर्वा प्रयोक्तव्यः ॥ भवेत् । होज्जइ । होज्ज ॥ १६५ ॥

भविष्यति हिरादिः ॥ ८ । ३ । १६६ ॥

भविष्यदर्थे विहिते प्रत्यये परे तस्यैवादिर्हिः प्रयोक्तव्यः ॥ होहिइ । भविष्यति भविता वेत्यर्थः ॥ एवं होहिन्ति । होहिसि । होहित्था । हसिहिइ । काहिइ ॥ १६६ ॥

मि–मो–मु–मे स्सा हा न वा ॥ ८ । ३ । १६७ ॥

भविष्यत्यर्थे मिमोमुमेषु तृतीयत्रिकादेशेषु परेषु तेषामेवादी स्सा हा इत्येतौ वा प्रयोक्तव्यौ । हेरपवादौ ॥ पक्षे हिरपि ॥ होस्सामि होहामि । होस्सामो होहामो । होस्सामु होहामु । होस्साम होहाम ॥ पक्षे । होहिमि । होहिमो । होहिमु । होहिम ॥ क्वचित्तु हा न भवति । हसिस्सामो । हसिहिमो ॥ १६७ ॥

मो-मु-मानां हिस्सा हित्था ॥ ८ । ३ । १६८ ॥

धातोः परौ भविष्यति काले मोमुमानां स्थाने हिस्सा हित्था इत्येतौ वा प्रयोक्तव्यौ ॥ होहिस्सा । होहित्था । हसिहिस्सा । हसिहित्था । पक्षे । होहिमो । होस्सामो । होहामो । इत्यादि ॥ १६८ ॥

मेः स्सं ॥ ८ । ३ । १६९ ॥

धातोः परो भविष्यति काले म्यादेशस्य स्थाने स्सं वा प्रयोक्तव्यः ॥ होस्सं । हसिस्सं । कित्तइस्सं । पक्षे । होहिमि । होस्सामि । होहामि । कित्तइहिमि ॥ १६९ ॥

कृ–दो हं ॥ ८ । ३ । १७० ॥

करोतेर्ददातेश्च परो भविष्यति विहितस्य म्यादेशस्य स्थाने हं वा प्रयोक्तव्यः ॥ काहं । दाहं । करिष्यामि दास्यामीत्यर्थः ॥ पक्षे । काहिमि । दाहिमि । इत्यादि ॥ १७० ॥

श्रु-गमि-रुदि-विदि-दृशि- मुचि-वचि-छिदि–भिदि-भुजां सोच्छं गच्छं रोच्छं वेच्छं दच्छं मोच्छं वोच्छं छेच्छं भेच्छं भोच्छं॥ ८ । ३ । १७१॥

श्वादीनां धातूनां भविष्यद्विहितम्यन्तानां स्थाने सोच्छमित्यादयो निपात्यन्ते ॥ सोच्छं । श्रोष्यामि ॥ गच्छं । गमिष्यामि ॥ संगच्छं । संगंस्ये ॥ रोच्छं । रोदिष्यामि ॥ विद ज्ञाने । वेच्छं । वेदिष्यामि ॥ दच्छं द्रक्ष्यामि ॥ मोच्छं । मोक्ष्यामि । वोच्छं । वक्ष्यामि ॥ छेच्छं । छेत्स्यामि ॥ भेच्छं । भेत्स्यामि ॥ भोच्छं । भोक्ष्ये ॥ १७१ ॥

सोच्छादय इजादिषु हिलुक् च वा ॥ ८।३।१७२ ॥

श्वादीनां स्थाने इजादिषु भविष्यदादेशेषु यथासंख्यं सोच्छादयो भवन्ति । ते एवादेशा अन्त्यस्वराद्यवयववर्जा इत्यर्थः । हिलुक् च वा भवति ॥ सोच्छिइ । पक्षे । सोच्छिहिइ । एवं सोच्छिन्ति । सोच्छिहिन्ति । सोच्छिसि । सोच्छिहिसि । सोच्छित्था । सोच्छिहित्था । सोच्छिह । सोच्छिहिह । सोच्छिमि । सोच्छिहिमि । सोच्छिस्सामि । सोच्छिहामि । सोच्छिस्सं । सोच्छं । सोच्छिमो । सोच्छिहिमो । सोच्छिस्सामो । सोच्छिहामो । सोच्छिहिस्सा । सोच्छिहित्था । एवं मुमयोरपि ॥ गच्छिइ । गच्छिहिइ । गच्छिन्ति । गच्छिहिन्ति । गच्छिसि । गच्छिहिसि । गच्छित्था । गच्छिहित्था । गच्छिह । गच्छिहिह । गच्छिमि । गच्छिहिमि । गच्छिस्सामि । गच्छिहामि । गच्छिस्सं । गच्छं । गच्छिमो । गच्छिहिमो । गच्छिस्सामो । गच्छिहामो । गच्छिहिस्सा । गच्छिहित्था । एवं मुमयोरपि ॥ एवं रुदादीनामप्युदाहार्यम् ॥ १७२ ॥

दु सु मु विध्यादिष्वेकस्मिंस्त्रयाणाम् ॥८।३।१७३ ॥

विध्यादिष्वर्थेषूत्पन्नानामेकत्वेर्थे वर्तमानानां त्रयाणामपि त्रिकाणां स्थाने

यथासंख्यं दु सु मु इत्येते आदेशा भवन्ति ॥ हसउ सा । हससु तुमं । हसामु अहं ॥ पेच्छउ । पेच्छसु । पेच्छामु ॥ दकारोच्चारणं भाषान्तरार्थम् ॥ १७३ ॥

सोर्हिर्वा ॥ ८ ।३। १७४ ॥

पूर्वसूत्रविहितस्य सोः स्थाने हिरादेशो वा भवति ॥ देहि देसु ॥१७४॥

अत इज्जस्विज्जहीज्जे-लुको वा ॥ ८ ।३।१७५ ॥

अकारात्परस्य सोः इज्जसु इज्जहि इज्जे इत्येते लुक् च आदेशा वा भवन्ति ॥ हसेज्जसु । हसेज्जहि । हसेज्जे । हस । पक्षे । हससु ॥ अत इति किम् । होसु । ठाहि ॥ १७५ ॥

बहुषु न्तु ह मो ॥ ८।३।१७६ ॥

विध्यादिषूत्पन्नानां बहुष्वर्थेषु वर्तमानानां त्रयाणां त्रिकाणां स्थाने यथासंख्यं न्तु ह मो इत्येते आदेशा भवन्ति ॥ न्तु । हसन्तु । हसन्तु हसेयुर्वा ॥ ह । हसह । हसत । हसेत वा ॥ मो । हसामो । हसाम । हसेम वा ॥ एवं तुवरन्तु । तुवरह । तुवरामो ॥ १७६ ॥

वर्तमाना-भविष्यन्त्योश्च ज्ज ज्जा वा ॥ ८।३।१७७ ॥

वर्तमानाया भविष्यन्त्याश्च विध्यादिषु च विहितस्य प्रत्ययस्य स्थाने ज्ज ज्जा इत्येतावादेशौ वा भवतः ॥ पक्षे यथाप्राप्तम् ॥ वर्तमाना । हसेज्ज । हसेज्जा । पढेज्ज । पढेज्जा । सुणेज्ज । सुणेज्जा ॥ पक्षे । पढिहिइ ॥ विध्यादिषु । हसेज्ज । हसिज्जा । हसतु । हसेद्वा इत्यर्थः । पक्षे । हसउ ॥ एवं सर्वत्र । यथा तृतीयत्रये । अइवाएज्जा । अइवायावेज्जा । न समणुजाणामि । न समणुजाणेज्जा वा ॥ अन्ये त्वन्यासामपीच्छन्ति । होज्ज । भवति । भवेत् । भवतु । अभवत् । अभूत् । बभूव । भूयात् । भविता । भविष्यति । अभविष्यद्वेत्यर्थः ॥ १७७ ॥

मध्ये च स्वरान्ताद्वा ॥ ८ । ३ । १७८ ॥

स्वरान्ताद्धातोः प्रकृतिप्रत्ययथोर्मध्ये चकारात्प्रत्ययानां च स्थाने ज्ज ज्जा इत्येतौ वा भवतः वर्तमानाभविष्यन्त्योर्विध्यादिषु च ॥ वर्तमाना । होज्जइ ।

होज्जाइ । होज्ज । होज्जा । पक्षे । होइ ॥ एवं होज्जसि । होज्ज । होज्जा । होसि । इत्यादि ॥ भविष्यन्ती । होज्जहिइ । होज्जाहिइ । होज्ज । होज्जा । पक्षे । होहिइ ॥ एवं होज्जहिसि । होज्जाहिसि । होज्ज । होज्जा । होहिसि । होज्जहिमि । होज्जाहिमि । होज्जस्सामि । होज्जहामि । होज्जस्सं । होज्ज । होज्जा । इत्यादि ॥ विध्यादिषु । होज्जउ । होज्जाउ । होज्ज । होज्जा । भवतु भवेद्वेत्यर्थः । पक्षे । होउ ॥ स्वरान्तादिति किम् । हसेज्ज । हसेज्जा । तुवरेज्ज । तुवरेज्जा ॥१७८॥

क्रियातिपत्तेः ॥ ८ । ३ । १७९ ॥

क्रियातिपत्तेः स्थाने ज्जज्जावादेशौ भवतः ॥ होज्ज । होज्जा । अभविष्यदित्यर्थः । जइ होज्ज वण्णणिज्जो ॥ १७९ ॥

न्त–माणौ ॥ ८ । ३ । १८० ॥

क्रियातिपत्तेः स्थाने न्तमाणौ आदेशौ भवतः ॥ होन्तो । होमाणो । अभविष्यदित्यर्थः ॥

हरिण-ट्ठाणे हरिणङ्क जइ सि हरिणाहिवं निवेसन्तो ।
न सहन्तो च्चिअ तो राहुपरिहवं से जिअन्तस्स ॥१८०॥

शत्रानशः ॥ ८ । ३ । १८१ ॥

शतृआनश् इत्येतयोः प्रत्येकं न्त माण इत्येतावादेशौ भवतः ॥ शतृ । हसन्तो हसमाणो ॥ आनश् । वेवन्तो वेवमाणो ॥ १८१ ॥

ई च स्त्रियाम् ॥ ८ । ३ । १८२ ॥

स्त्रियां वर्तमानयोः शत्रानशोः स्थाने ई चकारात् न्तमाणौ च भवन्ति ॥ हसई । हसन्ती । हसमाणी । वेवई । वेवन्ती । वेवमाणी ॥ १८२ ॥

इत्याचार्यश्रीहेमचन्द्रविरचितायां सिद्धहेमचन्द्राभिधानस्वोपज्ञशब्दानुशासनवृत्तौ अष्टमस्याध्यायस्य तृतीयः पादः ॥

ऊर्ध्वं स्वर्गनिकेतनादपि तले पातालमूलादपि
त्वत्कीर्तिर्भ्रमति क्षितीश्वरमणे पारे पयोधेरपि ।
तेनास्याः प्रमदास्वभावसुलभैरुच्चावचैश्चापलै-
स्ते वाचंयमवृत्तयोपि मुनयो मौनव्रतं त्याजिताः ॥ १ ॥

सर्वविदे नमः ॥

अर्हं ॥

इदितो म्र ॥ ८ । ४ । १ ॥

सूत्रे ये इदितो धातवो वक्ष्यन्ते तेषां ये आदेशास्ते विकल्पेन भवन्तीति वेदितव्यम् । तत्रैव चोदाहरिष्यते ॥ १ ॥

कथेर्वज्जर-पज्जरोप्पाल-पिसुण-सङ्घ-बोल्ल-चव-जम्प-सीस-साहाः ॥८।४।२॥

कथेर्धातोर्वज्जरादयो दशादेशा वा भवन्ति ॥ वज्जरइ । पज्जरइ । उप्पालइ । पिसुणइ । सङ्घइ । बोल्लइ । चवइ । जम्पइ । सीसइ । साहइ॥ उब्बुक्कइ इति तूत्पूर्वस्य बुक्क भाषणे इत्यस्य । पक्षे । कहइ ॥ एते चान्यैर्देशीषु पठिता अपि अस्माभिर्धात्वादेशीकृता विविधेषु प्रत्ययेषु प्रतिष्ठन्तामिति ॥ तथा च । वज्जरिओ कथितः । वज्जरिऊण कथयित्वा । वज्जरणं कथनम् । वज्जरन्तो कथयन् । वज्जरिअव्वं कथयितव्यमिति रूपसहस्राणि सिध्यन्ति । संस्कृतधातुवच्च प्रत्ययलोपागमादिविधिः ॥ २ ॥

दुःखे णिव्वरः ॥ ८ । ४ । ३ ॥

दुःखविषयस्य कथेर्णिव्वर इत्यादेशो वा भवति ॥ णिव्वरइ । दुःखं कथयतीत्यर्थः ॥ ३ ॥

जुगुप्सेर्झुण-दुगुच्छ-दुगुञ्छाः ॥ ८ । ४ । ४ ॥

जुगुप्सेरेते त्रय आदेशा वा भवन्ति ॥ झुणइ । दुगुच्छइ । दुगुञ्छइ । पक्षे । जुगुच्छइ ॥ गलोपे । दुउच्छइ । दुउञ्छइ । जुउच्छइ ॥ ४ ॥

बुभुक्षि-वीज्योर्णीरव-वोज्जौ ॥ ८।४।५॥

बुभुक्षेराचारक्विबन्तस्य च वीजेर्यथासंख्यमेतावादेशौ वा भवतः ॥ णीरवइ । बुहुक्खइ । वोज्जइ । वीजइ ॥ ५ ॥

ध्या-गोर्झा-गौ ॥ ८।४।६॥

अनयोर्यथासंख्यं झा गा इत्यादेशौ भवतः ॥ झाइ । झाअइ । णिज्झाइ । णिज्झाअइ । निपूर्वो दर्शनार्थः । गाइ । गायइ । झाणं । गाणं ॥ ६ ॥

उट्ठिओ । पट्ठाविओ । उट्ठाविओ । थक्कइ । चिट्ठइ । चिट्ठिऊण । निरप्पइ बहुलाधिकारात् क्वचिन्न भवति । थिअं । थाणं । पत्थिओ । उत्थिओ थाऊण ॥१६॥

उदष्ठ–कुक्कुरौ ॥८।४।१७॥

उदः परस्य तिष्ठतेः ठ कुक्कुर इत्यादेशौ भवतः ॥ उट्ठइ । उक्कुक्कुरइ ॥१७॥

म्लेर्वा–पव्वायौ ॥८।४।१८॥

म्लायतेर्वा पव्वाय इत्यादेशौ वा भवतः ॥ वाइ । पव्वायइ । मिलाइ॥१८॥

निर्मो निम्माण–निम्मवौ ॥८।४।१९॥

निर्पूर्वस्य मिमीतेरेतावादेशौ भवतः ॥ निम्माणइ । निम्मवइ ॥१९॥

क्षेर्णिज्झरो वा ॥८।४।२०॥

क्षयतेर्णिज्झर इत्यादेशो वा भवति ॥ णिज्झरइ । पक्षे । झिज्जइ ॥२०॥

छदेर्णुम–नूम–सन्नुम–ढक्कोम्वाल–पव्वालाः ॥८।४।२१॥

छदेर्ण्यन्तस्य एते षडादेशा वा भवन्ति ॥ णुमइ । नूमइ । णत्वे णूमइ । सन्नुमइ । ढक्कइ । ओम्वालइ । पव्वालइ । छायइ ॥ २१ ॥

निव्रिपत्योर्णिहोडः ॥८।४।२२॥

निवृगः पतेश्च ण्यन्तस्य णिहोड इत्यादेशो वा भवति ॥ णिहोडइ पक्षे । निवारेइ । पाडेइ ॥ २२ ॥

दूङो दूमः ॥८।४।२३॥

दूङो ण्यन्तस्य दूम इत्यादेशो भवति ॥ दूमेइ मज्झ हिअयं ॥ २३ ॥

धवलेर्दुमः ॥८।४।२४॥

धवलयतेर्ण्यन्तस्य दुमादेशो वा भवति ॥ दुमइ । धवलइ ॥ '**स्वराणस्वरा**' (बहुलम्) (८-४-२३८) इति दीर्घत्वमपि । दूमिअं । धवलितमित्यर्थः ॥ २४ ॥

तुलेरोहामः ॥ ८ । ४ ।

तुलेर्ण्यन्तस्य ओहाम इत्यादेशो वा भवति ॥ ओहामइ । तुलइ ॥२५॥

विरिचेरोलुण्डोल्लुण्ड-पल्हत्थाः ॥ ८ । ४ । २६ ॥

विरचयतेर्ण्यन्तस्य ओलुण्डादयस्त्रय आदेशा वा भवन्ति ॥ ओलुण्डइ । उल्लुण्डइ । पल्हत्थइ । विरेअइ ॥ २६ ॥

तडेराहोड-विहोडौ ॥ ८ । ४ । २७ ॥

तडेर्ण्यन्तस्य एतावादेशौ वा भवतः ॥ आहोडइ । विहोडइ । पक्षे । ताडेइ ॥ २७ ॥

मिश्रेर्वीसाल-मेलवौ ॥ ८ । ४ । २८ ॥

मिश्रयतेर्ण्यन्तस्य वीसाल मेलव इत्यादेशौ वा भवतः ॥ वीसालइ । मेलवइ । मिस्सइ ॥ २८ ॥

उध्दूलेर्गुण्ठः ॥ ८। ४ । २९ ॥

उध्दूलेर्ण्यन्तस्य गुण्ठ इत्यादेशो वा भवति ॥ गुण्ठइ । पक्षे । उध्दूलेइ ॥ २९ ॥

भ्रमेस्तालिअण्ट-तमाडौ ॥ ८ । ४ । ३० ॥

भ्रमयतेर्ण्यन्तस्य तालिअण्ट तमाड इत्यादेशौ वा भवतः ॥ तालिअण्टइ । तमाडइ । भामेइ । भमाडेइ । भमावेइ ॥ ३० ॥

नशेर्विउड-नासव-हारव-विप्पगाल- पलावाः ॥ ८ । ४ । ३१ ॥

नशेर्ण्यन्तस्य एते पञ्चादेशा वा भवन्ति ॥ विउडइ । नासवइ । हारवइ । विप्पगालइ । पलावइ । पक्षे । नासइ ॥ ३१ ॥

दृशेर्दाव-दंस-दक्खवाः ॥ ८ । ४ । ३२ ॥

दृशेर्ण्यन्तस्य एते त्रय आदेशा वा भवन्ति ॥ दावइ । दंसइ । दक्खवइ । दरिसइ ॥ ३२ ॥

उद्घटेरुग्गः ॥ ८ । ४ । ३३ ॥

उत्पूर्वस्य घटेर्ण्यन्तस्य उग्ग इत्यादेशो वा भवति ॥ उग्गइ । उग्घाडइ ॥ ३३ ॥

स्पृहः सिहः ॥ ८ । ४ । ३४ ॥

स्पृहो ण्यन्तस्य सिह इत्यादेशो भवति ॥ सिहइ ॥ ३४ ॥

संभावेरासङ्घः ॥ ८ । ४ । ३५ ॥

संभावयतेरासङ्घ इत्यादेशो वा भवति ॥ आसङ्घइ । संभावइ ॥ ३५॥

उन्नमेरुत्थङ्घोल्लाल–गुलुगुञ्छोप्पेलाः ॥ ८ । ४ । ३६ ॥

उत्पूर्वस्य नमेर्ण्यन्तस्य एते चत्वार आदेशा वा भवन्ति ॥ उत्थङ्घइ । उल्लालइ । गुलुगुञ्छइ । उप्पेलइ । उन्नावइ ॥ ३६ ॥

प्रस्थापेः पट्ठव पेण्डवौ ॥ ८ । ४ । ३७ ॥

प्रपूर्वस्य तिष्ठतेर्ण्यन्तस्य पट्ठव पेण्डव इत्यादेशौ वा भवतः ॥ पट्ठवइ । पेण्डवइ । पट्ठावइ ॥ ३७ ॥

विज्ञपेर्वोक्कावुक्कौ ॥ ८ । ४ । ३८ ॥

विपूर्वस्य जानातेर्ण्यन्तस्य वोक्क अवुक्क इत्यादेशौ वा भवतः ॥ वोक्कइ । अवुक्कइ । विण्णवइ ॥ ३८ ॥

अर्पेरल्लिव–चच्चुप्प–पणामाः ॥ ८ । ४ । ३९ ॥

अर्पेर्ण्यन्तस्य एते त्रय आदेशा वा भवन्ति ॥ अल्लिवइ । चच्चुप्पइ । पणामइ । पक्षे । अप्पेइ ॥ ३९ ॥

यापेर्जवः ॥ ८ । ४ । ४० ॥

यातेर्ण्यन्तस्य जव इत्यादेशो वा भवति ॥ जवइ जावेइ ॥ ४० ॥

प्लावेरोम्बाल–पव्वालौ ॥ ८ । ४ । ४१ ॥

प्लवतेर्ण्यन्तस्य एतावादेशौ वा भवतः ॥ ओम्बालइ । पव्वालइ । पावेइ ॥ ४१ ॥

विकोशेः पक्खोडः ॥ ८ । ४ । ४२ ॥

विकोशयतेर्नामधातोर्ण्यन्तस्य पक्खोड इत्यादेशो वा भवति ॥ पक्खोडइ । विकोसई ॥ ४२ ॥

रोमन्थे रोग्गाल–वग्गोलौ ॥ ८ । ४ । ४३ ॥

रोमन्थेर्नामधातोर्ण्यन्तस्य एतावादेशौ वा भवतः ॥ ओग्गालइ । वग्गोलइ । रोमन्थइ ॥ ४३ ॥

कमेर्णिहुवः ॥ ८ । ४ । ४४ ॥

कमेः स्वार्थण्यन्तस्य णिहुव इत्यादेशो वा भवति ॥ णिहुवइ । कामेइ ॥ ४४ ॥

प्रकाशेर्णुव्वः ॥ ८ । ४ । ४५ ॥

प्रकाशेर्ण्यन्तस्य णुव्व इत्यादेशो वा भवति ॥ णुव्वइ । पयासेइ ॥४५॥

कम्पेर्विच्छोलः ॥ ८ । ४ । ४६ ॥

कम्पेर्ण्यन्तस्य विच्छोल इत्यादेशो वा भवति ॥ विच्छोलइ । कम्पेइ ॥ ४६ ॥

आरोपेर्वलः ॥ ८ । ४ । ४७ ॥

आरुहेर्ण्यन्तस्य वल इत्यादेशो वा भवति ॥ वलइ । आरोवेइ ॥ ४७॥

दोले रङ्खोलः ॥ ८ । ४ । ४८ ॥

दुलेः स्वार्थे ण्यन्तस्य रङ्खोल इत्यादेशो वा भवति ॥ रङ्खोलइ । दोलइ ॥ ४८ ॥

रञ्जेरावः ॥ ८ । ४ । ४९ ॥

रञ्जेर्ण्यन्तस्य राव इत्यादेशो वा भवति ॥ रावेइ । रञ्जेइ ॥ ४९ ॥

घटेः परिवाडः ॥ ८ ।४।५० ॥

घटेर्ण्यन्तस्य परिवाड इत्यादेशो वा भवति ॥ परिवाडेइ । घडेइ ॥५०॥

वेष्टेः परिआलः ॥ ८ । ४ । ५१ ॥

वेष्टेर्ण्यन्तस्य परिआल इत्यादेशो वा भवति ॥ परिआलेइ । वेढेइ॥५१॥

क्रियः किणो वेस्तु के च ॥ ८ ।४।५२ ॥

णेरिति निवृत्तम् । क्रीणातेः किण इत्यादेशो भवति । वेः परस्य तु द्विरुक्तः केश्चकाराात्किणश्च भवति ॥ किणइ । विकेइ । विक्किणइ ॥ ५२॥

भियो भा–बीहौ ॥ ८ ।४।५३ ॥

बिभेतेरेतावादेशौ भवतः ॥ भाइ । भाइअं । बीहइ । बीहिअं ॥ बहुलाधिकाराद् भीओ ॥ ५३ ॥

आलीडोल्ली ॥ ८ । ४ । ५४ ॥

आलीयतेः अल्ली इत्यादेशो भवति ॥ अल्लियइ । अल्लीणो ॥ ५४ ॥

निलीङेर्णिलीअ--णिलुक्क--णिरिग्घ--लुक्क--लिक्क-ल्हिक्काः ॥८।४।५५॥

निलीङ एते षडादेशा वा भवन्ति ॥ णिलीअइ । णिलुक्कइ । णिरिग्घइ । लुक्कइ । लिक्कइ । ल्हिक्कइ । निलिज्जइ ॥ ५५ ॥

विलीङेर्विरा ॥ ८ । ४ । ५६ ॥

विलीङेर्विरा इत्यादेशो वा भवति ॥ विराइ । विलिज्जइ ॥ ५६ ॥

रुते रुञ्ज--रुण्टौ ॥ ८ । ४ । ५७ ॥

रौतेरेतावादेशौ वा भवतः ॥ रुञ्जइ । रुण्टइ । रवइ ॥ ५७ ॥

शृणोतेर्हणः ॥ ८ । ४ । ५८ ॥

शृणोतेर्हण इत्यादेशो वा भवति ॥ हणइ । सुणइ ॥ ५८ ॥

धूगेर्धुवः ॥ ८ । ४ । ५९ ॥

धुनोतेर्धुव इत्यादेशो वा भवति ॥ धुवइ । धुणइ ॥ ५९ ॥

भुवेर्हो--हुव--हवाः ॥ ८ । ४ । ६० ॥

भुवो धातोर्हो हुव हव इत्येते आदेशा वा भवन्ति ॥ होइ । होन्ति । हुवइ । हुवन्ति । हवइ । हवन्ति ॥ पक्षे । भवइ । परिहीण–विहवो । भविउं । पभवइ । परिभवइ । संभवइ ॥ क्वचिदन्यदपि । उब्भुअइ । भत्तं ॥ ६० ॥

अविति हुः ॥ ८ । ४ । ६१ ॥

विद्वर्जे प्रत्यये भुवो हु इत्यादेशो वा भवति ॥ हुन्ति । भवन् । हुन्तो । अवितीति किम् । होइ ॥ ६१ ॥

पृथक्--स्पष्टे णिव्वडः ॥ ८ । ४ । ६२ ॥

पृथक्भूते स्पष्टे च कर्तरि भुवो णिव्वड इत्यादेशो भवति ॥ णिव्वडइ । पृथक् स्पष्टो वा भवतीत्यर्थः ॥ ६२ ॥

प्रभौ हुप्पो वा ॥ ८ । ४ । ६३ ॥

प्रभुकर्तृकस्य भुवो हुप्प इत्यादेशो वा भवति ॥ प्रभुत्वं च प्रपूर्वस्यैवार्थः । अन्ने चिअ न पहुप्पइ । पक्षे । पभवेइ ॥६३॥

क्ते हूः ॥ ८।४।६४ ॥

भुवः क्तप्रत्यये हूरादेशो भवति ॥ हूअं । अणुहूअं । पहूअं ॥ ६४ ॥

कृगेः कुणः ॥ ८।४।६५ ॥

कृगः कुण इत्यादेशो भवति ॥ कुणइ । करइ ॥ ६५ ॥

काणेक्षिते णिआरः ॥ ८ ।४।६६ ॥

काणेक्षितविषयस्य कृगो णिआर इत्यादेशो वा भवति ॥ णिआरइ । काणेक्षितं करोति ॥ ६६ ॥

निष्टम्भावष्टम्भे णिट्ठुह--संदाणं ॥ ८ ।४।६७ ॥

निष्टम्भविषयस्यावष्टम्भविषयस्य च कृगो यथासंख्यं णिट्ठुह संदाण इत्यादेशौ वा भवतः ॥ णिट्ठुहइ । निष्टम्भं करोति । संदाणइ । अवष्टम्भं करोति ॥ ६७ ॥

श्रमे वावम्फः ॥ ८ । ४ ॥ ६८ ॥

श्रमविषयस्य कृगो वावम्फ इत्यादेशो वा भवति ॥ वावम्फइ । श्रमं करोति ॥६८ ॥

मन्युनौष्ठमालिन्ये णिव्वोलः ॥८।४।६९॥

मन्युना करणेन यदोष्ठमालिन्यं तद्विषयस्य कृगो णिव्वोल इत्यादेशो वा भवति ॥ णिव्वोलइ । मन्युना ओष्ठं मलिनं करोति ॥६९ ॥

शैथिल्य-लम्बने पयल्लः ॥८।४।७०॥

शैथिल्यविषयस्य लम्बनविषयस्य च कृगः पयल्ल इत्यादेशो वा भवति । पयल्लइ । शिथिलीभवति लम्बते वा ॥ ७० ॥

निष्पताच्छोटे णीलुञ्छः ॥८।४।७१ ॥

निष्पतनविषयस्य आच्छोटनविषयस्य च कृगो णीलुञ्छ इत्यादेशो भवति वा ॥ णीलुञ्छइ । निष्पतति । आच्छोटयति वा ॥ ७१ ॥

क्षुरे कम्मः ॥ ८।४।७२॥

क्षुरविषयस्य कृगः कम्म इत्यादेशो वा भवति ॥ कम्मइ । क्षुरं करोतीत्यर्थः ॥ ७२ ॥

चाटौ गुललः ॥८।४।७३॥

चाटुविषयस्य कृगो गुलल इत्यादेशो वा भवति ॥ गुललइ । चाटु करोतीत्यर्थः ॥ ७३ ॥

स्मरेर्झर-झूर-भर-भल-लढ-विम्हर-सुमर-पयर-पम्हुहाः ॥ ८।४।७४ ॥

स्मरेरेते नवादेशा वा भवन्ति ॥ झरइ । झूरइ । भरइ । भलइ । लढइ । विम्हरइ । सुमरइ । पयरइ । पम्हुहइ । सरइ ॥ ७४ ॥

विस्मुः पम्हुस-विम्हर-वीसराः ॥८।४।७५॥

विस्मरतेरेते आदेशा भवन्ति ॥ पम्हुसइ । विम्हरइ । वीसरइ ॥७५॥

व्याहृगेः कोक्क-पोक्कौ ॥८।४।७६॥

व्याहरतेरेतावादेशौ वा भवतः ॥ कोक्कइ । ह्रस्वत्वे तु कुक्कइ । पोक्कइ । पक्षे । वाहरइ ॥ ७६ ॥

प्रसरेः पयल्लोवेल्लौ ॥८।४।७७॥

प्रसरतेः पयल्ल उवेल्ल इत्येतावादेशौ वा भवतः । पयल्लइ । उवेल्लइ । पसरइ ॥ ७७ ॥

महमहो गन्धे ॥८।४।७८॥

प्रसरतेर्गन्धविषये महमह इत्यादेशो वा भवति ॥ महमहइ मालई । मालई-गन्धो पसरइ ॥ गन्ध इति किम् । पसरइ ॥ ७८ ॥

निस्सरेर्णीहर- नील-धाड-वरहाडाः ॥८।४।७९॥

निस्सरते चत्वार आदेशा वा भवन्ति ॥ णीहरइ । नीलइ । धाडइ । वरहाडइ । नीसरइ ॥ ७९ ॥

जाग्रेर्ज्जग्गः ॥८।४।८०॥

जाग्रतेर्जग्ग इत्यादेशो वा भवति ॥ जग्गइ । पक्षे । जागरइ ॥८०॥

व्याप्रेराअड्डः ॥ ८ । ४ । ८१ ॥

व्याप्रियतेराअड्ड इत्यादेशो वा भवति ॥ आअड्डेइ । वावरेइ ॥ ८१ ॥

संवृगेः साहर-साहट्टौ ॥ ८ । ४ । ८२ ॥

संवृणोतेः साहर साहट्ट इत्यादेशौ वा भवतः ॥ साहरइ । साहट्टइ ॥ संवरइ ॥ ८२ ॥

आद्दङेः सन्नामः ॥ ८ ॥ ४ । ८३ ॥

आद्रियतेः सन्नाम इत्यादेशो वा भवति ॥ सन्नामइ । आदरइ ॥८३॥

प्रहृगेः सारः ॥ ८ । ४ । ८४ ॥

प्रहरतेः सार इत्यादेशो वा भवति ॥ सारइ । पहरइ ॥ ८४ ॥

अवतरेरोह-ओरसौ ॥ ८ । ४ । ८५ ॥

अवतरतेः ओह ओरस इत्यादेशौ वा भवतः ॥ ओहइ । ओरसइ । ओअरइ ॥ ८५ ॥

शकेश्चय-तर-तीर-पाराः ॥ ८ । ४ । ८६ ॥

शक्नोतेरेते चत्वार आदेशा वा भवन्ति ॥ चयइ । तरइ । तीरइ । पारइ । सक्कइ ॥ त्यजतेरपि चयइ । हानिं करोति ॥ तरतेरपि तरइ ॥ तीरयतेरपि तीरइ ॥ पारयतेरपि पारेइ । कर्म समाप्नोति ॥ ८६ ॥

फक्कस्थक्कः ॥ ८ । ४ । ८७ ॥

फक्कतेस्थक्क इत्यादेशो भवति ॥ थक्कइ ॥ ८७ ॥

श्लाघः सलहः ॥ ८ । ४ । ८८ ॥

श्लाघतेः सलह इत्यादेशो भवति ॥ सलहइ ॥ ८८ ॥

खचेर्वेअडः ॥ ८ । ४ । ८९ ॥

खचतेर्वेअड इत्यादेशो वा भवति ॥ वेअडइ । खचइ ॥ ८९ ॥

पचेः सोल्ल-पउलौ ॥ ८ । ४ । ९० ॥

पचतेः सोल्ल पउल इत्यादेशौ वा भवतः ॥ सोल्लइ । पउलइ । पयइ ॥ ९० ॥

मुचेश्छड्डावहेड-मेल्लोस्सिक्क-रेअव-णिल्लुञ्छ-धंसाडाः ॥ ८ । ४।९१॥

मुञ्चतेरेते सप्तादेशा वा भवन्ति ॥ छड्डइ । अवहेडइ । मेल्लइ । उस्सिक्कइ । रेअवइ । णिलुञ्छइ । धंसाडइ । पक्षे । मुअइ ॥ ९१ ॥

दुःखे णिव्वलः ॥ ८ । ४ । ९२ ॥

दुःखविषयस्य मुचेः णिव्वल इत्यादेशो वा भवति ॥ णिव्वलेइ । दुःखं मुञ्चतीत्यर्थः ॥ ९२ ॥

वञ्चेर्वेहव-वेलव-जूरवोमच्छाः ॥ ८ । ४ । ९३ ॥

वञ्चतेरेते चत्वार आदेशा वा भवन्ति ॥ वेहवइ । वेलवइ । जूरवइ । उमच्छइ । वञ्चइ ॥ ९३ ॥

रचेरुग्गहावह--विडविड्डाः ॥ ८ । ४ । ९४ ॥

रचेर्धातोरेते त्रय आदेशा वा भवन्ति ॥ उग्गहइ । अवहइ । विडविड्डइ । रयइ ॥ ९४ ॥

समारचेरुवहत्थ-सारव-समार-केलायाः ॥ ८ । ४ । ९५ ॥

समारचेरेते चत्वार आदेशा वा भवन्ति ॥ उवहत्थइ । सारवइ । समारइ । केलायइ । समारयइ ॥ ९५ ॥

सिचेः सिञ्च--सिम्पौ ॥ ८ । ४ । ९६ ॥

सिञ्चतेरेतावादेशौ वा भवतः ॥ सिञ्चइ । सिम्पइ । सेअइ ॥ ९६ ॥

प्रच्छः पुच्छः ॥ ८ । ४। ९७ ॥

प्रच्छेः पुच्छादेशो भवति ॥ पुच्छइ ॥ ९७ ॥

गर्जेर्बुक्कः ॥ ८ । ४ । ९८ ॥

गर्जतेर्बुक्क इत्यादेशो वा भवति ॥ बुक्कइ । गज्जइ ॥ ९८ ॥

वृषे ढिक्कः ॥ ८ ॥ ४ । ९९ ॥

वृषकर्तृकस्य गर्जेर्ढिक्क इत्यादेशो वा भवति ॥ ढिक्कइ । वृषभो गर्जति ॥ ९९ ॥

राजेरग्घ--छज्ज--सह--रीर--रेहाः ॥ ८ । ४ । १०० ॥

राजेरेते पञ्चादेशा वा भवन्ति ॥ अग्घइ । छज्जइ । सहइ । रीरइ । रेहइ । रायइ ॥ १०० ॥

मज्जेराउड्ड--णिउड्ड--बुड्ड--खुप्पाः ॥ ८ । ४ । १०१ ॥

मज्जतेरेते चत्वार आदेशा वा भवन्ति ॥ आउड्डइ । णिउड्डइ । बुड्डइ । खुप्पइ । मज्जइ ॥ १०१ ॥

पुञ्जेरारोल--वमालौ ॥ ८ । ४ । १०२ ॥

पुञ्जेरेतावादेशौ वा भवतः ॥ आरोलइ । वमालइ । पुञ्जइ ॥ १०२ ॥

लज्जेर्जीहः ॥ ८ । ४ । १०३ ॥

लज्जतेर्जीह इत्यादेशो वा भवति ॥ जीहइ । लज्जइ ॥ १०३ ॥

तिजेरोसुक्कः ॥ ८ । ४ । १०४ ॥

तिजेरोसुक्क इत्यादेशो वा भवति ॥ ओसुक्कइ । तेअणं ॥ १०४ ॥

मृजेरुग्घुस-लुञ्छ-पुञ्छ-पुंस-फुस-पुस-लुह-हुल-रोसाणाः ॥८।४।१०५॥

मृजेरेते नवादेशा वा भवन्ति ॥ उग्घुसइ । लुञ्छइ । पुञ्छइ । पुंसइ । फुसइ । पुसइ । लुहइ । हुलइ । रोसाणइ । पक्षे । मज्जइ ॥ १०५ ॥

भञ्जेर्वेमय--मुसुमूर-मूर--सूर--सूड--विर--पविरञ्ज--करञ्ज--नीरञ्जाः ॥ ८ । ४ । १०६ ॥

भञ्जेरेते नवादेशा वा भवन्ति ॥ वेमयइ । मुसुमूरइ । मूरइ । सूरइ । सूडइ । विरइ । पविरञ्जइ । करञ्जइ । नीरञ्जइ । भञ्जइ ॥ १०६ ॥

अनुव्रजेः पडिअग्गः ॥ ८ । ४ । १०७ ॥

अनुव्रजेः पडिअग्ग इत्यादेशो वा भवति ॥पडिअग्गइ।अणुवच्चइ॥१०७॥

अर्जेर्विढवः ॥ ८ । ४ । १०८ ॥

अर्जेर्विढव इत्यादेशो वा भवति ॥ विढवइ । अज्जइ ॥ १०८ ॥

युजो जुञ्ज--जुज्ज--जुप्पाः ॥ ८ । ४ । १०९ ॥

युजो जुञ्ज जुज्ज जुप्प इत्यादेशा भवन्ति ॥ जुञ्जइ । जुज्जइ । जुप्पइ ॥ १०९ ॥

भुजो भुञ्ज--जिम--जेम--कम्माण्ह--समाण--चमढ--चड्डाः ॥८।४।११०॥

भुज एतेऽष्टादेशा भवन्ति ॥ भुञ्जइ । जिमइ । जेमइ । कम्मेइ । अण्हइ । समाणइ । चमढइ । चड्डइ ॥ ११० ॥

वोपेन कम्मवः ॥ ८ । ४ । १११ ॥

उपेन युक्तस्य भुजेः कम्मव इत्यादेशो वा भवति ॥ कम्मवइ । उवहुञ्जइ ॥ १११ ॥

घटेर्गढः ॥ ८ । ४ । ११२ ॥

घटतेर्गढ इत्यादेशो वा भवति ॥ गढइ घडइ । ॥ ११२ ॥

समा गलः ॥ ८ । ४ । ११३ ॥

सम्पूर्वस्य घटतेर्गल इत्यादेशो वा भवति ॥ संगलइ । संघडइ ॥११३॥

हासेन स्फुटेर्मुरः ॥ ८ । ४ । ११४ ॥

हासेन करणेन यः स्फुटिस्तस्य मुरादेशो वा भवति ॥ मुरइ । हासेन स्फुटति ॥ ११४ ॥

मण्डेश्चिञ्च चिञ्चअ–चिञ्चिल्ल–रीड–टिविडिक्काः ॥८ । ४ । ११५॥

मण्डेरेते पञ्चादेशा वा भवन्ति ॥ चिञ्चइ । चिञ्चअइ । चिञ्चिल्लइ । रीडइ । टिविडिक्कइ । मण्डइ ॥ ११५ ॥

तुडेस्तोड-तुट्ट-खुट्ट-खुडोक्खुडोल्लुक्क-णिलुक्क-लुक्कोल्लूराः ॥८।४।११६॥

तुडेरेते नवादेशा वा भवन्ति ॥ तोडइ । तुट्टइ । खुट्टइ । खुडइ । उक्खुडइ । उल्लुक्कइ । णिलुक्कइ । लुक्कइ । उल्लूरइ । तुडइ ॥ ११६ ॥

घूर्णो घुल–घोल–घुम्म–पहल्लाः ॥ ८।४।११७ ॥

घूर्णेरेते चत्वार आदेशा भवन्ति ॥ घुलइ । घोलइ । घुम्मइ । पहल्लइ ॥ ११७ ॥

विवृतेर्ढंसः ॥ ८।४।११८ ॥

विवृतेर्ढंस इत्यादेशो वा भवति ॥ ढंसइ । विवट्टइ ॥ ११८ ॥

कथेरट्टः ॥ ८।४।११९ ॥

कथेरट्ट इत्यादेशो वा भवति ॥ अट्टइ । कढइ ॥ ११९ ॥

ग्रन्थो गण्ठः ॥ ८।४।१२० ॥

ग्रन्थेर्गण्ठ इत्यादेशो भवति ॥ गण्ठइ । गण्ठी ॥ १२० ॥

मन्थेर्घुसल–विरोलौ ॥ ८।४।१२१ ॥

मन्थेर्घुसल विरोल इत्यादेशौ वा भवतः ॥ घुसलइ । विरोलइ । मन्थइ ।१२१।

ह्लादेरवअच्छः ॥ ८।४।१२२ ॥

ह्लादतेर्ण्यन्तस्याण्यन्तस्य च अवअच्छ इत्यादेशो भवति ॥ अवअच्छइ । ह्लादते । ह्लादयति वा ॥ इकारो ण्यन्तस्यापि परिग्रहार्थः ॥ १२२ ॥

नेः सदो मज्जः ॥ ८।४।१२३ ॥

निपूर्वस्य सदो मज्ज इत्यादेशो भवति ॥ अत्ता एत्थ णुमज्जइ ॥१२३॥

छिदेर्दुहाव-णिच्चल्ल-णिज्झोड-णिव्वर-णिल्लूर-लूराः ॥८।४।१२४॥

छिदेरेते षडादेशा वा भवन्ति ॥ दुहावइ । णिच्चलइ । णिज्झोडइ । णिव्वरइ । णिलूरइ । लूरइ । पक्षे । छिन्दइ ॥ १२४ ॥

आङा ओअन्दोद्दालौ ॥ ८।४।१२५ ॥

आङा युक्तस्य छिदेरोअन्द उद्दाल इत्यादेशौ वा भवतः ॥ ओअन्दइ । उद्दालइ । अच्छिन्दइ ॥ १२५ ॥

मृदो मल-मढ-परिहट्ट-खड्ड-चड्ड-मड्ड-पन्नाडाः ॥ ८।४।१२६॥

मृद्नातेरेते सप्तादेशा भवन्ति ॥ मलइ । मढइ । परिहट्टइ । खड्डइ चड्डइ । मड्डइ । पन्नाडइ ॥ १२६ ॥

स्पन्देश्चुलुचुलः ॥ ८।४।१२७ ॥

स्पन्देश्चुलुचुल इत्यादेशो वा भवति ॥ चुलुचुलइ । फन्दइ ॥ १२७ ॥

निरः पदेर्वलः ॥ ८।४।१२८ ॥

निर्पूर्वस्य पदेर्वल इत्यादेशो वा भवति ॥ निव्वलइ । निप्पज्जइ ॥१२८॥

विसंवदेर्विअट्ट-विलोट्ट-फंसाः ॥ ८।४।१२९ ॥

विसंपूर्वस्य वदेरेते त्रय आदेशा वा भवन्ति ॥ विअट्टइ । विलोट्टइ । फंसइ । विसंवयइ ॥ १२९ ॥

शदो झड-पक्खोडौ ॥ ८।४।१३० ॥

शीयतेरेतावादेशौ भवतः ॥ झडइ । पक्खोडइ ॥ १३०॥

आक्रन्देर्णीहरः ॥ ८।४।१३१ ॥

आक्रन्देर्णीहर इत्यादेशो वा भवति । णीहरइ । अक्कन्दइ ॥ १३१ ॥

खिदेर्जूर-विसूरौ ॥ ८।४।१३२ ॥

खिदेरेतावादेशौ वा भवतः ॥ जूरइ । विसूरइ । खिज्जइ ॥ १३२ ॥

रुधेरुत्थड्घः ॥ ८।४।१३३ ॥

रुधेरुत्थड्घ इत्यादेशो वा भवति ॥ उत्थड्घइ । रुन्धइ ॥ १३३ ॥

निषेधेर्हक्कः ॥ ८।४।१३४ ॥

निषेधतेर्हक्क इत्यादेशो वा भवति ॥ हक्कइ । निसेहइ ॥ १३४ ॥

क्रुधेर्जूरः ॥ ८।४।१३५ ॥

क्रुधेर्जूर इत्यादेशो वा भवति ॥ जूरइ । कुज्झइ ॥ १३५ ॥

जनो जा–जम्मौ ॥ ८।४।१३६ ॥

जायतेर्जा जम्म इत्यादेशौ भवतः ॥ जाअइ जम्मइ ॥ १३६ ॥

तनेस्तड–तड्ड–तड्डव–विरल्लाः ॥ ८।४।१३७ ॥

तनेरेते चत्वार आदेशा वा भवन्ति ॥ तडइ । तड्डइ । तड्डवइ । विरल्लइ । तणइ ॥ १३७ ॥

तृपस्थिप्पः ॥ ८ । ४ । १३८ ॥

तृप्यतेस्थिप्प इत्यादेशो भवति ॥ थिप्पइ ॥ १३८ ॥

उपसर्पेरल्लिअः ॥ ८ । ४ । १३९ ॥

उपपूर्वस्य सृपेः कृतगुणस्य अल्लिअ इत्यादेशो वा भवति ॥ अल्लिअइ । उवसप्पइ ॥ १३९ ॥

संतपेर्झङ्खः ॥ ८ । ४ । १४० ॥

संतपेर्झङ्ख इत्यादेशो वा भवति ॥ झङ्खइ । पक्षे । संतप्पइ ॥१४०॥

व्यापेरोअग्गः ॥ ८ । ४ । १४१ ॥

व्याप्नोतेरोअग्ग इत्यादेशो वा भवति ॥ ओअग्गइ । वावेइ ॥१४१॥

समापेः समाणः ॥ ८ । ४ । १४२ ॥

समाप्नोतेः समाण इत्यादेशो वा भवति ॥ समाणइ । समावेइ ॥१४२॥

क्षिपेर्गलत्थाड्डक्ख-सोल्ल-पेल्ल-णोल्ल-छुह-हुल-परी-घत्ताः॥८।४।१४३॥

क्षिपेरेते नवादेशा वा भवन्ति ॥ गलत्थइ । अड्डक्खइ । सोल्लइ । पेल्लइ । णोल्लइ । ह्रस्वत्वे तु णुल्लइ । छुहइ । हुलइ । परीइ । घत्तइ । खिवइ ॥ १४३ ॥

उत्क्षिपर्गुलगुञ्छोत्थङ्घाल्लत्थोब्भुत्तोस्सिक्क–हक्खुवाः ॥ ८।४ । १४४॥

उत्पूर्वस्य क्षिपेरेते षडादेशा वा भवन्ति ॥ गुलगुञ्छइ । उत्थङ्घइ । अल्लत्थइ । उब्भुत्तइ । उस्सिक्कइ । हक्खुवइ । उक्खिवइ ॥ १४४ ॥

आक्षिपेर्णीरवः ॥ ८।४।१४५ ॥

आङ्पूर्वस्य क्षिपेर्णीरव इत्यादेशो वा भवति ॥ णीरवइ । अक्खिवइ॥१४५॥

स्वपेः कमवस-लिस-लोट्टाः ॥ ८।४।१४६ ॥

स्वपेरेते त्रय आदेशा वा भवन्ति ॥ कमवसइ । लिसइ । लोट्टइ । सुअइ ॥ १४६ ॥

वेपेरायम्बायज्झौ ॥ ८।४।१४७ ॥

वेपेरायम्ब आयज्झ इत्यादेशौ वा भवतः ॥ आयम्बइ । आयज्झइ । वेवइ ॥ १४७ ॥

विलपेर्झङ्ख-वडवडौ ॥८।४।१४८ ॥

विलपेर्झङ्ख वडवड इत्यादेशौ वा भवतः ॥ झङ्खइ । वडवडइ । विलवइ ॥ १४८ ॥

लिपो लिम्पः ॥ ८।४।१४९ ॥

लिम्पतेर्लिम्प इत्यादेशो भवति । लिम्पइ ॥ १४९ ॥

गुप्येर्विर-णडौ ॥ ८।४।१५० ॥

गुप्यतेरेतावादेशौ वा भवतः॥ विरइ । णडइ । पक्षे । गुप्पइ ॥१५०॥

क्रपोवहो णिः ॥ ८।४।१५१ ॥

क्रपेः अवह इत्यादेशो ण्यन्तो भवति ॥ अवहावेइ । कृपां करोतीत्यर्थः ॥ १५१ ॥

प्रदीपेस्तेअव-सन्दुम-सन्धुक्काब्भुत्ताः ॥ ८।४।१५२ ॥

प्रदीप्यतेरेते चत्वार आदेशा वा भवन्ति ॥ तेअवइ । सन्दुमइ । सन्धुक्कइ । अब्भुत्तइ । पलीवइ ॥ १५२ ॥

लुभेः संभावः ॥ ८।४।१५३ ॥

लुभ्यतेः संभाव इत्यादेशो वा भवति ॥ संभावइ । लुब्भइ ॥१५३॥

क्षुभेः खउरपडुहौ ॥ ८।४।१५४ ॥

क्षुभेः खउर पडुह इत्यादेशौ वा भवतः ॥ खउरइ । पडुहइ । खुब्भइ ॥ १५४ ॥

आङो रभे रम्भ–ढवौ ॥ ८।४।१५५ ॥

आङः परस्य रभे रम्भ ढव इत्यादेशौ वा भवतः ॥ आरम्भइ । आढवइ । आरभइ ॥ १५५ ॥

उपालम्भेर्झङ्ख–पच्चार–वेलवाः ॥ ८।४।१५६ ॥

उपालभ्भेरेते त्रय आदेशा वा भवन्ति ॥ झङ्खइ । पच्चारइ । वेलवइ । उवालम्भइ ॥ १५६ ॥

अवेर्जृम्भो जम्भा ॥ ८।४।१५७ ॥

जृम्भेर्जम्भा इत्यादेशो भवति वेस्तु न भवति ॥ जम्भाइ । जम्भाअइ ॥ अवेरिति किम् । केलि–पसरो विअम्भइ ॥ १५७ ॥

भाराक्रान्ते नमेर्णिसुढः ॥ ८ ।४।१५८ ॥

भाराक्रान्ते कर्तरि नमेर्णिसुढ इत्यादेशो भवति ॥ णिसुढइ । पक्षे । णवइ । भाराक्रन्तो नमतीत्यर्थः ॥ १५८ ॥

विश्रमेर्णिव्वा ॥ ८।४।१५९ ॥

विश्राम्यतेर्णिव्वा इत्यादेशो वा भवति ॥ णिव्वाइ । वीसमइ ॥१५९॥

आक्रमेरोहावोत्थारच्छुन्दाः ॥ ८।४।१६० ॥

आक्रमतेरेते त्रय आदेशा वा भवन्ति ॥ ओहावइ । उत्थारइ । छुन्दइ । अक्कमइ ॥ १६० ॥

भ्रमेष्टिरिटिल्ल–ढुण्ढुल्ल–ढण्ढल्ल–चक्कम्म–भम्मड–भमड–भमाड–तलअण्ट–झण्ट–झम्प–भुम–गुम–फुम–फुस–ढुम–दुस–परी–पराः॥८।४।१६१॥

भ्रमेरेतेष्टादशादेशा वा भवन्ति ॥ टिरिटिल्लइ । ढुण्ढुल्लइ । ढण्ढल्लइ । चक्कम्मइ । भम्मडइ । भमडइ । भमाडइ । तलअण्टइ । झण्टइ । झम्पइ । भुमइ । गुमइ । फुमइ । फुसइ । ढुमइ । ढुसइ । परीइ । परइ । भमइ ।१६१।

गमेरई–अइच्छाणुवज्जावज्जसोक्कुसाक्कुस–पच्चड्ड–पच्छन्द–णिम्मह–णी–णीण–णीलुक्क–पदअ–रम्भ–परिअल्ल–वोल–परिअल–णिरिणास–णिवहावसेहावहराः ॥८।४।१६२॥

गमेरेते एकविंशतिरादेशा वा भवन्ति ॥ अईइ । अइच्छइ । अणुवज्जइ ।

अवज्जसइ । उक्कुसइ । अक्कुसइ । पच्चड्डइ । पच्छन्दइ । णिम्महइ । णीइ । णीणइ । णीलुक्कइ । पदअइ । रम्भइ । परिअलइ । वोलइ । परिअलइ । णिरिणासइ । णिवहइ । अवसेहइ । अवहरइ । पक्षे । गच्छइ ॥ हम्मइ । णिहम्मइ । णीहम्मइ । आहम्मइ । पहम्मइ इत्येते तु हम्म गताविति-स्यैव भविष्यन्ति ॥ १६२ ॥

आडा अहिपच्चुअः ॥ ८।४।१६३ ॥

आडा सहितस्य गमेः अहिपच्चुअ इत्यादेशो वा भवति ॥ अहि-पच्चुअइ । पक्षे । आगच्छइ ॥ १६३ ॥

समा अब्भिडः ॥८।४।१६४ ॥

समा युक्तस्य गमेः अब्भिड इत्यादेशो वा भवति ॥ अब्भिडइ । संगच्छइ ॥ १६४ ॥

अभ्याडोम्मत्थः ॥ ८।४।१६५ ॥

अभ्याङ्भ्यां युक्तस्य गमेः उम्मत्थ इत्यादेशो वा भवति ॥ उम्मत्थइ । अब्भागच्छइ । अभिमुखमागच्छतीत्यर्थः ॥ १६५ ॥

पत्याडा पलोट्टः ॥ ८।४।१६६ ॥

प्रत्याङ्भ्यां युक्तस्य गमेः पलोट्ट इत्यादेशो वा भवति ॥ पलोट्टइ । पच्चागच्छइ ॥ १६६ ॥

शमेः पडिसा–परिसामौ ॥ ८।४।१६७॥

शमेरेतावादेशौ वा भवतः ॥ पडिसाइ । परिसामइ । समइ ॥१६७॥

रमेः संखुड्ड-खेड्डोब्भाव-किलिकिञ्च-कोट्टुम-मोट्टाय-णीसर-वेल्लाः ॥ ८।४।१६८ ॥

रमतेरेतेष्टादेशा वा भवन्ति ॥ संखुड्डइ । खेड्डइ । उब्भावइ । किलि-किञ्चइ । कोट्टमइ । मोट्टायइ । णीसरइ । वेल्लइ । रमइ ॥ १६८ ॥

पूरेरग्घाडाग्घवोध्दुमाधुमाङ्गुमाहिरेमाः ॥ ८ । ४ । १६९ ॥

पूरेरेते पञ्चादेशा वा भवन्ति ॥ अग्घाडइ । अग्घवइ । उध्दुमाइ । अङ्गुमइ । अहिरेमइ । पूरइ ॥ १६९ ॥

त्वरस्तुवर-जअडौ ॥ ८ । ४ । १७० ॥

त्वरतेरेतावादेशौ भवतः ॥ तुवरइ । जअडइ । तुवरन्तो । जअडन्तो ॥१७०॥

त्यादिशत्रोस्तूरः ॥ ८।४।१७१ ॥

त्वरतेस्त्यादौ शतरि च तूर इत्यादेशो भवति । तूरइ । तूरन्तो ॥१७१॥

तुरोत्यादौ ॥ ८ । ४ । १७२ ॥

त्वरोत्यादौ तुर आदेशो भवति ॥ तुरिओ । तुरन्तो ॥ १७२ ॥

क्षरः खिर-झर-पज्झर-पच्चड-णिच्चळ-णिट्टुआः ॥ ८ । ४ १७३ ॥

क्षरेरेते षड् आदेशा भवन्ति ॥ खिरइ । झरइ । पज्झरइ । पच्चडइ । णिच्चलइ । णिट्टुअइ ॥ १७३ ॥

उच्छल उत्थल्लः ॥ ८ । ४ । १७४ ॥

उच्छलतेरुत्थल्ल इत्यादेशो भवति ॥ उत्थल्लइ ॥ १७४ ॥

विगलेस्थिप्प-णिट्टुहौ ॥ ८ । ३ । १७५ ॥

विगलतेरेतावादेशौ वा भवतः ॥ थिप्पइ । णिट्टुहइ । विगलइ ॥ १७५ ॥

दलि-वल्योर्विसट्ट-वम्फौ ॥ ८ । ४ । १७६ ॥

दलेर्वलेश्च यथासंख्यं विसट्ट वम्फ इत्यादेशौ वा भवतः ॥ विसट्टइ । वम्फइ । पक्षे । दलइ । वलइ ॥ १७६ ॥

भ्रंशेः फिड-फिट्ट-फुड-फुट्ट-चुक्क-भुल्लाः ॥ ८ । ४ । १७७ ॥

भ्रंशेरेते षडादेशा वा भवन्ति ॥ फिडइ । फिट्टइ । फुडइ फुट्टइ । चुक्कइ । भुल्लइ । पक्षे भंसइ ॥ १७७ ॥

नशेर्णिरणास-णिवहावसंह-पडिसा-सेहावहराः ॥ ८ । ४ । १७८ ॥

नशेरेते षडादेशा वा भवन्ति ॥ णिरणासइ । णिवहइ । अवसेहइ । पडिसाइ । सेहइ । अवहरइ । पक्षे । नस्सइ ॥ १७८ ॥

अवात्काशो वासः ॥ ८ । ४ । १७९ ॥

अवात्परस्य काशो वास इत्यादेशो भवति ॥ ओवासइ ॥ १७९ ॥

संदिशेरप्पाहः ॥ ८ । ४ । १८० ॥

संदिशतेरप्पाह इत्यादेशो वा भवति ॥ अप्पाहइ । संदिसइ ॥ १८० ॥

दृशो निअच्छ-पेच्छावयच्छावयज्झ–वज्ज-सव्वव–देक्खौअक्खावक्खाव-अक्ख–पुलोअ–पुलअ–निआवआस--पासाः ॥ ८ । ४ । १८१ ॥

दृशेरेते पञ्चदशादेशा भवन्ति ॥ निअच्छइ । पेच्छइ । अवयच्छइ । अवयज्झइ । वज्जइ । सव्ववइ । देक्खइ । ओअक्खइ । अवक्खइ । अव-अक्खइ । पुलोएइ । पुलएइ । निअइ । अवआसइ । पासइ ॥ निज्झाअइ इति तु निध्यायतेः स्वरादत्यन्ते भविष्यति ॥ १८१ ॥

स्पृशः फास-फंस-फरिस-छिव-छिहालुङ्खालिहाः ॥८।४।१८२॥

स्पृशतेरेते सप्त आदेशा भवन्ति ॥ फासइ । फंसइ । फरिसइ । छिवइ । छिहइ । आलुङ्खइ । आलिहइ ॥ १८२ ॥

प्रविशे रिअः ॥ ८ । ४ । १८३ ॥

प्रविशेः रिअ इत्यादेशो वा भवति ॥ रिअइ । पविसइ ॥ १८३ ॥

प्रान्मृश–मुषोर्म्हुसः ॥ ८ । ४ । १८४ ॥

प्रात्परयोर्मृशतिमुष्णात्योर्म्हुस इत्यादेशो भवति ॥ पम्हुसइ । प्रमृशति । प्रमुष्णाति वा ॥ १८४ ॥

पिषेर्णिवह–णिरिणास–णिरिणज्ज–रोञ्च–चड्डाः ॥ ८।४।१८५॥

पिषेरेते पञ्चादेशा भवन्ति वा ॥ णिवहइ । णिरिणासइ । णिरिणज्जइ । रोञ्चइ । चड्डइ । पक्षे । पीसइ ॥ १८५ ॥

भषेर्भुक्कः ॥ ८ । ४ । १८६ ॥

भषेर्भुक्क इत्यादेशो वा भवति ॥ भुक्कइ । भसइ ॥ १८६ ॥

कृषेः कड–साअड्ढाञ्चाणञ्छायच्छाइञ्छाः ॥ ८ । ४ । १८७ ॥

कृषेरेते षडादेशा वा भवन्ति॥ कड्ढइ । साअड्ढइ । अञ्चइ । अणच्छइ । अयञ्छइ । आइञ्छइ । पक्षे । करिसइ ॥ १८७ ॥

असावक्खोडः ॥ ८। ४ । १८८ ॥

असिविषयस्य कृषेरक्खोड इत्यादेशो भवति ॥ अक्खोडेइ । आसिं कोशात्कर्षतीत्यर्थः ॥ १८८ ॥

गवेषेर्दुण्ढुल्ल-ढण्ढोल-गमेस-घत्ताः ॥ ८।४।१८९ ॥

गवेषेरेते चत्वार आदेशा वा भवन्ति ॥ ढुण्ढुल्लइ ढण्ढोलइ । गमेसइ । घत्तइ । गवेसइ ॥ १८९ ॥

श्लिषेः सामग्गावयास-परिअन्ताः ॥ ८ । ४ । १९० ॥

श्लिष्येतेरेते त्रय आदेशा वा भवन्ति ॥ सामग्गइ । अवयासइ । परिअन्तइ । सिलेसइ ॥ १९० ॥

म्रक्षेश्चोप्पडः ॥ ८ ।४ । १९१ ॥

म्रक्षेश्चोप्पड इत्यादेशो वा भवति ॥ चोप्पडइ । मक्खइ ॥ १९१ ॥

काङ्क्षेराहाहिलङ्घाहिलङ्घ-वच्च-वम्फ-मह-सिह-विलुम्पाः॥८।४।१९२॥

काङ्क्षतेरेतेष्टादेशा वा भवन्ति ॥ आहइ । अहिलङ्घइ । अहिलङ्घइ । वच्चइ । वम्फइ । महइ । सिहइ । विलुम्पइ । कङ्खइ ॥ १९२ ॥

प्रतीक्षेः सामय-विहीर- विरमालाः ॥ ८ । ४।१९३ ॥

प्रतीक्षेरेते त्रय आदेशा वा भवन्ति ॥ सामयइ । विहीरइ । विरमालइ । पडिक्खइ ॥ १९३ ॥

तक्षेस्तच्छ-चच्छ-रम्प-रम्फाः ॥ ८ । ४ । १९४ ॥

तक्षेरेते चत्वार आदेशा वा भवन्ति ॥ तच्छइ । चच्छइ । रम्पइ । रम्फइ । तक्खइ ॥ १९४ ॥

विकसेः कोआस-वोसट्टौ ॥ ८ । ४ । १९५ ॥

विकसेरेतावादेशौ वा भवतः ॥ कोआसइ । वोसट्टइ । विअसइ ॥१९५॥

हसेर्गुञ्जः ॥ ८ । ४ । १९६ ॥

हसेर्गुञ्ज इत्यादेशो वा भवति ॥ गुञ्जइ । हसइ ॥ १९६ ॥

स्रंसेर्ल्हस-डिम्भौ ॥ ८ । ४ । १९७ ॥

स्रंसेरेतावादेशौ वा भवतः ॥ ल्हसइ । परिल्हसइ सलिल-वसणं । डिम्भइ । संसइ ॥ १९७ ॥

त्रसेर्डर-बोज्ज-वज्जाः ॥ ८ । ४ । १९८ ॥

त्रसेरेते त्रय आदेशा वा भवन्ति ॥ डरइ । बोज्जइ । वज्जइ । तसइ ॥ १९८ ॥

न्यसो णिम-णुमौ ॥ ८ । ४ । १९९ ॥

न्यस्यतेरेतावादेशौ भवतः ॥ णिमइ । णुमइ ॥ १९९ ॥

पर्यसः पलोट्ट-पल्लट्ट-पल्हत्थाः ॥ ८।४।२०० ॥

पर्यस्यतेरेते त्रय आदेशा भवन्ति ॥ पलोट्टइ । पल्लट्टइ । पल्हत्थइ ॥ २०० ॥

निःश्वसेर्झङ्खः ॥ ८ । ४ । २०१ ॥

निःश्वसेर्झङ्ख इत्यादेशो वा भवति ॥ झङ्खइ । नीससइ ॥ २०१ ॥

उल्लसेरूसलोसुम्भ-णिल्लंस-पुलआअ-गुञ्जोल्लारोआः ॥ ८।४।२०२॥

उल्लसेरेते षडादेशा वा भवन्ति ॥ ऊसलइ । ऊसुम्भइ । णिल्लसइ । पुलआअइ । गुञ्जोलइ । ह्रस्वत्वे तु । गुञ्जुलइ । आरोअइ । उल्लसइ ॥ २०२॥

भासेर्भिसः ॥ ८ । ४ । २०३ ॥

भासेर्भिस इत्यादेशो वा भवति ॥ भिसइ । भासइ ॥ २०३ ॥

ग्रसेर्घिसः ॥ ८ । ४ । २०४ ॥

ग्रसेर्घिस इत्यादेशो वा भवति ॥ घिसइ । गसइ ॥ २०४ ॥

अवाद्गाहेर्वाहः ॥ ८ । ४ । २०५ ॥

अवात्परस्य गाहेर्वाह इत्यादेशो वा भवति ॥ ओवाहइ । ओगाहइ ॥ २०५ ॥

आरुहेश्चड-वलग्गौ ॥ ८ । ४ । २०६ ॥

आरुहेरेतावादेशौ वा भवतः ॥ चडइ । वलग्गइ । आरुहइ ॥२०६॥

मुहेर्गुम्म-गुम्मडौ ॥ ८।४।२०७ ॥

मुहेरेतावादेशौ वा भवतः ॥ गुम्मइ । गुम्मडइ । मुज्झइ ॥ २०७ ॥

दहेरहिऊलालुङ्खौ ॥ ८।४।२०८ ॥

दहेरेतावादेशौ वा भवतः ॥ अहिऊलइ । आलुङ्खइ । डहइ ॥ २०८ ॥

ग्रहो वल-गेण्ह-हर-पङ्ग-निरुवाराहिपच्चुआः ॥ ८।४।२०९ ॥

ग्रहेरेते षडादेशा भवन्ति ॥ वलइ । गेण्हइ । हरइ । पङ्गइ । निरुवारइ । अहिपच्चुअइ ॥ २०९ ॥

क्त्वा-तुम्-तव्येषु-घेत् ॥ ८।४।२१० ॥

ग्रहः क्त्वातुमूतव्येषु घेत् इत्यादेशो भवति ॥ क्त्वा । घेत्तूण । घेत्तुआण ॥ क्वचिन्न भवति । गेण्हिअ ॥ तुम् । घेत्तुं ॥ तव्य । घेत्तव्वं ॥ २१० ॥

वचो वोत् ॥ ८।४।२११ ॥

वक्तेर्वोत् इत्यादेशो भवति क्त्वातुमूतव्येषु ॥ वोत्तूण । वोत्तुं । वोत्तव्वं ॥२११॥

रुद्-भुज-मुचां तोन्त्यस्य ॥ ८।४।२१२ ॥

एषामन्त्यस्य क्त्वातुमूतव्येषु तो भवति ॥ रोत्तूण । रोत्तं । रोत्तव्वं ॥ भोत्तूण । भोत्तुं । भोत्तव्वं ॥ मोत्तूण । मोत्तुं । मोत्तव्वं ॥ २१२ ॥

दृशस्तेन ट्ठः ॥ ८।४।२१३ ॥

दृशोन्त्यस्य तकारेण सह द्विरुक्तष्ठकारो भवति ॥ दट्ठूण । दट्ठुं । दट्ठव्वं ॥ २१३ ॥

आः कृगो भूत-भविष्यतोश्च ॥ ८।४।२१४ ॥

कृगोन्त्यस्य आ इत्यादेशो भवति भूतभविष्यत्कालयोश्चकारात् क्त्वातुम्-तव्येषु च ॥ काहीअ । अकार्षीत् । अकरोत् । चकार वा ॥ काहिअ । करिष्यति । कर्ता वा ॥ क्त्वा । काऊण ॥ तुम् । काउं ॥ तव्य । कायव्वं ॥२१४॥

गमिष्यमासां छः ॥ ८।४।२१५ ॥

एषामन्त्यस्य छो भवति ॥ गच्छइ । इच्छइ । जच्छइ । अच्छइ ॥२१५॥

छिदि-भिदो न्दः ॥ ८।४।२१६ ॥

अनयोरन्त्यस्य नकाराक्रान्तो दकारो भवति ॥ छिन्दइ । भिन्दइ ॥२१६॥

युध-बुध-गृध-क्रुध-सिध-मुहां ज्झः ॥८।४।२१७॥

एषामन्त्यस्य द्विरुक्तो झो भवति ॥ जुज्झइ । बुज्झइ । गिज्झइ । कुज्झइ । सिज्झइ । मुज्झइ ॥ २१७ ॥

रुधो न्ध-म्भौ च ॥८।४।२१८॥

रुधोन्त्यस्य न्ध म्भ इत्येतौ चकारात् ज्झश्च भवति ॥ रुन्धइ । रुम्भइ । रुज्झइ ॥ २१८ ॥

सद-पतोर्डः ॥८।४।२१९॥

अनयोरन्त्यस्य डो भवति ॥ सडइ । पडइ ॥ २१९ ॥

कथ-वर्धां ढः ॥८।४।२२०॥

अनयोरन्त्यस्य ढो भवति ॥ कढइ । वड्ढइ पवय-कलयलो ॥ परिअड्ढइ लायण्णं ॥ बहुवचनाद् वृधेः कृतगुणस्य वर्धेश्चाविशेषेण ग्रहणम् ॥२२०॥

वेष्टः ॥ ८ । ४ । २२१ ॥

वेष्ट वेष्टने इत्यस्य धातोः **कगटड** (८-२-७७) इत्यादिना षलोपेन्त्यस्य ढो भवति ॥ वेढइ । वेढिज्जइ ॥ २२१ ॥

समो ल्लः ॥ ८ । ४ । २२२ ॥

संपूर्वस्य वेष्टतेरन्त्यस्य द्विरुक्तो लो भवति ॥ संवेल्लइ ॥ २२२ ॥

वोदः ॥ ८ । ४ । २२३ ॥

उदः परस्य वेष्टतेरन्त्यस्य लो वा भवति ॥ उव्वेल्लइ उव्वेढइ ॥२२३॥

स्विदां ज्जः ॥ ८ । ४ । २२४ ॥

स्विदिप्रकाराणामन्त्यस्य द्विरुक्तो जो भवति ॥ सव्वङ्ग-सिज्जिरीए । संपज्जइ । खिज्जइ ॥ बहुवचनं प्रयोगानुसरणार्थम् ॥ २२४ ॥

व्रज-नृत-मदां च्चः ॥ ८ । ४ । २२५ ॥

एषामन्त्यस्य द्विरुक्तश्चो भवति ॥ वच्चइ । नच्चइ । मच्चइ ॥२२५॥

रुद-नमोर्वः ॥ ८ । ४ । २२६ ॥

अनयोरन्त्यस्य वो भवति ॥ रुवइ । रोवइ । नवइ ॥ २२६ ॥

उद्विजः ॥ ८ । ४ । २२७ ॥

उद्विजतेरन्त्यस्य वो भवति ॥ उव्विवइ । उव्वेवो ॥ २२७ ॥

खाद-धावोर्लुक् ॥ ८ । ४ । २२८ ॥

अनयोरन्त्यस्य लुग् भवति ॥ खाइ । खाअइ । खाहिइ । खाउ । धाइ । धाहिइ । धाउ ॥ बहुलाधिकाराद्वर्तमानाभविष्यद्विध्याद्येकवचन एव भवति । तेनेह न भवति । खादन्ति । धावन्ति ॥ क्वचिन्न भवति । धावइ पुरओ ॥ ॥ २२८ ॥

सृजो रः ॥ ८ । ४ । २२९ ॥

सृजो धातोरन्त्यस्य रो भवति ॥ निसिरइ । वोसिरइ । वोसिरामि ॥ २२९ ॥

शकादीनां द्वित्वम् ॥ ८ । ४ । २३० ॥

शकादीनामन्त्यस्य द्वित्वं भवति ॥ शक् । सक्कइ ॥ जिम् । जिम्मइ ॥ लग् । लग्गइ ॥ मग् । मग्गइ ॥ कुप् । कुप्पइ ॥ नश् । नस्सइ ॥ अट् । परिअट्टइ । कुट् । पकोट्टइ ॥ तुट् । तुट्टइ ॥ नट् । नट्टइ ॥ सिव् । सिव्वइ इत्यादि ॥ २३० ॥

स्फुटि-चलेः ॥ ८ । ४ । २३१ ॥

अनयोरन्त्यस्य द्वित्वं वा भवति ॥ फुट्टइ फुडइ । चलइ चलइ ॥२३१॥

प्रादेर्मीलेः ॥ ८ । ४ । २३२ ॥

प्रादेः परस्य मीलेरन्त्यस्य द्वित्वं वा भवति ॥ पमिल्लइ पमीलइ । निमिल्लइ निमीलइ । संमिल्लइ संमीलइ । उम्मिल्लइ उम्मीलइ ॥ प्रादेरिति किम् । मीलइ ॥ २३२ ॥

उवर्णस्यावः ॥ ८ । ४ । २३३ ॥

धातोरन्त्यस्योवर्णस्य अवादेशो भवति ॥ हुड् । निण्हवइ ॥ हु । निह्नवइ ॥ च्युड् । चवइ ॥ रु । रवइ ॥ कु । कवइ ॥ सू । सवइ । पसवइ ॥ २३३ ॥

ऋवर्णस्यारः ॥ ८।४।२३४ ॥

धातोरन्त्यस्य ऋवर्णस्य अरोदेशो भवति ॥ करइ ॥ धरइ । मरइ वरइ । सरइ । हरइ । तरइ । जरइ ॥ २३४ ॥

वृषादीनामरिः ॥ ८।४।२३५ ॥

वृष इत्येवंप्रकाराणां धातूनाम् ऋवर्णस्य अरिः इत्यादेशो भवति ॥ वृष् । वरिसइ ॥ कृष् । करिसइ ॥ मृष् । मरिसइ ॥ हृष् । हरिसइ ॥ येषामरिरादेशो दृश्यते ते वृषादयः ॥ २३५ ॥

रुषादीनां दीर्घः ॥ ८ । ४ । २३६ ॥

रुष इत्येवंप्रकाराणां धातूनां स्वरस्य दीर्घो भवति ॥ रूसइ । तूसइ । सूसइ । दूसइ । पूसइ । सीसइ । इत्यादि ॥ २३६ ॥

युवर्णस्य गुणः ॥ ८ । ४ । २३७ ॥

धातोरिवर्णस्योवर्णस्य च ङ्कित्यपि गुणो भवति ॥ जेऊण । नेऊण । नेइ । नेन्ति । उड्डेइ । उड्डेन्ति । मोत्तूण । सोऊण ॥ क्वचिन्न भवति ॥ नीओ । उड्डीणो ॥ २३७ ॥

स्वराणां स्वराः ॥ ८ । ४ । २३८ ॥

धातुषु स्वराणां स्थाने स्वरा बहुलं भवन्ति ॥ हवइ । हिवइ । चिणइ । चुणइ ॥ सद्दहणं । सद्दहाणं ॥ धावइ । धुवइ ॥ रुवइ । रोवइ ॥ क्वचिन्नित्यम् । देइ । लेइ । विहेइ । नासइ ॥ आर्षे । बेमि ॥ २३८॥

व्यञ्जनाददन्ते ॥ ८ । ४ । २३९ ॥

व्यञ्जनान्ताद्धातोरन्ते अकारो भवति ॥ भमइ । हसइ । कुणइ । चुम्बइ । भणइ । उवसमइ । पावइ । सिञ्चइ । रुन्धइ । मुसइ । हरइ । करइ ॥ शबादीनां च प्रायः प्रयोगो नास्ति ॥ २३९ ॥

स्वरादनतो वा ॥ ८ । ४ । २४० ॥

अकारान्तवर्जितास्वरान्ताद्धातोरन्ते अकारागमो वा भवति ॥ पाइ पाअइ । धाइ धाअइ । जाइ जाअइ । झाइ झाअइ । जम्भाइ जम्भाअइ । उव्वाइ उव्वाअइ । मिलाइ मिलाअइ । विक्केइ विक्केअइ । होऊण होइऊण ॥ अनत इति किम् । चिइच्छइ । दुगुच्छइ ॥ २४० ॥

चि–जि–श्रु–हु–स्तु–लू–पू–धूगां णो ह्रस्वश्च ॥ ८ । ४ । २४१ ॥

च्यादीनां धातूनामन्ते णकारागमो भवति एषां स्वरस्य च ह्रस्वो भवति ॥ चि । चिणइ ॥ जि । जिणइ ॥ श्रु । सुणइ ॥ हु । हुणइ ॥ स्तु । थुणइ ॥ लू । लुणइ ॥ पू । पुणइ ॥ धूग् । धुणइ ॥ बहुलाधिकारात्क्वचिद्विकल्पः । उच्चिणइ । उच्चेइ ॥ जेऊण । जिणिऊण ॥ जयइ जिणइ ॥ सोऊण । सुणिऊण ॥ २४१ ॥

न वा कर्म–भावे व्वः क्यस्य च लुक् ॥ ८ । ४ । २४२ ॥

च्यादीनां कर्मणि भावे च वर्तमानानामन्ते द्विरुक्तो वकारागमो वा भवति तत्सन्नियोगे च क्यस्य लुक् ॥ चिव्वइ चिणिज्जइ । जिव्वइ जिणिज्जइ । सुव्वइ सुणिज्जइ । हुव्वइ हुणिज्जइ । थुव्वइ थुणिज्जइ । लुव्वइ लुणिज्जइ । पुव्वइ पुणिज्जइ । धुव्वइ धुणिज्जइ ॥ एवं भविष्यति । चेव्विहिइ । इत्यादि ॥ २४२ ॥

म्मश्चेः ॥ ८ । ४ । २४३ ॥

चिगः कर्मणि भावे च अन्ते संयुक्तो मो वा भवति तत्सन्नियोगे क्यस्य च लुक् ॥ चिम्मइ । चिव्वइ । चिणिज्जइ ॥ भविष्यति । चिम्मिहिइ । चिव्विहिइ । चिणिहिइ ॥ २४३ ॥

हन्खनोन्तयस्य ॥ ८।४।२४४ ॥

अनयोः कर्मभावेन्त्यस्य द्विरुक्तो मो वा भवति तत्सन्नियोगे क्यस्य च लुक् ॥ हम्मइ हणिज्जइ । खम्मइ खणिज्जइ ॥ भविष्यति । हम्मिहिइ हणिहिइ । खम्मिहिइ खणिहिइ ॥ बहुलाधिकाराद्धन्तेः कर्तर्यपि ॥ हम्मइ । हन्तीत्यर्थः ॥ क्वचिन्न भवति ॥ हन्तव्वं । हन्तूण । हओ ॥ २४४ ॥

ब्भो दुह-लिह-वह-रुधामुच्चातः ॥ ८ । ४ । २४५ ॥

दुहादीनामन्त्यस्य कर्मभावे द्विरुक्तो भो वा भवति तत्सन्नियोगे क्यस्य च लुग् वहेरकारस्य च उकारः ॥ दुब्भइ दुहिज्जइ । लिब्भइ । लिहिज्जइ । वुब्भइ वहिज्जइ । रुब्भइ रुन्धिज्जइ । भविष्यति । दुब्भिहिइ दुहिहिइ इत्यादि ॥ २४५ ॥

दहो ज्झः ॥ ८ । ४ । २४६ ॥

दहोन्तयस्य कर्मभावे द्विरुक्तो झो वा भवति तत्सन्नियोगे क्यस्य च लुक् ॥ डज्झइ । डहिज्झइ । भविष्यति । डज्झिहिइ । डहिहिइ ॥२४६॥

बन्धो न्धः ॥ ८ । ४ । २४७ ॥

बन्धेर्धातोरन्त्यस्य न्ध इत्यवयवस्य कर्मभावे ज्झो वा भवति तत्सन्नियोगे क्यस्य च लुक् ॥ बज्झइ । बन्धिज्जइ ॥ भविष्यति । बज्झिहिइ । बन्धिहिइ ॥ २४७ ॥

समनूपादुधेः ॥ ८ ४ । २४८ ॥

समनूपेभ्यः परस्य रुधेरन्त्यस्य कर्मभावे ज्झो वा भवति तत्सन्नियोगे क्यस्य च लुक् ॥ संरुज्झइ । अणुरुज्झइ । उवरुज्झइ । पक्षे । संरुन्धिज्जइ । अणुरुन्धिज्जइ । उवरुन्धिज्जइ ॥ भविष्यति । संरुज्झिहिइ । संरुन्धिहिइ । इत्यादि ॥ २४८ ॥

गमादीनां द्वित्वम् ॥ ८ । ४ । २४९ ॥

गमादीनामन्त्यस्य कर्मभावे द्वित्वं वा भवति तत्सन्नियोगे क्यस्य च लुक्॥ गम् । गम्मइ । गमिज्जइ ॥ हस् । हस्सइ । हासिज्जइ ॥ भण् । भण्णइ । भणिज्जइ । छुप् । छुप्पइ । छुविज्जइ ॥ **'रुद–नमोर्व'** (८–४–२२६) इति कृतवकारादेशो रुदिरत्र पठ्यते । रुव् । रुव्वइ । रुविज्जइ ॥ लभ् । लब्भइ । लहिज्जइ ॥ कथ् । कत्थइ । कहिज्जइ ॥ भुज् । भुज्जइ ॥ भुञ्जिज्जइ ॥ भविष्यति । गम्मिहिइ । गमिहिइ । इत्यादि ॥ २४९ ॥

ह्र-कृ-तॄ-ज्रामीरः ॥८।४।२५० ॥

एषमन्त्यस्य ईर इत्यादेशो वा भवति तत्सन्नियोगे च क्यलुक् ॥ हीरइ । हरिज्जइ । कीरइ करिज्जइ । तीरइ तरिज्जइ । जीरइ जरिज्जइ ॥ २५० ॥

अर्जेर्विढप्पः ॥ ८।४।२५१ ॥

अन्त्यस्येति निवृत्तम् । अर्जेर्विढप्प इत्यादेशो वा भवति तत्सन्नियोगे क्यस्य च लुक् ॥ विढप्पइ । पक्षे । विढविज्जइ । अज्जिज्जइ ॥ २५१ ॥

ज्ञो णव्व–गज्जौ ॥ ८।४।२५२ ॥

जानातेः कर्मभावे णव्व णज्ज इत्यादेशौ वा भवतः तत्सन्नियोगे क्यस्य च लुक् ॥ णव्वइ णज्जइ । पक्षे । जाणिज्जइ । मुणिज्जइ ॥ **'म्न-ज्ञोर्णः'**(८-२-४२)इति णादेशे तु । णाइज्जइ ॥ नञ्पूर्वकस्य। अणाइज्जइ ॥ २५२ ॥

व्याहृगेर्वाहिप्पः ॥८।४।२५३ ॥

व्याहरतेः कर्मभावे वाहिप्प इत्यादेशो वा भवति तत्सन्नियोगे क्यस्य च लुक् ॥ वाहिप्पइ । वाहरिज्जइ ॥ २५३ ॥

आरभेराढप्पः ॥ ८।४।२५४ ॥

आङ्पूर्वस्य रभेः कर्मभावे आढप्प इत्यादेशो वा भवति क्यस्य च लुक् ॥ आढप्पइ । पक्षे । आढवीअइ ॥ २५४ ॥

स्निह-सिचोः सिप्पः ॥ ८।४।२५५ ॥

अनयोः कर्मभावे सिप्प इत्यादेशो भवति क्यस्य च लुक् ॥ सिप्पइ । स्निह्यते । सिच्यते वा ॥ २५५ ॥

ग्रहेर्घेप्पः ॥ ८।४।२५६ ॥

ग्रहेः कर्म्मभावे घेप्प इत्यादेशो वा भवति क्यस्य च लुक् ॥ घेप्पइ । गिण्हिज्जइ ॥ २५६ ॥

स्पृशेश्छिप्पः ॥ ८।४।२५७ ॥

स्पृशतेः कर्म्मभावे छिप्पादेशो वा भवति क्यलुक् च ॥ छिप्पइ । छिविज्जइ ॥ २५७ ॥

क्तेनाप्फुणादयः ॥ ८।४।२५८ ॥

अप्फुणादयः शब्दा आक्रमिप्रभृतीनां धातूनां स्थाने क्तेन सह वा निपात्यन्ते ॥ अप्फुणो । आक्रान्तः ॥ उक्कोसं । उत्कृष्टम् ॥ फुडं । स्पष्टम् ॥ वोलीणो । अतिक्रान्तः ॥ वोसट्टो । विकसितः ॥ निसुट्टो । निपातितः ॥ लुग्गो । रुग्णः ॥ लिक्को । नष्टः । पम्हुट्ठो । प्रमृष्टः प्रमुषितो वा ॥ विढत्तं अर्जितम् ॥ छित्तं । स्पृष्टम् ॥ निमिअं । स्थापितम् ॥ चक्खिअं । आस्वादितम् ॥ लुअं । लूनम् ॥ जढं । त्यक्तम् ॥ ज्झोसिअं । क्षितम् ॥ निच्छूढं । उद्वृत्तम् ॥ पल्हत्थं पलोट्टं च । पर्यस्तम् ॥ हीसमणं । हेषितम् । इत्यादि ॥ २५८ ॥

धातवोर्थान्तरेपि ॥ ८।४।२५९ ॥

उक्तादर्थादर्थान्तरेपि धातवो वर्तन्ते ॥ बलिः प्राणने पठितः खादनेपि वर्तते। बलइ । खादति प्राणनं करोति वा ॥ एवं कलिः संख्याने संज्ञानेपि । कलइ । जानाति संख्यानं करोति वा ॥ रिगिर्गतौ प्रवेशेपि ॥ रिगइ । प्रविशति गच्छति वा ॥ कांक्षतेर्वम्फ आदेशः प्राकृते । वम्फइ ।

अस्यार्थः । इच्छति खादति वा ॥ फक्कतेस्थक्क आदेशः । थक्कइ । नीचां गतिं करोति विलम्बयति वा ॥ विलप्युपालम्भ्योर्झङ्ख आदेशः । झङ्खइ । विलपति उपालभते भाषते वा ॥ एवं पडिवालेइ । प्रतीक्षते रक्षति वा ॥ केचित् कैश्चिदुपसर्गैर्निल्यम् । पहरइ । युध्यते ॥ संहरइ । संवृणोति ॥ अणुहरइ । सदृशीभवति ॥ नीहरइ । पुरीषोत्सर्गं करोति ॥ विहरइ । क्रीडति ॥ आहरइ । खादति ॥ पडिहरइ । पुनः पूरयति ॥ परिहरइ । त्यजति ॥ उवहरइ । पूजयति ॥ वाहरइ । आह्वयति ॥ पवसइ । देशान्तरं गच्छति ॥ उच्चुपइ । चटति ॥ उल्लुहइ । निःसरति ॥ २५९ ॥

तो दोनादौ शौरसेन्यामयुक्तस्य ॥ ८ । ४ । २६० ॥

शौरसेन्यां भाषायामनादावपदादौ वर्तमानस्य तकारस्य दकारो भवति न चेदसौ वर्णान्तरेण संयुक्तो भवति ॥ तदो पूरिद-पदिज्जेन मारुदिना मन्तिदो॥ एतस्मात् । एदाहि । एदाओ ॥ अनादाविति किम् । तधा करेध जधा तस्स राइणो अणुकम्पणीआ भोमि ॥ अयुक्तस्येति किम् । मत्तो । अय्यउत्तो । असंभाविद–सक्कारं । हला सउन्तले ॥ २६० ॥

अधः क्वचित् ॥ ८ । ४ । २६१ ॥

वर्णान्तरस्याधोवर्तमानस्य तस्य शौरसेन्यां दो भवति । क्वचिल्लक्ष्यानुसारेण ॥ महन्दो । निच्चिन्दो । अन्देउरं ॥ २६१ ॥

वादेस्तावति ॥ ८ । ४ । २६२ ॥

शौरसेन्यां तावच्छब्दे आदेस्तकारस्य दो वा भवति ॥ दाव । ताव ॥ २६२ ॥

आ आमन्त्र्ये सौ वेनो नः ॥ ८ । ४ । २६३ ॥

शौरसेन्यामिनो नकारस्य आमन्त्र्ये सौ परे आकारो वा भवति ॥ भो कञ्चुइआ । सुहिआ । पक्षे । भो तवस्सि । भो मणस्सि ॥ २६३ ॥

मो वा ॥ ८ ॥ ४ । २६४ ॥

शौरसेन्यामामन्त्र्ये सौ परे नकारस्य मो वा भवति ॥ भो रायं । भो विअयवम्मं । सुकम्मं । भयवं कुसुमाउह । भयवं तित्थं पवत्तेह । पक्षे । सयल-लोअ-अन्तेआरि भयव हुदवह ॥ २६४ ॥

भवद्भगवतोः ॥ ८ । ४ । २६५ ॥

आमन्त्र्य इति निवृत्तम् । शौरसेन्यामनयोः सौ परे नस्य मो भवति ॥ किं एत्थभवं हिदएण चिन्तेदि । एदु भवं । समणे भगवं महावीरे । पज्जलिदो भयवं हुदासणो ॥ क्वचिदन्यत्रापि । मघवं पाग-सासणे । संपाइअवं सीसो । कयवं । करेमि काहं च ॥ २६५ ॥

न वा र्यो य्यः ॥ ८ । ४ । २६६ ॥

शौरसेन्यां र्यस्य स्थाने य्यो वा भवति ॥ अय्यउत्त पय्याकुलीकदम्हि । सुय्यो । पक्षे । अज्जो । पज्जाउलो । कज्ज-परवसो ॥ २६६ ॥

थो धः ॥ ८ । ४ । २६७ ॥

शौरसेन्यां थस्य धो वा भवति ॥ कधेदि कहेदि । णाधो णाहो । कधं कहं । राज–पधो राज–पहो ॥ अपदादावित्येव । थामं । थेओ ॥ २६७ ॥

इह–हचोर्हस्य ॥८।४। २६८ ॥

इहशब्दसम्बन्धिनो **'मध्यमस्येत्था-हचौ'** (८-३-१४३) इति विहितस्य हचश्च हकारस्य शौरसेन्यां धो वा भवति ॥ इध । होध । परित्तायध ॥ पक्षे । इह । होह । परित्तायह ॥ २६८ ॥

भुवो भः ॥ ८ । ४ । २६९ ॥

भवतेर्हकारस्य शौरसेन्यां भो वा भवति ॥ भोदि । होदि । भुवदि । हुवदि । भवदि । हवदि ॥ २६९ ॥

पूर्वस्य पुरवः ॥ ८ । ४ । २७० ॥

शौरसेन्यां पूर्वशब्दस्य पुरव इत्योदेशो वा भवति ॥ अपुरवं नाडयं । अपुरवागदं । पक्षे । अपुव्वं पदं । अपुव्वागदं ॥ २७० ॥

क्त्व इय–दूणौ ॥ ८ । ४ । २७१ ॥

शौरसेन्यां क्त्वाप्रत्ययस्य इय दूण इत्योदेशौ वा भवतः ॥ भविय भोदूण । हविय होदूण । पढिय पढिदूण । रमिय रन्दूण । पक्षे भोत्ता । होत्ता । पढित्ता । रन्ता ॥ २७१ ॥

कृ-गमो डडुअः ॥ ८ । ४ । २७२ ॥

आभ्यां परस्य क्त्वाप्रत्ययस्य डित् अडुअ इत्यादेशो वा भवति ॥ कडुअ । गडुअ । पक्षे । करिय । करिदूण । गच्छिय । गच्छिदूण ॥ २७२ ॥

दिरिचेचोः ॥ ८ । ४ । २७३ ॥

'त्यादीनामाद्यत्रयस्याद्यस्यैचेचौ' (८-३-१३९) इति विहितयो रिचेचोः स्थाने दिर्भवति ॥ वेति निवृत्तम् । नेदि । देदि । भोदि । होदि ॥ २७३ ॥

अतो देश्च ॥ ८ । ४ । २७४ ॥

अकारात्परयोरिचेचोः स्थाने देश्चकाराद् दिश्च भवति ॥ अच्छदे । अच्छदि ॥ गच्छदे । गच्छदि ॥ रमदे । रमदि ॥ किज्जदे । किज्जदि ॥ अत इति किम् । वसुआदि । नेदि । भोदि ॥ २७४ ॥

भविष्यति स्सिः ॥ ८ । ४ । २७५ ॥

शौरसेन्यां भविष्यदर्थे विहिते प्रत्यये परे स्सिर्भवति ॥ हिस्साहामपवादः । भविस्सिदि । करिस्सिदि । गाच्छिस्सिदि ॥ २७५ ॥

अतो डसेर्डादो-डादू ॥ ८ । ४ । २७६ ॥

अतः परस्य डसेः शौरसेन्यां आदो आदु इत्यादेशौ डितौ भवतः ॥ दूरादो ण्येव । दूरादु ॥ २७६ ॥

इदानीमो दाणिं ॥ ८ । ४ । २७७ ॥

शौरसेन्यामिदानीमः स्थाने दाणिमित्यादेशो भवति ॥ अनन्तरकरणीयं दाणिं आणवेदु अय्यो ॥ व्यत्ययात्प्राकृतेपि । अन्नं दाणिं बोहिं ॥ २७७॥

तस्मात्ताः ॥ ८ । ४ । २७८ ॥

शौरसेन्यां तस्माच्छब्दस्य ता इत्यादेशो भवति ॥ ता जाव पविसामि । ता अलं एदिणा माणेण ॥ २७८ ॥

मोन्त्याण्णो वेदेतोः ॥ ८।४।२७९ ॥

शौरसेन्यामन्त्यान्मकारात्पर इदेतोः परयोर्णकारागमो वा भवति ॥ इकारे । जुत्तं णिमं जुत्तमिणं । सरिसं णिमं सरिसमिणं । एकारे । किं णेदं किमेदं । एवं णेदं एवमेदं ॥ २७९ ॥

एवार्थे य्येव ॥ ८ । ४ । २८० ॥

एवार्थे य्येव इति निपातः शौरसेन्यां प्रयोक्तव्यः ॥ मम य्येव वम्भणस्स । सो य्येव एसो ॥ २८० ॥

हञ्जे चेटयाह्वाने ॥ ८ । ४ । २८१ ॥

शौरसेन्यां चेटयाह्वाने हञ्जे इति निपातः प्रयोक्तव्यः ॥ हञ्जे चदुरिके ॥ २८१ ॥

हीमाणहे विस्मय-निर्वेदे ॥ ८ । ४ । २८२ ॥

शौरसेन्यां हीमाणहे इत्ययं निपातो विस्मये निर्वेदे च प्रयोक्तव्यः ॥ विस्मये ॥ हीमाणहे जीवन्त-वच्छा मे जणणी ॥ निर्वेदे । हीमाणहे पालिस्सन्ता हगे एदेण निय-विधिणो दुव्ववसिदेण ॥ २८२ ॥

णं नन्वर्थे ॥ ८ । ४ । २८३ ॥

शौरसेन्यां नन्वर्थे णमिति निपातः प्रयोक्तव्यः ॥ णं अफलोदया । णं अय्यमिस्सेहिं पुढमं य्येव आणत्तं । णं भवं मे अग्गदो चलदि । आर्षे वाक्यालङ्कारेपि दृश्यते नमोत्थु णं । जया णं । तया णं ॥ २८३ ॥

अम्महे हर्षे ॥ ८ । ४ । २८४ ॥

शौरसेन्यां अम्महे इति निपातो हर्षे प्रयोक्तव्यः ॥ अम्महे एआए सुम्मिलाए सुपलिगढिदो भवं ॥ २८४ ॥

हीही विदूषकस्य ॥ ८ । ४ । २८५ ॥

शौरसेन्यां हीही इति निपातो विदूषकाणां हर्षे द्योत्ये प्रयोक्तव्यः ॥ ही ही भो संपन्ना मणोरधा पिय-वयस्सस्स ॥ २८५ ॥

शेषं प्राकृतवत् ॥ ८ । ४ । २८६ ॥

शौरसेन्यामिह प्रकरणे यत्कार्यमुक्तं ततोन्यच्छौरसेन्यां प्राकृतवदेव भवति ॥ **'दीर्घ-ह्रस्वौ मिथो वृत्तौ'** (८-१-४) इत्यारभ्य **'तो दोनादौ शौरसेन्यामयुक्तस्य'** (८-४-२६०) एतस्मात्सूत्रात्प्राग् यानि सूत्राणि एषु यान्युदाहरणानि तेषु मध्ये अमूनि तदवस्थान्येव शौरसेन्यां भवन्ति अमूनि पुनरेवंविधानि भवन्तीति विभागः प्रतिसूत्रं स्वयमभ्यूह्य दर्शनीयः ॥ यथा ।

अन्दावेदी । जुवदि–जणो । मणसिला । इत्यादि ॥ २८६ ॥

अत एत्सौ पुंसि मागध्याम् ॥ ८।४।२८७ ॥

मागध्यां भाषायां सौ परे अकारस्य एकारो भवति पुंसि पुल्लिङ्गे ॥ एष मेषः । एशे मेशे ॥ एशे पुलिशे ॥ करोमि भदन्त । करेमि भन्ते ॥ अत इति किम् । णिही । कली । गिली ॥ पुंसीति किम् । जलं ॥ यदपि **" पोराणमद्ध-मागह-भासा-निययं हवइ सुत्तं "** इत्यादिनार्षस्य अर्द्ध-मागधभाषानियतत्वमाम्नायि वृद्धैस्तदपि प्रायोस्यैव विधानान्न वक्ष्यमाणलक्षणस्य॥ कयरे आगच्छइ ॥ से तारिसे दुक्खसहे जिइन्दिए । इत्यादि ॥ २८७ ॥

र-सोर्ल-शौ ॥ ८।४।२८८ ॥

मागध्यां रेफस्य दन्त्यसकारस्य च स्थाने यथासंख्यं लकारस्तालव्यशकारश्च भवति ॥ र ॥ नले । कले ॥ स । हंशे । शुदं । शोभणं ॥ उभयोः । शालशे । पुलिशे ॥

लहश-वश-नमिल-शुल-शिल-विअलिद-मन्दाल-लायिदंहियुगे ।
वील-यिणे पक्खालदु मम शयलमवय्य-यम्बालं ॥ २८८ ॥

स-षोः संयोगे सोग्रीष्मे ॥ ८ । ४ । २८९ ॥

मागध्यां सकारषकारयोः संयोगे वर्तमानयोः सो भवति ग्रीष्मशब्दे तु न भवति । ऊर्ध्वलोपाद्यपवादः ॥ स । पस्खलदि हस्ती । बुहस्पदी । मस्कली । विस्मये ॥ ष । शुस्क-दालुं । कस्टं । विस्नुं । शस्प-कवले । उस्मा । निस्फलं । धनुस्खण्डं ॥ अग्रीष्म इति किम् । गिम्ह-वाशले ॥ २८९ ॥

ट्ट–ष्ठयोस्टः ॥ ८।४।२९० ॥

द्विरुक्तस्य टस्य षकाराक्रान्तस्य च ठकारस्य मागध्यां सकाराक्रान्तः टकारो भवति ॥ ट्ट । पस्टे । भस्टालिका । भास्टिणी ॥ ष्ठ । शुस्टु कदं । कोस्टागालं ॥ २९० ॥

स्थ–र्थयोस्तः ॥ ८।४।२९१ ॥

स्थ र्थ इत्येतयोः स्थाने मागध्या सकाराक्रान्तः तो भवति ॥ स्थ । उवस्तिदे । शुस्तिदे ॥ र्थ । अस्त–वदी । शास्तवाहे ॥ २९१ ॥

ज–द्य–र्यां–यः ॥ ८।४।२९२ ॥

मागध्यां जद्यर्यां स्थाने यो भवति ॥ ज । याणदि । यणवदे । अय्युणे । दुय्यणे । गय्यदि । गुण–वय्यिदे ॥ द्य । मय्यं । अय्य किल विय्याहले आगदे ॥ य । यादि । यधाशलूवं । याण–वत्तं । यदि ॥ यस्य यत्वविधानम् ' **आदेर्यो जः** ' (८–१–२४५) इति बाधनार्थम् ॥ २९२ ॥

न्य–ण्य–ज्ञ–ञ्जां ञ्जः ॥८।४।२९३॥

मागध्यां न्य ण्य ज्ञ ञ्ज इत्येतेषां द्विरुक्तो ञ्जो भवति ॥ न्य ॥ अहिमञ्जुकुमाले । अञ्ज-दिशं । शामञ्ज-गुणे । कञ्जका-वलणं ॥ ण्य । पुञ्जवन्ते । अबह्मञ्जं । पुञ्जाहं । पुञ्जं ॥ ज्ञ । पञ्जाविशाले । शव्वञ्जे । अवञ्जा ॥ ञ्ज । अञ्जली । धणञ्जए । पञ्जले ॥ २९३ ॥

व्रजो जः ॥ ८।४।२९४ ॥

मागध्यां व्रजेर्जकारस्य ञ्जो भवति । यापवादः ॥ वञ्जदि ॥ २९४ ॥

छस्य श्चोनादौ ॥ ८।४।२९५ ॥

मागध्यामनादौ वर्तमानस्य छस्य तालव्यशकाराक्रान्तश्चो भवति ॥ गश्च गश्च । उश्चलदि । पिश्चिले । पुश्चदि ॥ लाक्षणिकस्यापि । आपन्नवत्सलः । आवन्न–वश्चले ॥ तिर्यक् प्रेक्षते । तिरिच्छि पेच्छइ । तिरिश्चि पेस्कदि ॥ अनादाविति किम् ॥ छाले ॥ २९५ ॥

क्षस्य ⁎कः ॥ ८।४।२९६ ॥

मागध्यामनादौ वर्तमानस्य क्षस्य ⁎को जिह्वामूलीयो भवति ॥ य⁎के ॥ ल⁎कशे ॥ अनादावित्येव । खय–यलहला । क्षयजलधरा इत्यर्थः ॥२९६॥

स्कः प्रेक्षराचक्षोः ॥ ८ । ४ । २९७ ॥

मागध्यां प्रेक्षेराचक्षेश्च क्षस्य सकाराक्रान्तः को भवति ॥ जिह्वामूलीयापवादः ॥ पेस्कदि । आचस्कदि ॥ २९७ ॥

तिष्ठश्चिष्ठः ॥ ८ । ४ । २९८ ॥

मागध्यां स्थाधातोर्यस्तिष्ठ इत्यादेशस्तस्य चिष्ठ इत्यादेशो भवति ॥ चिष्ठदि ॥ २९८ ॥

अवर्णाद्वा ङसो डाहः ॥ ८ । ४ । २९९ ॥

मागध्यामवर्णात्परस्य ङसो डित् आह इत्यादेशो वा भवति ॥ हगे न एलिशाह कम्माह काली । भगदत्त-शोणिदाह कुम्भे । पक्षे । भीमशेणस्स पश्चादो हिण्डीअदि । हिडिम्बाए घडुक्कय-शोके ण उवशमदि ॥ २९९ ॥

आमो डाहँ वा ॥ ८ । ४ । ३०० ॥

मागध्यामवर्णात्परस्य आमोनुनासिकान्तो डित् आहादेशो वा भवति ॥ शय्यणाहँ सुहं । पक्षे । नलिन्दाणं ॥ व्यत्ययात्प्राकृतेपि । ताहँ । तुम्हाहँ । अम्हाहँ । सरिआहँ । कम्माहँ ॥ ३०० ॥

अहं वयमोर्हगे ॥ ८ । ४ । ३०१ ॥

मागध्यामहंवयमोः स्थाने हगे इत्यादेशो भवति ॥ हगे शक्कावदालति-स्त-णिवाशी धीवले । हगे शंपत्ता ॥ ३०१ ॥

शेषं शौरसेनीवत् ॥ ८ । ४ । ३०२ ॥

मागध्यां यदुक्तं ततोन्यच्छौरसेनीवद् द्रष्टव्यम् ॥ तत्र **' तो दोनादौ शौरसेन्यामयुक्तस्य '** (८-४-२६०) ॥ पविशदु आयुत्ते शामि-पशादाय ॥ **'अधः क्वचित्'** (८-४-२६१) अले किं एशे महन्दे कलयले ॥ **'वादेस्तावति'** (८-४-२६२) ॥ मालेध वा धलेध वा ॥ अयं दाव शे आगमे ॥ **'आ आमन्त्र्ये सौ वेनो नः '** (८-४-२६३) भो कञ्चुइआ ॥**' मो वा '** (८-४-२६४ ॥ भो रायं ॥ **'भवद्भगवतोः '**(८-४-२६५) ॥ एदु भवं शमणे भयवं महावीले । भयवं कदन्ते ये अप्पणो पऱकं उज्झिय पलस्स पऱकं पमाणीकलेशि ॥ **' न वा र्यो र्य्यः '** (८-४-२६६) ॥ अय्य एशे खु कुमाले मलयकेदू ॥ **' थो धः '** (८-४-२६७) ॥ अले कुम्भिला कधेहि ॥ **'इह-हचोर्हस्य '** (८-४-२६८) ॥ ओशलध अय्या ओशलध ॥ **' भुवो भः '** (८-४-२६९)॥ भोदि ॥ **' पूर्वस्य पुरवः '** (८-४-२७०) ॥ अपुरवे ॥ **'क्त्व इयदूणौ'** (८-४-२७१)॥ किं खु शोभणे बम्हणे शि त्ति कलिय लज्जा पलिग्गहे दिण्णे ॥ **'कृ-गमो डुडुअः '**(८-४-२७२) ॥ कडुअ । गडुअ ॥ **' दिरिचेचोः '**(८-४-२७३) ॥ अमच्च-लऱकशं पिक्खिदुं इदो य्येव आग-

श्चादि ॥ **'अतो देश्च'** (८-४-२७४) अले किं एशे महन्दे कलयले शुणीअदे॥ **'भविष्यति स्सिः'** (८-४-२७५) ता कहिं नु गदे लुहिलप्पिए भविस्सदि ॥ **' अतो ङसेर्डादो-डादू '** (८-४-२७६) ॥ अहं पि भागुलायणादो मुद्दं पावेमि ॥ **' इदानीमो दाणिं '**(८-४-२७७) ॥ शुणध दाणिं हगे शक्काव-याल-तिस्त-णिवाशी धीवले ॥ **'तस्मात्ताः'** (८-४-२७८)॥ ता याव पवि-शामि ॥ **'मान्त्याण्णो वेदेतोः'** (८-४-२७९)॥ युत्त णिमं। शलिशं णिमं ॥ **'एवार्थे य्येव'** (८-४-२८०)॥ मम य्येव ॥ **हञ्जे चेटचाह्वाने** (८-४-२८१)॥ हञ्जे चदुलिके ॥ **हिणामहे विस्मय-निर्वेदे** (८-४-२८२) ॥ विस्मये । यथा उदात्तराघवे । राक्षसः । हीमाणहे जीवन्त-वश्चा मे जणणी ॥ निर्वेदे । यथा विक्रान्तभीमे राक्षसः । हीमाणहे पलिस्सन्ता हगे एदेण निय-विधिणो दुव्ववशिदेण ॥ **'णं नन्वर्थे'** (८-४-२८३) ॥ णं अवशलोपशप्पणीया लायाणो ॥ **'अम्महे हर्षे'** (८-४-२८४) अम्हहे एआए शुम्मिलाए शुपलिग-ढिदे भवं ॥ **'हीही विदुषकस्य'** (८-४-२८५) ॥ हीही संपन्ना मे मणोलधा पियवयस्सस्स ॥ **'शेषं प्राकृतवत्'** (८-४-२८६)। मागध्यामपि **' दीर्घ-ह्रस्वौ मिथो वृत्तौ '** (८-१-४) इत्यारभ्य **' तो दोनादौ शौरसेन्यामयुक्तस्य '** (८-४-२६०) इत्यस्मात् प्राग् यानि सूत्राणि तेषु यान्युदाहरणानि सन्ति तेषु मध्ये अमूनि तदवस्थान्येव मागध्याममूनि पुनरेवंविधानि भवन्तीति विभागः स्वयमभ्यूह्य दर्शनीयः ॥ ३०२ ॥

ज्ञो ञ्जः पैशाच्याम् ॥ ८ । ४ । ३०३ ॥

पैशाच्यां भाषायां ज्ञस्य स्थाने ञ्जो भवति ॥ पञ्जा ॥ सञ्जा । सव्वञ्जो । ञ्जानं । विञ्जानं ॥ ३०३ ॥

राज्ञो वा चिञ् ॥ ८ । ४ । ३०४ ॥

पैशाच्यां राज्ञ इति शब्दे यो ज्ञकारस्तस्य चिञ आदेशो वा भवति ॥ राचिञा लपितं । रञ्ञा लपितं । राचिञो धनं । रञ्ञो धनं । ज्ञ इत्येव । राजा ॥ ३०४ ॥

न्य–ण्योर्ञः ॥ ८ । ४ । ३०५ ॥

पैशाच्यां न्यण्योः स्थाने ञ्ञो भवति । कञ्ञका । अभिमञ्ञू । पुञ्ञकम्मो । पुञ्ञाहं ॥ ३०५॥

णो नः ॥ ८ । ४ । ३०६ ॥

पैशाच्यां णकारस्य नो भवति । गुन–गन–युत्तो । गुनेन ॥ ३०६ ॥

तदोस्तः ॥ ८ । ४ । ३०७ ॥

पैशाच्यां तकारदकारयोस्तो भवति । तस्य । भगवती । पव्वती । सतं । दस्य । मतन–परवसो । सतनं । तामोतरो । पतेसो । वतनकं । होतु । रमतु ॥ तकारस्यापि तकारविधानमादेशान्तरबाधनार्थम् । तेन पताका वेतिसो इत्याद्यपि सिद्धं भवति ॥ ३०७ ॥

लो ळः ॥ ८ । ४ । ३०८ ॥

पैशाच्यां लकारस्य ळकारो भवति ॥ सीळं । कुळं । जळं । सळिळं । कमळं ॥ ३०८ ॥

श–षोः सः ॥ ८ । ४ । ३०९ ॥

पैशाच्यां शषोः सो भवति । श । सोभति । सोभनं । ससी । सक्को । सङ्को ॥ ष । विसमो । किसानो । **'न कगचजादिषट्शम्यन्तसूत्रोक्तम्'** (८–४–३२४) इत्यस्य बाधकस्य बाधनार्थोयं योगः ॥ ३०९ ॥

हृदये यस्य पः ॥ ८ । ४ । ३१० ॥

पैशाच्यां हृदयशब्दे यस्य पो भवति । हितपकं । किंपि किंपि हितपके अत्थं चिन्तयमानी ॥ ३१० ॥

टोस्तुर्वा ॥ ८ । ४ । ३११ ॥

पैशाच्यां टोः स्थाने तुर्वा भवति । कुतुम्बकं । कुटुम्बकं ॥ ३११ ॥

क्त्वस्तूनः ॥ ८ । ४ । ३१२ ॥

पैशाच्यां क्त्वाप्रत्ययस्य स्थाने तून इत्यादेशो भवति ॥ गन्तून । रन्तून हसितून । पठितून । कथितून ॥ ३१२ ॥

ध्दून-त्थूनौ ष्ट्वः ॥ ८ । ४ । ३१३ ॥

पैशाच्यां ष्ट्वा इत्यस्य स्थाने ध्दून त्थून इत्यादेशौ भवतः । पूर्वस्यापवादः । नध्दून । नत्थून । तध्दून । तत्थून ॥ ३१३ ॥

र्य-स्न-ष्टां रिय-सिन-सटाः क्वचित् ॥ ८ । ४ । ३१४ ॥

पैशाच्यां र्यस्नष्टां स्थाने यथासंख्यं रिय सिन सट इत्यादेशाः क्वचित् भवन्ति । भार्या । भारिया । स्नातम् । सिनातं । कष्टम् । कसटं । क्वचिदिति किम् । सुज्जो । सुनुसा । तिट्ठो ॥ ३१४ ॥

क्यस्येय्यः ॥ ८ । ४ । ३१५ ॥

पैशाच्यां क्यप्रत्ययस्य इय्य इत्यादेशो भवति । गिय्यते । दिय्यते । रमिय्यते । पठिय्यते ॥ ३१५ ॥

कृगो डीरः ॥ ८ । ४ । ३१६ ॥

पैशाच्यां कृगः परस्य क्यस्य स्थाने डीर इत्यादेशो भवति । पुधुमतंसने सव्वस्स य्येव सम्मानं कीरते ॥ ३१६ ॥

यादृशादेर्दुस्तिः ॥ ८।४।३१७ ॥

पैशाच्यां यादृश इत्येवमादीनां दृ इत्यस्य स्थाने तिः इत्यादेशो भवति । यातिसो । तातिसो । केतिसो । एतिसो । भवातिसो । अञ्ञातिसो । युम्हातिसो । अम्हातिसो ॥ ३१७ ॥

इचेचः ॥ ८।४।३१८ ॥

पैशाच्यामिचेचोः स्थाने तिरादेशो भवति ॥ वसुआति । भोति । नेति । तेति ॥ ३१८ ॥

आत्तेश्च ॥८।४।३१९॥

पैशाच्यामकारात्परयोः इचेचोः स्थाने तेश्चकारात् तिश्चादेशो भवति ॥ लपते । लपति । अच्छते । अच्छति । गच्छते । गच्छति । रमते । रमति। आदिति किम् । होति । नेति ॥ ३१९ ॥

भविष्यत्येय्य एव ॥ ८।४।३२० ॥

पैशाच्यामिचेचोः स्थाने भविष्यति एय्य एव भवति न तु स्सिः ॥ तं तद्धून चिंतितं रञ्ञा का एसा हुवेय्य ॥ ३२० ॥

चीमूतो ॥ निर्झरः । निच्छरो ॥ झर्झरः । छच्छरो ॥ तडागम् । तटाकं ॥ मण्डलम् । मण्टलं ॥ डमरुकः । टमरुको ॥ गाढम् । काठं ॥ षण्ढः । सण्ठो ॥ ढक्का । ठक्का ॥ मदनः । मतनो ॥ कन्दर्पः । कन्तप्पो ॥ दामोदरः । तामोतरो ॥ मधुरम् । मथुरं ॥ बान्धवः । पन्थवो ॥ धूली । थूली ॥ बालकः । पालको ॥ रभसः । रफसो ॥ रम्भा । रम्फा । भगवती । फकवती ॥ नियोजितम् । नियोचितं ॥ क्वचिल्लाक्षणिकस्यापि । पडिमा इत्यस्य स्थाने पटिमा । दाढा इत्यस्य स्थाने ताठा ॥ ३२५ ॥

रस्य लो वा ॥ ८ । ४ । ३२६ ॥

चूलिकापैशाचिके रस्य स्थाने लो वा भवति ॥

पनमथ पनय-पकुप्पित-गोली-चलनग्ग-लग्ग-पति-बिम्बं ।
तससु नख-तप्पनेसुं एकातस-तनु-थलं लुद्दं ॥
नच्चन्तस्स य लीला-पातुक्खेवेन कम्पिता वसुधा ।
उच्छलन्ति समुद्दा सइला निपतन्ति तं हलं नमथ ॥३२६॥

नादि-युज्योरन्येषाम् ॥ ८ । ४ । ३२७ ॥

चूलिकापैशाचिकेपि अन्येषामाचार्याणां मतेन तृतीयतुर्ययोरादौ वर्तमानयोर्युजिधातौ च आद्यद्वितीयौ न भवतः ॥ गतिः । गती ॥ घर्मः । घम्मो ॥ जीमूतः । जीमूतो ॥ झर्झरः । झच्छरो ॥ डमरुकः । डमरुको ॥ ढक्का । ढक्का ॥ दामोदरः । दानोतरो ॥ बालकः । बालको ॥ भगवती । भकवती ॥ नियोजितम् । नियोजितं ॥ ३२७ ॥

शेषं प्राग्वत् ॥ ८ । ४ । ३२८ ॥

चूलिकापैशाचिके तृतीयतुर्ययोरित्यादि यदुक्तं ततोन्यच्छेषं प्राक्तनपैशाचिकवद् भवति ॥ नकरं । मक्कनो । अनयोर्नो णत्वं न भवति ॥ णस्य च नत्वं स्यात् । एवमन्यदपि ॥ ३२८ ॥

स्वराणां स्वराः प्रायोपभ्रंशे ॥ ८।४।३२९ ॥

अपभ्रंशे स्वराणां स्थाने प्रायः स्वरा भवन्ति ॥ कच्चु । काच्च ॥ वेण । वीण ॥ बाह । बाहा । बाहु ॥ पट्ठि । पिट्ठि । पुट्ठि ॥ तणु । तिणु । तृणु ॥ सुकिदु । सुकिओ । सुकृदु ॥ किन्नओ । किलिन्नओ ॥ लिह । लीह ।

लेह ॥ गउरि । गोरि ॥ प्रायोग्रहणाद्यस्यापभ्रंशे विशेषो वक्ष्यते तस्यापि क्वचित्प्राकृतवत् शौरसेनीवच्च कार्यं भवति ॥ ३२९ ॥

स्यादौ दीर्घ–ह्रस्वौ ॥ ८।४।३३० ॥

अपभ्रंशे नाम्नोन्त्यस्वरस्य दीर्घह्रस्वौ स्यादौ प्रायो भवतः ॥ सौ ॥

ढोल्ला सामला धण चम्पा–वण्णी ।
णाइ सुवण्ण–रेह कस–वट्टर दिण्णी ॥

आमन्त्र्ये ।

ढोल्ला मइं तुहुं वारिया मा कुरु दीहा माणु ।
निद्दए गमिही रत्तडी दडवड होइ विहाणु ॥

स्त्रियाम् ॥

बिट्टीए मइ भणिय तुहुं मा करु वङ्की दिट्ठि ।
पुत्ति सकण्णी भल्लि जिव मारइ हिअइ पइट्ठि ॥

जसि ॥

एइ ति घोडा एह थलि एइ ति निसिआ खग्ग ।
एत्थु मुणीसिम जाणीअइ जो नवि वालइ वग्ग ॥

एवं विभक्त्यन्तरेष्वप्युदाहार्यम् ॥ ३३० ॥

स्यमोरस्योत् ॥ ८ । ४ । ३३१ ॥

अपभ्रंशे अकारस्य स्यमोः परयोः उकारो भवति ।

दहमुहु भुवण–भयंकरु तोसिअ–संकरु णिग्गउ रह–वरि चडिअउ ।
चउमुहु छंमुहु झाइवि एक्कहिं लाइवि णावइ दइवें घडिअउ ॥३३१॥

सौ पुंस्योद्वा ॥ ८ । ४ । ३३२ ॥

अपभ्रंशे पुल्लिङ्गे वर्तमानस्य नाम्नोकारस्य सौ परे ओकारो वा भवति ।

अगलिअ–नेह–निवट्टाहं जोअण–लक्खुवि जाउ ।
वरिस–सएण वि जो मिलइ सहि सोक्खहं सो ठाउ ।

पुंसीति किम् ।

अङ्गहिं अङ्गु न मिलिउ हलि अहरें अहरु न पत्तु ।

पिअ जोअन्तिहे मुह–कमलु एम्वइ सुरउ समत्तु ॥ ३३२ ॥

एट्टि ॥ ८ । ३ । ३३३ ॥

अपभ्रंशे अकारस्य टायामेकारो भवति ।

जे महु दिण्णा दिअहडा दइएं पवसन्तेण ।

ताण गणन्तिए अङ्गुलिउ जज्जरिआउ नहेण ॥ ३३३ ॥

डिनेच्च ॥ ८ । ४ । ३३४ ॥

अपभ्रंशे अकारस्य डिना सह इकार एकारश्च भवतः ।

सायरु उप्परि तणु धरइ तलि घल्लइ रयणाइं ।

सामि सुभिच्चु वि परिहरइ सम्माणेइ खलाइं ॥

तले घल्लई ॥ ३३४ ॥

भिस्येद्वा ॥ ८ । ४ । ३३५ ॥

अपभ्रंशे अकारस्य भिसि परे एकारो वा भवति ।

गुणहिं न संपइ कित्ति पर फल लिहिआ भुञ्जन्ति ।

केसरि न लहइ बोड्डिअ वि गय लक्खेहिं घेप्पन्ति ॥ ३३५ ॥

ङसेर्हे–हू ॥ ८ । ४ । ३३६ ॥

अस्येति पञ्चम्यन्तं विपरिणम्यते । अपभ्रंशे अकारात्परस्य ङसेर्हे हु इत्यादेशौ भवतः ।

वच्छहे गृण्हइ फलइं जणु कडु–पल्लव वज्जेइ ।

तोवि महद्दुमु सुअणु जिवँ ते उच्छङ्गि धरेइं ।

वच्छहु गृण्हइ ॥ ३३६ ॥

भ्यसो हुं ॥ ८।४।३३७ ॥

अपभ्रंशे अकारात्परस्य भ्यसः पञ्चमीबहुवचनस्य हुं इत्यादेशो भवति ।

दूरुड्डाणें पडिउ खलु अप्पणु जणु मारेइ ।

जिह गिरि–सिङ्गहुं पडिअ सिल अन्नु वि चूरु करेइ ॥३३७॥

ङसः सु–हो–स्सवः ॥ ८ । ४ । ३३८ ॥

अपभ्रंशे अकारात्परस्य ङसः स्थाने सु हो स्सु इति त्रय आदेशा भवन्ति ।

जो गुण गोवइ अप्पणा पयडा करइ परस्सु ।
तसु हउं कलि–जुगि दुल्लहहो बलि किज्जउं सुअणस्सु ॥ ३३८ ॥

आमो हं ॥ ८ । ४ । ३३९ ॥

अपभ्रंशे अकारात्परस्यामो हमित्यादेशो भवति ।

तणहं तइज्जी भङ्गि नवि तें अवड–यडि वसन्ति ।
अह जणु लग्गि वि उत्तरइ अह सह सइं मज्जन्ति ॥ ३३९॥

हुं चेदुद्भ्याम् ॥ ८ । ४ । ३४० ॥

अपभ्रंशे इकारोकाराभ्यां परस्यामो हुं हं चादेशौ भवतः ।

दइवु घडावइ वणि तरुहुं सउणिहं पक्क फलाइं ।
सो वरि सुक्खु पइट्ठ णवि कण्णहिं खल–वयणाइं ।

प्रायोधिकारात् क्वचित्सुपोपि हुं ।

धवलु विसूरइ सामिअहो गरुआ भरु पिक्खेवि ।
हउं कि न जुत्तउ दुहुं दिसिहिं खण्डइं दोण्णि करेवि ॥ ३४० ॥

ङसि–भ्यस्–ङीनां हे–हुं–हयः ॥ ८ । ४ । ३४१ ॥

अपभ्रंशे इदुद्भ्यां परेषां ङसि भ्यस् ङि इत्येतेषां यथासंख्यं हे हुं हि इत्येते त्रय आदेशा भवन्ति । ङसेर्हे ।

गिरिहे सिलायलु तरुहे फलु घेप्पइ नीसावँन्नु ।
घरु मेल्लेप्पिणु माणुसहं तो वि न रुच्चइ रन्नु ॥

भ्यसो हुं ।

तरुहुं वि वक्कलु फलु मुणिवि परिहणु असणु लहन्ति ।
सामिहुं एत्तिउ अग्गलउं आयरु मिच्चु गृहन्ति ॥

ङेर्हि । अह विरल–पहाउ जि कलिहि धम्मु ॥ ३४१ ॥

आट्टो णानुस्वारौ ॥ ८।४।३४२ ॥

अपभ्रंशे अकारात्परस्य टावचनस्य णानुस्वारावादेशौ भवतः ॥ दइएं पवसन्तेण ॥ ३४२ ॥

एं चेदुतः ॥ ८।४।३४३ ॥

अपभ्रंशे इकारोकाराभ्यां परस्य टावचनस्य एं चकारात् णानुस्वारौ च भवन्ति ॥ एं ।

अग्गिएं उण्हउ होइ जगु वाएं सीअलु तेवँ ।
जो पुणु अग्गि सीअला तसु उण्हत्तणु केवँ ॥

णानुस्वारौ ।

विप्पिअ-आरउ जइ वि पिउ तो वि तं आणहि अज्जु ।
अग्गिण दड्ढा जइवि घरु तो तें अग्गि कज्जु ॥

एवमुकारादप्युदाहार्याः ॥ ३४३ ॥

स्यम्-जस्-शसां लुक् ॥ ८।४।३४४ ॥

अपभ्रंशे सि अम् जस् शस् इत्येतेषां लोपो भवति ॥ एइ ति घोडा एह थलि । इत्यादि । अत्र स्यम् जसां लोपः ॥

जिवँ जिवँ वंकिम लोअणहं णिरु सामलि सिक्खेइ ।
तिवँ तिवँ वम्महु निअय-सरु खर-पत्थरि तिक्खेइ ॥

अत्र स्यम्शसां लोपः ॥ ३४४ ॥

षष्ठ्याः ॥ ८ । ४ । ३४५ ॥

अपभ्रंशे षष्ठ्या विभक्त्याः प्रायो लुग् भवति ॥

सायर-सएहिं जु वण्णिअइ देक्खु अम्हारा कन्तु ।
अइमत्तहं चत्तङ्कुसहं गय कुम्भइं दारन्तु ॥

पृथग्योगो लक्ष्यानुसारार्थः ॥ ३४५ ॥

आमन्त्र्ये जसो होः ॥ ८।४ । ३४६ ॥

अपभ्रंशे आमन्त्र्येर्थे वर्तमानान्नाम्नः परस्य जसो हो इत्यादेशो भवति । लोपापवादः ॥

तरुणहो तरुणिहो मुणिउ मइं करहु म अप्पहो घाउ ॥ ३४६ ॥

भिस्सुपोर्हिं ॥ ८ । ४ । ३४७ ॥

अपभ्रंशे भिस्सुपोः स्थाने हिं इत्यादेशो भवति ॥ गुणहिं न संपइ कित्ति पर ॥ सुप् । भाईरहि जिवँ भारइ मग्गेहिं तिहिं वि पयट्टइ ॥३४७॥

स्त्रियां जस्-शसोरुदोत् ॥ ८ । ४ । ३४८ ॥

अपभ्रंशे स्त्रियां वर्तमानान्नाम्नः परस्य जसः शसश्च प्रत्येकमुदोतावादेशौ

भवतः । लोपापवादौ ॥ जसः । अंगुलिउ जज्जरियाओ नहेण ॥ शसः । सुन्दर-सव्वङ्गाउ विलासिणीओ पेच्छन्ताण ॥ वचनभेदान्न यथासंख्यम् ॥ ३४८ ॥

ट ए ॥ ८ । ४ । ३४९ ॥

अपभ्रंशे स्त्रियां वर्तमानान्नाम्नः परस्याष्टायाः स्थाने ए इत्यादेशो भवति ॥

निअ-मुह-करहिं वि मुद्ध कर अन्धारइ पडिपेक्खइ ।
ससि-मण्डल-चन्दिमए पुणु काइं न दूरे देक्खइ ॥
जहिं मरगय--कन्तिए संवलिअं ॥ ३४९ ॥

ङस--ङस्योर्हे ॥ ८ । ४ । ३५० ॥

अपभ्रंशे स्त्रियां वर्तमानान्नाम्नः परयोर्ङस् ङसि इत्येतयोर्हे इत्यादेशो भवति ॥ ङसः ।

तुच्छ--मज्झहे तुच्छ--जम्पिरहे ।
तुच्छच्छ--रोमावलिहे तुच्छ--राय तुच्छयर--हासहे ।
पिय--वयणु अलहन्तिअहे तुच्छकाय--वम्मह--निवासहे ॥
अन्नु जु तुच्छउं तहे धणहे तं अक्खणह न जाइ ।
कटरि थणंतरु मुद्धडहे जें मणु विच्चि ण माइ ॥

ङसेः ।

फोडेन्ति जे हियडउं अप्पणउं ताहं पराई कवण घण ।
रक्खेज्जहु लोअहो अप्पणा बालहे जाया विसम थण ॥३५०॥

भ्यसामोर्हुः ॥ ८ । ४ । ३५१ ॥

अपभ्रंशे स्त्रियां वर्तमानान्नाम्नः परस्य भ्यस आमश्च हु इत्यादेशो भवति ॥

भल्ला हुआ जु मारिआ बहिणि महारा कन्तु ।
लज्जेज्जं तु वयंसिअहु जइ भग्गा घरु एन्तु ।
वयस्याभ्यो वयस्यानां वेत्यर्थः ॥ ३५१ ॥

डेर्हिं ॥ ८ । ४ । ३५२ ॥

अपभ्रंशे स्त्रियां वर्तमानान्नाम्नः परस्य ङेः सप्तम्येकवचनस्य हि इत्यादेशो भवति ॥

वायसु उड्डावन्तिअए पिउ दिट्ठउ सहसत्ति ।
अद्धा वलया महिहि गय अद्धा फुट्ट तडत्ति ॥ ३५२ ॥

क्लीबे जस–शसोरिं ॥ ८ । ४ । ३५३ ॥

अपभ्रंशे क्लीबे वर्तमानान्नाम्नः परयोर्जस्–शसोः इं इत्यादेशो भवति ॥

कमलइं मेल्लवि अलि–उलइं करि–गण्डाइं महन्ति ।
असुलहमेच्छण जाहं मलि ते णवि दूर गणन्ति ॥ ३५३ ॥

कान्तस्यात उं स्यमोः ॥ ८ । ४ । ३५४ ॥

अपभ्रंशे क्लीबे वर्तमानस्य ककारान्तस्य नाम्नो योकारस्तस्य स्यमोः परयोः उं इत्यादेशो भवति ॥ अन्नु जु तुच्छउं तहे धणहे ॥

भग्गउं देक्खिवि निअय बलु बलु पसरिअउं परस्सु ।
उम्मिल्लइ ससि–रेह जिवँ करि करवालु पियस्सु ॥ ३५४ ॥

सर्वादेर्डसेर्हां ॥ ८।४।३५५ ॥

अपभ्रंशे सर्वादेरकारान्तात्परस्य ङसेर्हां इत्यादेशो भवति ॥

जहां होन्तउ आगदो । तहां होन्तउ आगदो । कहां होन्तउ आगदो ॥३५५॥

किमो डिहे वा ॥ ८।४।३५६ ॥

अपभ्रंशे किमोकारान्तात्परस्य ङसेर्डिहे इत्यादेशो वा भवति ॥

जइ तहो तुट्टउ नेहडा मइं सहुं नवि तिल–तार ।
तं किहे वङ्केहिं लोअणेहिं जोइज्जउं सय–वार ॥३५६ ॥

डेर्हिं ॥ ८।४।३५७ ॥

अपभ्रंशे सर्वादेरकारान्तात्परस्य ङेः सप्तम्येकवचनस्य हिं इत्यादेशो भवति ॥

जहिं कपिज्जइ सरिण सरु छिज्जइ खग्गिण खग्गु ।
तहिं तेहइ भड-घड़-निवहि कन्तु पयासइ मग्गु ॥
एक्कहिं अक्खिहिं सावणु अन्नहिं भद्दवउ ।

माहउ महिअल–सत्थरि गण्ड–त्थले सरउ ॥
अङ्गिहिं गिम्ह सुहच्छी–तिल–वणि मग्गसिरु ।
तहे मुद्धहे मुह-पङ्कइ आवासिउ सिसिरु ॥
हिअडा फुट्टि तडत्ति करि कालक्खेवें काइं ।
देक्खउं हय–विहि कहिं ठवइ पइं विणु दुक्ख-सयाइं ॥ ३५७ ॥

यत्तत्किंभ्यो ङसो डासुर्न वा ॥ ८।४।३५८ ॥

अपभ्रंशे यत्तत्किम् इत्येतेभ्योकारेन्तेभ्यः परस्य ङसो डासु इत्यादेशो वा भवति ॥

कन्तु महारउ हलि सहिए निच्छइं रूसइ जासु ।
अत्थिहिं सत्थिहिं हत्थिहिं वि ठाउवि फेडइ तासु ॥
जीविउ कासु न वल्लहउं धणु पुणु कासु न इट्ठु ।
दोण्णि वि अवसर–निवडिआइं तिण-सम गणइ विसिट्ठु ॥ ३५८ ॥

स्त्रियां डहे ॥ ८ । ४ । ३५९ ॥

अपभ्रंशे स्त्रीलिङ्गे वर्तमानेभ्यो यत्तत्किम्यः परस्य ङसो डहे इत्यादेशो वा भवति ॥ जहे केरउ । तहे केरउ । । कहे केरउ ॥ ३५९ ॥

यत्तदः स्यमोर्ध्रुं त्रं ॥ ८ । ४ । ३६० ॥

अपभ्रंशे यत्तदोः स्थाने स्यमोः परयोर्यथासंख्यं ध्रुं त्रं इत्यादेशौ वा भवतः ॥

प्रङ्गणि चिट्ठदि नाहु ध्रुं त्रं रणि करदि न भ्रन्त्रि ॥
पक्षे । तं बोल्लिअइ जु निव्वहइ ॥ ३६० ॥

इदम इमुः क्लीबे ॥ ८।४।३६१ ॥

अपभ्रंशे नपुंसकलिङ्गे वर्तमानस्येदमः स्यमोः परयोः इमु इत्यादेशो भवति ॥ इमु कुलु तुह तणउं । इमु कुलु देक्खु ॥ ३६१ ॥

एतदः स्त्री-पुं-क्लीबे एह एहो एहु ॥ ८।४।३६२ ॥

अपभ्रंशे स्त्रियां पुंसि नपुंसके वर्तमानस्यैतदः स्थाने स्यमोः परयोर्यथासंख्यम् एह एहो एहु इत्यादेशा भवन्ति ॥

एह कुमारी एहो नरु एहु मणोरह-ठाणु ।
एहउं वढ चिन्तन्ताहं पच्छइ होइ विहाणु ॥ ३६२ ॥

एइर्जस्-शसोः ॥ ८ । ४ । ३६३ ॥

अपभ्रंशे एतदो जस्-शसोः परयोः एइ इत्यादेशो भवति ॥ एइ ति घोडा एह थलि ॥ एइ पेच्छ ॥ ३६३ ॥

अदस ओइ ॥ ८ । ४ । ३६४ ॥

अपभ्रंशे अदसः स्थाने जस्-शसोः परयोः ओइ इत्यादेशो भवति ॥

जइ पुच्छह घर वड्डाइं तो वड्डा घर ओइ ।
विहलिअ-जण-अब्भुद्धरणु कन्तु कुडीरइ जोइ ॥

अमूनि वर्तन्ते पृच्छ वा ॥ ३६४ ॥

इदम आयः ॥ ८ । ४ । ३६५ ॥

अपभ्रंशे इदम्शब्दस्य स्यादौ अय इत्यादेशो भवति ॥

आयइं लोअहो लोअणइं जाई सरइं न भन्ति ।
अप्पिए दिट्ठइ मउलिआहिं पिए दिट्ठइ विहसन्ति ॥
सोसउ म सोसउ च्चिअ उअही वडवानलस्स किं तेण ।
जं जलइ जले जलणो आएण वि किं न पज्जत्तं ॥
आयहो दड्ढ-कलेवरहो जं वाहिउ तं सारु ।
जइ उट्ठब्भइ तो कुहइ अह डज्झइ तो छारु ॥ ३६५ ॥

सर्वस्य साहो वा ॥ ८।४।३६६ ॥

अपभ्रंशे सर्वशब्दस्य साह इत्यादेशो वा भवति ॥

साहु वि लोउ तडप्फडइ वड्डत्तणहो तणेण ।
वड्डप्पणु परिपाविअइ हत्थिं मोक्कलडेण ॥

पक्षे । सव्वु वि ॥ ३६६ ॥

किमः काइं-कवणौ वा ॥ ८ । ४ । ३६७ ॥

